॥ अथ श्रीविष्णुरहस्य प्रारंभः ॥

श्रीमद्विष्णु रहस्यस्थ विषयानुक्रमणिका लिख्यंते.

श्रीमद्विष्णु रहस्यस्य शोधपत्रमिदं.

सं०	अशुद्धं	सां.	नि.	शुद्धं.
	अध्याय १			
१	तत्त.	२		तत्त २७
	अध्याय २			
२	क्रीडाः		४	क्रीडाः १९
३	तप्रोक्तं.		४	तत्प्रोक्तं २६
	अध्याय ३			
४	देशोन्नाम.		७	देशोनाम.
	अध्याय ४			
५	कथनोन्नाम.	८		कथनोनाम.
	अध्याय ५			
६	कथनोन्नाम.		९	कथनोनाम.
	अध्याय ७			
७	मान्यस.		१२	मान्यःस ५८

सं०	अशुद्धं.	सां.	नि.	शुद्धं.
	अध्याय ८			
८	विचारोन्नाम.	१४		विचारोनाम.
	अध्याय ९			
९	शनेः.	१४		शनैः १०
१०	विवेकोन्नाम.	१६		विवेकोनाम.
	अध्याय ११			
११	दुःस्वम.		१९	दुःस्वम. ४५
१२	सॅवषु.	१९		सर्वेषु ५५
१३	हितसदा.	२०		हिनःसदा ८०
	अध्याय १२			
१४	मक्तथा.	२१		मत्कथा ३३
१५	निर्वृत्ति.		२२	निर्वृतिं ४३
	अध्याय १४			

सं०	अशुद्धं.	सां.	नि.	शुद्धं.
१६	कूर्या.		२४	कुर्या ३७
	अध्याय २०			
१७	दुःस्वस्य.	३२		दुःस्वस्य ४४
१८	साम्य.		३३	साम्य. ५६
	अध्याय २१			
१९	नभूत.	३३		नभूत् १
२०	यस्त्या.	३७		यत्स्या ५९
२१	श्रुणं.		४०	श्रुणु १२९
	अध्याय २२			
२२	शुश्रु.		४०	शुश्रू १
२३	यत्पुर्वं.		४१	यत्पूर्वं २१
	अध्याय २३			
२४	तुरूपै.	४१		तूरूपै १२

सं०	अशुद्धं.	सां.	नि.	शुद्धं.
२५	क्रतुदक्षः		४२	क्रतुर्दक्षः२०
२६	वृत्ति.	४२		वृतिं ४३
	अध्याय२४			
२७	महेश्वरः.		४३	महेश्वरः ९
२८	न्यूतेदूब.		४३	न्यूनेब्द१५
२९	तद्वैवै.	४३		तद्वै २३
३०	दुःत्थितः.		४४	दुत्थितः४३
३१	बिल.	४४		बिल ५०
३२	भुर्भुव.	४४		भूर्भुव ५०
३३	भवत्पभ्यां.	४४		भवत्पद्भ्यां. ५८
	अध्याय२५			
३४	वाससं.	४८		वाससां ६६
३५	श्वरं.		४९	स्वरं ७५

सं०	अशुद्धं.	सां.	नि.	शुद्धं.
	अध्याय ३६			
३६	घर्मि.	६७		धर्मि ११
	अध्याय ३८			
३७	विशेष.	७३		विशेषा १४
	अध्याय ५३			
३८	रेवत्वं.	१०५		देवत्वं ३१
	अध्याय ५४			
३९	कर्मानुलारी.	१०७		कर्मानुसारी१

☞ कियत् प्रतिषु उकारादि मात्रानुस्वार मुद्रा नोत्थिताः कतिपय प्रतिषु उत्थिताइति विज्ञाय ता अस्मिन् शोधपत्रे न प्रदर्शिताः.

(समाप्तं.)

॥ श्रीवेदव्यासायनमः ॥ श्रीगुरुभ्योनमः ॥ ॐ ॥ यतोभूतानिजायंते येनजीवंतितान्युत ॥ योहंतिमोक्षदस्तेषां तंविष्णुंप्रणमा-
म्यहं ॥ १ ॥ नैमिषेऽनिमिषक्षेत्रे ऋषयःशौनकादयः ॥ दीक्षितावैष्णवेयज्ञे सूतंपप्रच्छुरादरात् ॥ २ ॥ ऋषयऊचुः ॥ सूतसूतमहाभा-
ग वदनोवदतांवर दुःखांबुधौनिमग्नस्य कथंस्याज्जगतोहितं ॥ ३ ॥ यस्मिन्श्रुतेश्रुतंसर्वं यस्मिन्कृतेखिलंकृतं ॥ यद्ज्ञानेनकिंचिद्ज्ञो
यस्मिन्ज्ञातेचसर्ववित् ॥ ४ ॥ तादृशंब्रूहिनःकिंचित् किंवृथावचनात्फलं ॥ क्षणेक्षणेप्रयात्येत दायुर्नृणांमितंचतत् ॥ ५ ॥ तस्मात्त-
त्सार्थकंयेन तादृशंसुधियासदा ॥ श्रोतव्यंचापिवक्तव्यं कर्तव्यंचतदेवहि ॥ ६ ॥ व्यासशिष्योमहाभाग तत्प्रसादाच्चसर्ववित् ॥ अ-
तःपृच्छामहेसर्वे शुश्रूषंतोजगद्धितं ॥ ७ ॥ सूतउवाच ॥ भवंतोवेदविद्वांसः सर्वशास्त्रार्थवेदिनः ॥ यन्मांपृच्छथतत्प्रीत्या केवलंगुणना
यवा ॥ ८ ॥ अतोयावदहंवेद्मि तावद्वक्ष्यामिनान्यथा ॥ यत्पुराविष्णुनाप्रोक्तं सृष्ट्यादौब्रह्मणेस्वयं ॥ ९ ॥ ब्रह्माप्राहवसिष्ठाय वशिष्ठस्तु
पराशरं ॥ सकृष्णायसुतायाह सव्यासःशुकमुक्तवान् ॥ १० ॥ निषेवितपदद्वंद्वा च्छुकादहमवाप्तवान् ॥ इमंविष्णुरहस्याख्य मिति-
हासंहरिप्रियं ॥ ११ ॥ लक्षसंख्यामुवाचास्मै ब्रह्मणेससुतंनिजं ॥ किंचिद्भागंप्राहचान्यान् कश्यपादीन्मुनीश्वरान् ॥ १२ ॥ तैश्चस्व-
कीयशिष्येभ्यः प्रियेभ्यःसदुदीरितं ॥ यत्तुप्राप्तंवशिष्ठेन तच्छुकोमामवोचत ॥ १३ ॥ यानिचान्यानिलोकेस्मि न्प्रसिद्धानिद्विजोत्तम ॥
रहस्यानिमहाविष्णो र्वेदतान्यपिनारदात् ॥ १४ ॥ तत्रादौयच्छुकादाप्तं श्रूयतांकथयामितत् ॥ सृष्ट्यादौनिर्मितोब्रह्मा विष्णुनाप्रभ-

वि० विष्णुना ॥ १५ ॥ नाम्नासपुरुषोनाम पप्रच्छपित्तरंस्वकं ॥ किमर्थंसृष्टवान्मांत्वं किंनुकुर्यांमतःपरं ॥ १६ ॥ किमासीदद्यपर्यंतं तन्मेवि- २०
२ स्तरतोवद ॥ इत्युक्तोब्रह्मणातेन कृपयासमहेश्वरः ॥ प्रोवाचाखिलमस्मैत द्यत्पृष्टंतेनविस्तरात् ॥ १७ ॥ श्रीविष्णुरुवाच ॥ अती-
तेप्रलयेब्रह्म न्नवशिष्टाष्टभागतः ॥ योगनिद्रांतदामुक्त्वा दृष्ट्वातारमंतिकेंभ्रणीं ॥ १८ ॥ अंब्रह्मपरमोविष्णु र्भ्रियमाणासदातुया ॥ ते-
नैवसासुखज्ञान बलरूपांभ्रणीरमा ॥ १९ ॥ तांवीक्ष्यचकमेविष्णु र्नानारूपधरोन्वहं ॥ क्रीडामिसमयंकिंचि न्नानारूपधरोनया ॥ २० ॥
एवंसंचिंत्यदेवेशः स्वयंनारायणःप्रभुः ॥ चतुर्धात्व्यभवत्पूर्वं तथैवाभूत्ततोरमा ॥ २१ ॥ वासुदेवस्यभार्याभू न्मायासंकर्षणस्यच ॥
जयाथासीत्कृतिःशांति रभूत्साक्रमशस्त्विमे ॥ २२ ॥ प्रद्युम्नस्यानिरुद्धस्य भार्येनित्यसुखात्मिके ॥ चतुर्विंशतिधापश्चा द्दशधाचस-
हस्रधा ॥ २३ ॥ अनंतधाततोभूत्वा तथैवासीद्रमापिहि ॥ अन्यानानाविधानार्यो मुक्ताःसंसारबंधनात् ॥ २४ ॥ देवपत्न्योपियामु-
क्ता स्तथादेवादयःपरे ॥ गंधर्वायक्षरक्षांसि ऋषयोगुह्यकास्तथा ॥ २५ ॥ सित्धाअप्सरसश्चैव वैकुंठादिस्थिताश्चये ॥ सर्वेमुक्तगणा-
स्तानि ममरूपाणिसर्वशः ॥ २६ ॥ स्वस्वेछयाजुषंतेस्म त्तत्तद्ब्रह्मपुरःसराः ॥ ततोभूद्धयशीर्षःस श्रीरप्यासीत्धयानना ॥ २७ ॥ हय- २
रूपीबभूवायं रमाप्यासीत्ततोश्विनी ॥ देवाद्याश्चतथैवासन् चिक्रीडेसौततःसुरैः ॥ २८ ॥ किंचित्कालंततःकाम रूपीगोरूपवानभू-
त् ॥ रमाद्याश्चतथैवासन् शुत्धसत्वगुणेनसः ॥ २९ ॥ नदीपर्वतवृक्षादीन् नानारत्नानिसृष्टवान् ॥ सुवर्णरजतादीनि भूमिंद्यांसागरा-

२

नपि ॥ ३० ॥ ततोमकरमीनादि नानाजलचराणितु ॥ स्वयमेवाभवत्सर्व रूपःपुरुषविग्रहः ॥ ३१ ॥ तत्तद्रूपवतीचाथ रमाप्यासी-
त्तथेतरे ॥ ब्रह्माद्याश्चसपत्नीका नित्यानंदायथेच्छतः ॥ ३२ ॥ भूमौचाप्यसृजत्सोथ स्वात्मानंशिल्पवित्तमं ॥ नानाशिल्पानिचक्रे-
स सर्ववेत्ताजगत्पतिः ॥ ३३ ॥ शिष्यत्वेकल्पयामास ब्रह्माद्याःसर्वदेवताः ॥ ग्राम्यारण्यपशूनांस बभ्रेरूपाणिदेवराट् ॥ ३४ ॥ महा-
राजोभवत्सोथ तथासामंतरूपवान् ॥ प्राधान्येयोजयामास तथामात्यादिकर्मसु ॥ ३५ ॥ ब्रह्मादीनेवदेवेशः सर्वदानंदविग्रहः ॥
येतुनित्यंतमोविष्ठाः पापरूपास्वभावतः ॥ ३६ ॥ चोरत्वेकल्पयामास दंडयामासतानपि ॥ प्रजारूपांश्चकारान्यान् मुक्तान्येवह्यने-
कशः ॥ ३७ ॥ नित्यानंदान्लीलयैव विष्णुभक्तिपरायणान् ॥ दुःखलेशविनिर्मुक्तान् स्वस्ववृत्यैवतोषितान् ॥ ३८ ॥ असूयाद्यखि-
लैर्दोषै र्वर्जितान्लीलयैवहि ॥ विक्रीणंतश्चक्रीणंतो हरितुष्ट्यर्थमेवहि ॥ ३९ ॥ आसन्कदाचित्स्त्रीरूपो नानारूपसहस्रकैः ॥ सर्वेपि-
देवास्त्रीरूपा भूत्वातानिसिषेविरे ॥ ४० ॥ तानिप्रच्छाद्यरूपाणि पुनःपुरुषरूपकः ॥ जातादेवास्ततोप्यासन् सर्वेपुरुषरूपिणः ॥ ४१ ॥
केचिद्यज्ञैरीजिरेविष्णुमेव नानारूपंकेचिदध्यापयंश्च ॥ स्वस्मान्यूनान्केचिदाहुःपुराणा नीतिहासान्केचिदाहुर्मिथश्च ॥ ४२ ॥ एवंपू-
र्वदेवदेवोहमेव कालंकंचिन्मुक्तवंधैरजाद्यैः ॥ लक्ष्म्यायुक्तःक्रीडयामासपश्चा त्स्रष्टुंचासीन्मानसंकर्मबद्धान् ॥ ४३ ॥ एवंयःक्रीडनं-
विष्णोः रहस्यंपरमाद्भुतं ॥ प्रातःस्मरतिवारात्रौ सोप्येवंतनमोदते ॥ ४४ ॥ धनंधान्यंपशून्पुत्रान् भार्यांचैवमनोहरां ॥ इहलोकेचिरं-

भुक्त्वा ततोमुक्तिमवाप्नुयात् ॥ ४५ ॥ इतिश्रीविष्णुरहस्ये विष्णुक्रीडनंनाम प्रथमोध्यायः ॥ १ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीवेदव्यासायनमः ॥ ब्रह्मोवाच ॥ कियान्प्रलयकालोवै सृष्टिकालःकियानपि ॥ सृष्टिःकतिविधाचासीत् क्रीडनानंतरंहरेः ॥ १ ॥
श्रीभगवानुवाच ॥ अतिसूक्ष्मस्तुयःकालः सक्षणःपरिकीर्तितः ॥ क्षणाःपंचतृटिःप्रोक्ता पंचाशत्तालवःस्मृतः ॥ २ ॥ लवद्वयंनिमेष-
स्या न्मात्रास्यादष्टभिश्चतैः ॥ यथायंवदतेचाषो मात्रयोर्द्वितयंगुरुः ॥ ३ ॥ गुरूणांदशकंप्राणः प्राणषट्कंपलंभवेत् ॥ पळषष्टिर्घटी-
प्रोक्ता ताःषष्टिर्दिनमुच्यते ॥ ततस्त्रिंशद्घटीपूर्वा दिवारात्रिस्तथापरा ॥ दिनपंचदशपक्षस्तौ द्वौमासस्तुतद्द्वयं ॥ ५ ॥ ऋतुस्तःत्रित-
यंप्रोक्त मयनंतद्द्वयंपुनः ॥ वर्षमित्युच्यतेतच्च देवानांदिनमेवतु ॥ ६ ॥ अयनंतूत्तरंतत्र दिवारात्रिश्चदक्षिणं ॥ एवंदिनानांषष्टिश्च
शतत्रयसमन्वितं ॥ दिव्यंवर्षमिदंप्रोक्तं युगसंख्याततःशृणु ॥ चत्वार्येवसहस्राणि कृतंयुगमितीरितं ॥ ८ ॥ अष्टौशतानिवर्षाणा
मादावंतेचसंध्यके ॥ एतत्पादविहीनंतु त्रेतायुगमितीर्यते ॥ ९ ॥ ततोपिपादहीनंतु द्वापरंतस्ययत्पुनः ॥ अर्धंतत्कलिमानंस्या दे-
वंयुगचतुष्टयं ॥ १० ॥ दिव्यद्वादशसाहस्रं वर्षमानंमहायुगं महायुगानांसप्तत्या सैकयैवांतरंमनोः ॥ ११ ॥ चतुर्दशैवंमनवः प्रत्ये-
कंतुतदंततः ॥ संध्याकृतोन्मितैकास्या त्कल्पादौचतथैकका ॥ १२ ॥ संध्यापंचदशैवंतु युक्तामन्वंतसाब्दकैः ॥ कृत्वैवंजायतेयत्त

न्महायुगसहस्रकं ॥ १३ ॥ पितामहदिनंत्वेत त्तावतीरात्रिरेवहि ॥ सहिकल्पइतिप्रोक्तः तच्छतंत्रयषष्टिकं ॥ १४ ॥ वर्षंब्राह्ममितिप्रो-
क्तं तच्छतंपरमुच्यते ॥ तदर्धंतुपरार्धस्या त्पंचाशद्ब्राह्मवर्षकं ॥ १५ ॥ परमायुर्ब्रह्मणस्या त्तदंतेतौचतल्लयः ॥ १६ ॥ प्रलयःपरसं-
ख्याकः सार्धद्वादशवर्षकं ॥ अष्टमांशोभवेत्सार्धं सप्तासीत्यब्दकेगते ॥ १७ ॥ योगनिद्रांविमुंचामि ततःक्रीडामिपूर्ववत् ॥ ततश्चे-
वांतिमेकल्पे प्रलयस्यावशेषिते ॥ १८ ॥ क्रीडाःसमापिताःपश्चा त्सिसृक्षामेप्यजायत ॥ ततोविदिततत्वामे लक्ष्मीरूपद्वयान्विता
॥ प्रकृतिंबोधयामास देवानांदिहसृष्टये ॥ १९ ॥ सत्वराशेस्ततःसत्वं श्रीःसमादायतस्थुषो तमोराशेस्तथादाय तमोदुर्गाव्यवस्थि-
ता ॥ २० ॥ अतिश्वेतंशुद्धसत्वं अतिश्यामंतमस्तथा ॥ ततोममेच्छयैवैषा लक्ष्मीर्भूरूपमास्थिता ॥ २१ ॥ ततोभूस्तमसोराशेः किं-
चिच्चक्रेतमःपृथक् ॥ सत्वराशेस्तथासत्वं पृथक्चैवचकारह ॥ २२ ॥ विलोडयामासतमः सत्वेसत्वंतमस्यपि ॥ ततस्तस्मात्समादाय
मिश्रीभूताद्गुणद्वयात् ॥ २३ ॥ भागद्वययुतंचक्रे शबलंतद्रजोभवत् ॥ एवंराशित्रयेजाते श्रीभूदुर्गाभिरक्षिते ॥ २४ ॥ रजोभूमिष्टमा-
दाय ततोल्पंसत्वमेवतु ॥ ततोप्यल्पंतमश्चाथ त्रयमेकत्रकृतवान् ॥ २५ ॥ महत्तत्वंतुतत्प्रोक्तं ततोप्यर्धसमादधे ॥ किंचित्तत्रतमःक्षि-
प्त्वा हंकारंकृतवानहं ॥ २६ ॥ अहंकारंविभज्याथ त्रीन्राशीन्कृतवानहं ॥ राशित्रयंक्रमेणैव तत्तद्राशिंसमर्पयन् ॥ २७ ॥ गुणत्रयंवि-
निक्षिप्त मेकस्मिन्नेकमेवहि ॥ यत्रसत्वंविनिक्षिप्तं जातोवैकारिकोहिसः ॥ २८ ॥ रजसातैजसःप्रोक्तः तमसाचैवतामसः ॥ अर्धवैका-

वि ० रिकाद्गृह्य देवदेहान्मनस्तथा ॥ २९ ॥ विनिर्ममैतैजसार्धात् ज्ञानकर्मेंद्रियाणिच ॥ ऋषिगंधर्वमुख्यानां देहानपिविभागशः ॥ ३० ॥ २०
४ तामसार्ध्यात्तुकृतवा न्सूक्ष्मंशब्दादिपंचकं ॥ यक्षराक्षसदेहांश्च तथैवान्यान्सहस्त्रशः ॥ ३१ ॥ हस्तिनोश्वान्वृकान्गाश्च मृगव्याघ्रसरीसृ-
पान् ॥ अजानवीन्शुनःकोला सृगालान्पक्षिणस्तरून् ॥ ३२ ॥ तृणगुल्मलतादींश्च बिडालादींस्तथाखिलान् ॥ तथामकरमीनादी-
१ न् मद्गुकर्कटभुग्निकान् ॥ ३३ ॥ एवंजलचरान्सर्वा न्ग्राम्यारण्यपशूनपि ॥ कल्पयित्वाखिलान्पश्चा ज्जीवराशीन्व्यलोकयं ॥ ३४ ॥
कतिचित्पुरुषाकारः कतिचिद्धयरूपिणः ॥ सिंहव्याघ्रमृगादीनां गजगोजाविपक्षिणां ॥ ३५ ॥ वृक्षगुल्मलतादीना माकारंबिभ्रतो-
परे ॥ अपरेसदृशाकारा झषमीनादियादसां ॥ ३६ ॥ स्वरूपेणैवयेजीवा स्तादृशानंतसंज्ञकाः ॥ गुणैरनेकसंख्याकैः प्रत्येकमपिचा-
न्विताः ॥ ३७ ॥ सात्विकाश्वेतरूपास्तु श्यामास्तत्रैवतामसाः ॥ तत्रापितारतम्येन श्वेतश्वेततरादिकं ॥ ३८ ॥ यथायोग्यतयास-
र्वे राजसाशबलास्तथा ॥ तत्तदाकारसदृशै र्लिंगदेहैरनादिभिः ॥ ३९ ॥ कंचुकैरिवसंछंन्ना स्तत्तद्वर्णैःपृथक्पृथक् ॥ इंद्रियाणिदशै-
कंच मनस्तन्मात्रकास्तथा ॥ ४० ॥ पंचैवषोडशकलं लिंगदेहमनादिमत् ॥ आसन्नमरणास्तेषु येस्मिन्कल्पेमुमुक्षवः ॥ ४१ ॥ ४
ततोविलंबितंयेषां तेवैवृद्धास्ततोपिये ॥ विलंबितामोक्षमाप्तुं तेयुवानस्ततोर्भकाः ॥ ४२ ॥ एवंप्रतीयमानास्ते तेषुप्राणंव्यबोधयं ॥
उद्बोधितस्ततःप्राणः प्रणिपत्योपतस्थिवान् ॥ ४३ ॥ तमवोचंततःप्राण मस्मिन्कल्पेत्वयासह ॥ मोक्ष्यमाणांस्कृतान्जीवा न्प्र-

थक्कुरुमहामते ॥ ४४ ॥ एवंमदाज्ञयाप्राणो जीवान्सर्वांश्चतादृशान् ॥ उद्बोधयित्वापुरतः स्थापयामाससर्ववित् ॥ ४५ ॥ ततस्त-
त्वाभिमानिन्य स्तत्ररुद्रपुरःसराः ॥ देवताःशक्रसूर्याद्याः ताःसर्वाःप्रतिबोधय ॥ ४६ ॥ इत्युक्तःसमयाप्राण स्तानप्यादायतस्थि-
वान् ॥ ततोमदाज्ञयाप्राणो मनसींद्रंन्यवेशयत् ॥ ४७ ॥ श्रोत्रेदिग्देवतावायुं त्वचिसूर्यंविलोचने ॥ रसेतुवरुणंघ्राणे दस्रौवाचिध-
नंजयं ॥ ४८ ॥ पाणौदक्षंजयंतंच पादेशिश्नेतथामनुं ॥ पायौमित्रंततस्तासां बुभुक्षाचाभवत्तृषा ॥ ४९ ॥ ततःसंपीड्यमानास्ता-
स्तदामांशरणंययुः ॥ स्थानंप्रदिशयत्रस्था विषयान्भुज्महेवयं ॥ ५० ॥ तृणगुल्मलतावृक्षान् ग्राम्यारण्यपशूनपि ॥ क्रमेणाद-
र्शयंस्तांस्त स्थितास्तृप्तिंनभेजिरे ॥ ५१ ॥ ततोश्वंदर्शयामास नास्मिन्प्रीताबभूविरे ॥ ततोगांदर्शयामास तत्राप्यासुरतृप्तयः ॥
॥ ५२ ॥ महत्तत्वेनकृतवान् पूर्वयांपुरुषाकृतिं ॥ तत्वेनभूयसाभूयो भाविनांस्वयमेवहि ॥ ५३ ॥ तामदर्शयमेताभ्यो वरमित्य-
ब्रुवंस्तुताः ॥ ततःप्राणंतुदेहेस्मि न्निवेश्येंद्रियदेवताः ॥ ५४ ॥ सर्वान्जीवगणांश्चापि सर्वान्देवानपिस्मह ॥ यावन्यवेशयत्ताव द्बु-
भुक्षाचपिपासिका ॥ ५५ ॥ आवाभ्यामदिशस्थान मितिचुक्रुशुतुस्ततः ॥ अवोचंकल्पयाताभ्यां सर्वेस्थानंभवांत्विति ॥ ५६ ॥ एवं-
पुरुषदेहंतु वासुदेवोगिलंततः ॥ मायायांजनयामास पुरुषंपरमाद्भुतं ॥ ५७ ॥ स्वसहायंद्वितीयंस वांछमानोथमांप्रति ॥ उक्तवा-
न्देहिमेस्वामि न्सहायंकल्पयेतिवै ॥ ५८ ॥ ततःसंकर्षणाज्जज्ञे महत्तत्वस्यभागतः ॥ सूत्रनामाजीवगणैःयुक्तःप्राणोजयात्मजः ॥ ५९ ॥

आदिदेवौपुरातौतु.ताभ्यांसृष्ट्यर्थमेवहि ॥ प्रद्युम्नोजनयामास कृतौकन्याद्वयंतदा ॥ ६० ॥ सरस्वतींतुतत्राद्यां ब्रह्मणासमयोजयत्
वाणींप्राणेनताभ्यांतो क्रीडंतौतस्छतुश्चिरं ॥ ६१ ॥ यइमांप्राकृतांसृष्टिं जननंब्रह्मसूत्रयोः ॥ श्रावयेच्छृणुयाद्वापि प्राकृतैर्मुच्यतेगुणैः
॥ ६२ ॥ धनवान्पुत्रवान्लोके दीर्घायुःप्रियदर्शनः ॥ ज्ञातिश्रैष्ठ्यमवाप्यैव सभार्योमोदतेचिरं ॥ ६३ ॥ ॥ इतिश्री विष्णुरहस्ये ब्र-
ह्मोत्पत्तिर्नाम द्वितीयोध्यायः ॥ २ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीवेदव्यासायनमः ॥ श्रीभगवानुवाच ॥ एकदाचिंतयाविष्टः सब्रह्माचिंतयच्चिरं ॥ कथंसर्वज्ञतांयासि सृष्टौशक्तिःकथंभवेत् ॥ १ ॥
कथंमोक्षमवाप्स्यामि मुक्तःसंसारसागरात् ॥ एवंचिंतयतातेन स्मृतोहंसर्ववित्तमः ॥ २ ॥ सएवभगवान्मह्य मुपदेष्टुमिहार्हति ॥
नान्यत्किंचित्प्रपश्यामि ममचिंतापनोदकं ॥ ३ ॥ ततोहयास्यरूपेण तत्समीपेतदैवतु ॥ आविर्भूतस्ततोमांस दृष्ट्वाश्चर्यस्वरूपिणं
॥ ४ ॥ विस्मितःप्रेक्ष्यमाणोमां किंचिन्नैवाभ्यपद्यत ॥ तत्रागमत्तदासूत्र नामाप्राणस्तदैवहि ॥ ५ ॥ ततस्तौकृपयावीक्ष्य परामृ-
श्यचबाहुभिः ॥ त्वच्चिंतापरिहाराय विष्णुरेवाहमागतः ॥ ६ ॥ इतिश्रुत्वाततोब्रह्मा प्रणनामसदंडवत् ॥ ततःप्राणोपितत्पत्न्यौ
सर्वेनेमुःपुनःपुनः ॥ ७ ॥ लक्ष्मीरप्यभवत्तत्र सदामत्सेवनेरता ॥ ब्रह्माणमुपवेश्याग्रे पृष्ठतोस्यान्निवेशयच ॥ ८ ॥ वेदांश्चैवोपवेदांश्च-

५

सर्वानध्यापयंक्रमात् ॥ ऋचोयजूंषिसामानि तथाथर्वांगिरांसिच ॥ ९ ॥ आयुर्वेदंधनुर्वेदं गांधर्वंचार्थशास्त्रकं ॥ चतुर्णामुपवेदांश्च त-
तोंगानिपृथक्पृथक् ॥ १० ॥ शिक्षाकल्पोनिरुक्तंच छंदोव्याकरणंतथा ॥ ज्योतिषंचेतिषट्प्रोक्ता न्यंगानिविधिवन्मया ॥ ११ ॥ त-
दाब्रह्मातदन्येपि यन्मयैतदुदीरितं ॥ नसम्यग्विविदुःपश्चा द्ब्रह्माहंब्रह्मणिस्थितः ॥ १२ ॥ प्राणेप्राणोगिरावाणी सरस्वत्यांसरस्वती॥
ततःपुरुषदेहेतु येमयानिहिताःपुरा ॥ १३ ॥ देवाश्चऋषिगंधर्वा नानादेहधराश्चये ॥ जगतांबीजभूताये पशवःक्रिमिकीटकाः ॥ १४ ॥
वृक्षगुल्मलताद्याश्च तेषुतेषुप्रविष्टवान् ॥ तैस्तैरूपैःस्वयमहं तत्तन्नामाखिलाश्रयः ॥ १५ ॥ अतोमांसर्वनामानं तथासर्वस्वरूपिणं ॥
सर्वेवेदावदंतीमे तथातैस्तैश्चनामभिः ॥ १६ ॥ तत्तत्स्वरूपंमामेव प्रणमंतिस्तुवंतिच ॥ मुख्यतोवेदवेद्योहं गौणवृत्यातथापरे ॥१७॥
विद्वांसस्तद्विजानंति ममविष्णोःपरंपदं ॥ स्वातंत्र्यपारतंत्र्याभ्यां दिविचक्षुरिवाततं ॥१८॥ ततोमननशीलास्ते श्रुतस्यार्थस्ययुक्ति-
भिः ॥ निश्चित्यध्यानधारायां जायंतेमग्नमानसाः ॥ १९ ॥ यतोयतोमनोयाति तेषांब्रह्मन्सदैवहि ॥ ध्यायंतितत्रतत्रैव स्वातंत्र्या-
दिगुणैर्युतं ॥ २० ॥ एवंध्यानपरीपाके जातेतेषांमहात्मनां ॥ स्वरूपयोग्यंयत्तेषां तादृशंरूपमास्थितः ॥ २१ ॥ प्रत्यक्षविषयोह्येषां
भवामिकृपयाततः ॥ अव्यक्तोव्यक्ततांयामि तद्भक्त्यातुष्टमानसः ॥ २२ ॥ नकश्चित्स्वेच्छयामांयत् द्रष्टुमीशोहिविद्यते ॥ अव्यक्तस्त-
दहंप्रोक्तो मदिच्छातोयतोखिलाः॥२३॥पश्यंतिमांततोवेदै र्गीयेहंव्यक्तइत्यपि ॥ यतोहमखिलंन्यस्य पुरुषस्यकलेवरे ॥ २४ ॥ प्रा-

वि० र०
६

कृतान्जीवसंघांश्च लिंगदेहेनसंयुतान् ॥ वासुदेवेनरूपेण तान्निगील्यविसृष्टवान् ॥२५॥ मायायांबीजरूपेण यतःसातव्यजीजनत्॥ अ० ३
जगत्पितातताहंवै जगन्मातारमाततः ॥ २६ ॥ मायाजन्यमिदंसर्वं मायिकंचततःस्मृतं ॥ जंगमानांस्थावराणा मेवंयोनिर्भवेद्र-
मा ॥ २७ ॥ अहंबीजप्रदस्तत्र सर्वोत्पत्तिस्ततोभवत् ॥ एवंममहिमानंयो विजानातिचभक्तिमान् ॥ २८ ॥ सएवमांस्फुटंपश्ये
न्नखिद्येतततःपरं ॥ क्रियमाणेःपुण्यपापे र्यानिस्युःसंचितानिच ॥२९॥ तानिमद्दर्शनादेव वन्हियोगाद्यथेषिकाः ॥ तत्क्षणाद्भस्मतां-
यांति यानिस्युःफलितानिच ॥ ३० ॥ कर्माणितानिभुक्त्वैव शुभाशुभफलानिवै ॥ कृतकृत्याभवेयुस्ते बोधयंतिपरानपि ॥ ३१ ॥ य-
थासुप्तेषुसर्वेषु यदेकोजागृवान्भवेत् ॥ परान्संबोधयत्येव ह्यनर्थेसमुपस्थिते ॥ ३२ ॥ तथैवसुप्तान्संसारे स्वहितंचाप्यपश्यतः ॥ प्र-
न्य तिपन्नान्स्वभक्तांश्च जागृवांसोविमन्यवः ॥ ३३ ॥ स्वरूपंपरमंविष्णो र्यद्वेदैःप्रतिपादितं ॥ प्रकाशयंतिलोकान्हि ग्रस्यमानान्निमज्ज-
तः ॥ ३४ ॥ भवेदुःखपर्याराशौ कृपयादीनवत्सलाः ॥ यदाप्रविष्टोब्रह्माणं तथाप्राणंसरस्वती ॥ ३५ ॥ वाणींचापिततोब्रह्मा मन्म-
योभूद्विशेषतः ॥ अन्येपिमन्मयाजाता स्ततोयन्मदुदीरितं॥३६॥चिंतयित्वाविदुःसम्यक् तदर्थंसर्वमेवहि ॥ विदितेसांगवेदार्थे ह्युः ६
पवेदार्थएवच ॥ ३७॥ अपूर्णमेनिरेत्मानं चत्वारस्तेपुनःपुनः ॥ मामुवाचततोब्रह्मा स्वामिन्भवदनुग्रहात् ॥ ३८ ॥ उन्मीलितं-
ज्ञानचक्षु र्भवद्भीगंजनेनमे ॥ तथापिमन्येह्यात्मान मपूर्णतद्वदस्वमे ॥ ३९ ॥ त्वंमेमातापिताबंधु र्गुरुस्वामीचनित्यशः ॥ सर्वज्ञः-

6

सर्वकर्ताच मिथ्याज्ञानतमोपहः ॥ ४० ॥ अतस्त्वांपरिपृछामि यत्तन्मेकृपयावद ॥ वक्तव्यमवशिष्टंकिं येनात्मामेनतुष्यति ॥ ४१ ॥
अपूर्णमनुतेकस्मा त्कस्मिन्ज्ञातेचपूर्णतां ॥ भवेयंतद्वदाशुत्वं येनाहंसर्ववित्तमः ॥ ४२ ॥ सर्वपूज्यःसर्वगुरु स्तवभक्तोविशेषतः ॥ भ-
वेयंकृतकृत्यश्च नान्यथाहंसुखंलभे ॥ ४३ ॥ इत्युक्तोहंतदाब्रह्म न्पुरुषेणमहात्मना ॥ गुह्यात्गुह्यतमंज्ञानं कृपयैतदवादिषं ॥ ४४ ॥
इतिश्री विष्णुरहस्ये वेदविधोपदेशोन्नाम तृतीयोध्यायः ॥ ३ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीवेदव्यासायनमः ॥ हयग्रीवउवाच ॥ व्यापकत्वादहंविष्णु र्विशिष्टप्राणनादितः ॥ विशिष्टसुखवत्वादे रपिविष्णुरहंश्रुतः ॥
॥ १ ॥ सृष्टिकालेमयासृष्टं विश्वंस्थावरजंगमं ॥ तस्याहंव्यापकत्वाच्च बहिरंतर्व्यवस्थितः ॥ २ ॥ अपरिछिन्नरूपोतः परिछिन्नइवा-
भवं ॥ भूयोनिरुत्थरूपेण तत्तद्वस्तुविचेष्टकः ॥ ३ ॥ तत्तच्छक्तिप्रदोनित्यं तत्तत्कर्मानुसारतः ॥ सर्वत्रावस्थितेरेव मनिरुद्धइतिस्मृतः
॥ ४ ॥ घटाकारंभवत्येव घटस्थंसलिलंयथा ॥ तत्तदाकारवान्विष्णुः तत्तद्वस्तुस्थितस्तथा ॥ ५ ॥ तथाविधंमांजानंति पश्यंत्यथ
८आ परोक्षतः ॥ अनंतशक्तिमोशानं कथयंत्यपिवैमिथः ॥ ६ ॥ शिक्षयंतिस्वशिष्येषु प्रपन्नेष्वपिनित्यशः ॥ दयालवःपदंविष्णो र्ब्रह्मादृशं स्त
सदसत्परं ॥ ७ ॥ जागृवांसोथविद्वांसो दिविचक्षुरिवाततं ॥ तन्मूढानैवजानंति मायामुषितचक्षुषः ॥ ८ ॥ देहेहंभाविनोन्यत्र मम-

ताबुद्धयःसदा ॥ अनिच्छंतोपिभुंजंति दुःखानिविविधान्यपि॥९॥सुखानिप्रार्थ्यमानानि नाप्नुवंतिनिजेच्छया॥प्रतिक्षणंप्रपश्यंति स-
र्वेप्येवंपरात्मतां ॥ १० ॥ स्वातंत्र्यंमन्यतेचापि महामोहस्यजृंभणं ॥ विदित्वापिनजानाति पश्यन्नपिनपश्यति ॥ ११ ॥ नशृणोति-
तथाशृण्वन् शिक्षमाणोनशिक्षते ॥ यत्तन्मायाबलंविष्णो र्महाशक्तेर्महात्मनः ॥ १२ ॥ बोधयंतःपरान्येतु स्वयंमुग्धाभवंत्युत ॥ यत्त-
न्मायाबलंविष्णो र्महाशक्तेर्महात्मनः ॥ १३ ॥ परेषांहानिलाभादि वेत्तारःस्वंनजानते ॥ यत्तन्मा० ॥ १४ ॥ परेषांरोगहर्तारः स्वरो-
गंनविज्ञानते ॥ यत्तन्मा० ॥ १५ ॥ परेषामभिचारादि कुर्वंतःस्वंनजानते ॥ यत्तन्मा० ॥ १६ ॥ अधीयानेषुसर्वेषु जायंतेचित्रबुद्ध-
यः ॥ यत्तन्मा० ॥ १७ ॥ अचेतनस्यवृक्षादेः सूर्यादेर्दर्शनादिना ॥ यस्यात्पत्रविकासादि सामायापरमामम ॥ १८ ॥ अचेतनोपिदे-
होयं नानाचेष्टाःकरोतिवै ॥ स्वपातंनैवजानाति सामाया० ॥ १९ ॥ एकरोगेषुदेहेषु एकमेवहिचौषधं ॥ करोतिफलभेदंय त्सामाया०
॥ २० ॥ गोमयादेर्हिजायंते नानाजीवाःसहस्रशः ॥ विनामातापितृभ्यांयत् सामाया० ॥ २१ ॥ गवादिभक्षितंवस्तु क्षीररक्तादिभे-
दतः ॥ भजतेपरिणामंय त्सामाया० ॥ २२ ॥ देहस्थानविशेषेषु नखलोमादिकंहियत् ॥ जायतेस्वेछयानैव सामाया० ॥ २३ ॥
बीजमंकुरतांयाति काचिच्छाकाप्ररोहति ॥ नप्ररोहतिकिंचिच्च सामाया० ॥ २४ ॥ बीजादिनाविनैवान्य द्भूमेर्वासलिलादपि ॥ जा-
यतेस्वेछयानैव सामाया० ॥ २५ ॥ रजस्वलायांभार्यायां रेतःसेकेकृतेपिहि ॥ नैवोत्पत्तिर्हिगर्भस्य सामाया० ॥ २६ ॥ शुक्रशोणि-

अ० ४
पश्यन्नपि
७
वि

तसँबंधा द्गर्भौत्पत्तिर्हिजायते॥तथावयवसंस्थानं सामाया०॥२७॥शुक्लशोणितसंबंधा त्स्त्रीपुंक्लीबादिभेदतः॥जायतेगर्भनिष्पत्तिःसा-
१ माया० ॥ २८ ॥ गर्भस्थस्यापिजीवस्य काणखंजादिदोषतः ॥ तथावयवदार्ढ्यादि सामाया०॥ २९ ॥ भक्षणेनविनैवैष श्वासरो-
धादिपीडनात् ॥ जीवत्येवमृदुर्गर्भः सामाया० ॥३०॥ मातुर्जठरदाहेन पीड्यमानोप्यधोमुखः ॥ जीवत्येवमृदुर्गर्भः सामाया० ॥३१॥
अपक्वेपिपतत्येषः पक्वोऽपिनपतत्ययं ॥ बहिर्नैवेच्छयायाति सामाया० ॥ ३२ ॥ आयातिऋजुमार्गेण मार्गमन्यंविशत्यपि ॥ अनृ-
जुर्जायतेवापि सामाया० ॥ ३३ ॥ जातमात्रःपिबत्येष स्तनंरोरूयतेहितत् ॥ नानाचेष्टाश्चकुरुते सामाया० ॥ ३४ ॥ वृक्षादिप-
त्रपुष्पादौ चित्राकारोहिजायते ॥ विचित्रवर्णगंधादि सामाया०॥ ३५ ॥ काष्ठभारोमहानेष स्वयंतरतितारयेत् ॥ मज्जयेच्चसिला-
खंडं सामाया० ॥ ३६ ॥ नपश्यंतिजलेकेचि ज्जीवानिर्मग्नचक्षुषः ॥ स्थलेकेचिन्नपश्यंति सामाया० ॥ ३७॥ रात्रौकेचिन्नपश्यंति दि-
वाकेचित्तथापरे ॥ स्थलेजलेन्येपश्यंति सामाया० ॥ ३८ ॥ उड्डीयंतेपक्षहीना महापक्षास्तथापरे ॥ नैवोड्डनंप्रकुर्वंति सामाया०
॥ ३९ ॥ स्थलेवापिजलेवापि तत्तत्स्थानविशेषतः ॥ जायतेविविधंवस्तु सामाया० ॥ ४० ॥ विचारितेखिलंवस्तु यद्यत्सृष्टंमयावि-
धे ॥ विचित्रमेवमन्यस्व यतःशक्तोनहीतरः ॥ ४१ ॥ कर्तुंचेष्टयितुंवापि कथंवापिमयाकृतं ॥ जानातिनैवमूढोयं वृथापंडितमानवा-
न् ॥ ४२ ॥ सर्वेषामपिविद्यानां सर्वशिल्पादिकस्यच ॥ अहमेवगुरुर्मुख्य स्तत्तद्विद्याप्रदर्शनात् ॥४३॥ नानारूपधरोलोके नानाजीवे

पुसंस्थितः ॥ दर्शयाम्यखिलाविद्या स्तथाशिल्प्यान्यनेकशः ॥४४॥ अतोमहागुरुरहं स्वतंत्रःपूर्णशक्तिमान् ॥ पूर्णानंदःपूर्णतनुः पूर्ण-
ज्ञानोखिलात्मकः ॥ ४५ ॥ सर्वाकारःसर्वरूपः सर्वनामाखिलेष्टदः ॥ नानावेदास्तुवंतीत्थं नानाकारंजगद्गुरुं ॥ ४६ ॥ नानानामान-
मीशानं स्वातंत्र्यादिगुणैर्युतं ॥ स्वस्वज्ञानानुसारेण सर्वेमांहिविजानते ॥ ४७ ॥ भजंतिस्वानुरूपेण प्राप्नुवंतिफलंतथा ॥ यइदंम-
मचारित्रं चित्रंमायाविजृंभितं ॥ ४८ ॥ शृणुयाद्वापठेद्वापि सभक्तिंमयिविंदति ॥ गर्भदुःखंचनाप्नोति लभतेचधनंसुतान् ॥ ४९ ॥
अंतेमल्लोकमाप्नोति सत्यंसत्यंवदामिते ॥ ५० ॥ इतिश्री विष्णुरहस्ये मायाचरित्र कथनोन्नाम चतुर्थोध्यायः ॥ ४ ॥ ॥ छ ॥

॥ श्रीवेदव्यासायनमः ॥ श्रीब्रह्मोवाच ॥ पूर्णानंदोपिभगवान् किमर्थंसृष्टिमातनोत् ॥ प्राप्तवान्किंनुसृष्ट्यास कथंपूर्णस्तथास-
ति ॥ १ ॥ श्रीहयग्रीवउवाच ॥ यएवानंदवान्लोके सक्रीडांतनुतेभृशं ॥ अतिचित्राणिकर्माणि सएवतनुतेयतः ॥ २ ॥ नरा-
अश्वाश्वगोजावि मुखायेपशवोपिहि ॥ क्रीडंत्यानंदतोलोके पूर्णानंदोहरिःकिमु ॥ ३ ॥ चिंतामग्नोज्वरेणार्तः स्वप्तुंशक्नोतिनो- ८
सुखं ॥ यःसकिंक्रीडतेतस्य यतःसर्वविषायते ॥ ४ ॥ यथानंदस्तथाक्रीडा यथानंदस्तथोद्यमः ॥ महानंदस्यमहती तथाक्रीडेयमी-
रिता ॥ ५ ॥ श्रेयंहिसकलासृष्टिः तस्यानंदस्यलेशतः ॥ ३अ इनंतानंदपूर्णस्य ह्यनुरूपाकथंभवेत् ॥ ६ ॥ ब्रह्मांडादेःपरिछिन्ना सृष्टि-

४

रेषेतिहिश्रुतिः ॥ पूर्णानंदोनचेत्तस्या त्कथंसृष्टिर्भवेदियं ॥ ७ ॥ कोह्येवान्याच्चकःप्राण्या त्स्फुटमित्याहहिश्रुतिः ॥ तस्मादानंदपू-
र्णाब्धे वींचीबुद्बुदलेशवत् ॥ ८ ॥ सृष्टिरेषाखिलाब्रह्मन् अन्यदप्यवधारय ॥ अनादिकर्मणाबद्धा जीवानित्याह्यनेकशः ॥ ९ ॥
लिंगदेहयुताःसर्वे पतितामूर्छिताइव ॥ यदितेस्थूलदेहेन युतानस्युरिमेखिलाः ॥ १० ॥ कथंकर्माणिकुर्वीरन् विष्णुभक्तिपरायणाः ॥
अपूर्णभक्तयस्तेवा कथंमोक्षमवाप्नुयुः ॥ ११ ॥ इतितेषांतुकारुण्या द्दयालुर्भगवानिदं ॥ सृष्ट्यादिकुरुतेसर्व मन्यथातद्दयालुता ॥ १२ ॥
व्याहन्येत तथाप्यन्यान् जीवान्मध्यमतामसान् ॥ सृजत्यवतिहंत्येव भक्तानांभक्तिवृद्धये ॥ १३ ॥ एवंसात्विकमध्यस्थ तामसांस्त्रि-
विधानपि ॥ सृजत्यवतिहंतीशो लीलयाभक्तवत्सलः ॥ १४ ॥ नकाचिदधिकालब्धि रनयासृष्टिलीलया ॥ नहानिश्चापिसंहारा त्पूर्णानं-
दस्यसर्वदा ॥ १५ ॥ अनादिकालतस्त्वेव संकल्पोजगदीशितुः ॥ अतःसृष्ट्यादिकालीला यथाकालंभवंतिहि ॥ १६ ॥ इतिब्रह्मंस्त-
वाख्यातं यन्मांत्वंपरिपृष्टवान् ॥ संमतंसर्ववेदानां किमन्यच्छ्रोतुमिच्छसि ॥ १७ ॥ इतिश्री विष्णुरहस्ये सृष्ट्यादिकारण कथनोनाम-
पंचमोध्यायः ॥ ५ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीवेदव्यासायनमः ॥ ब्रह्मोवाच ॥ यदिसाक्षान्महाविष्णु र्जीवान्कर्मानुसारतः ॥ सृजत्यवतिहंतीशः स्वातंत्र्यंतस्यतत्कथं ॥ १ ॥

वि० र० अ० ६
९

स्वेच्छयैवयदाकुर्या ज्जीवानांसर्जनादिकं ॥ कथंतर्हिविचित्रास्या त्सृष्टिरेषासनातनी ॥ २ ॥ स्वर्गंवानरकंवापि मोक्षंवाप्यथवासृ-
तिं ॥ भजेयुरेवमीशस्य वैषम्यंनकथंभवेत् ॥ ३ ॥ नास्तितस्यरिपुःकश्चित् नमित्रंवाकथंचन ॥ पूर्णानंदस्यतस्यैते भवेयुर्देहिनःस-
माः ॥ ४ ॥ अत्रमेसंशयस्तात तंभवान्छ्रोतुमर्हसि ॥ श्रीहयग्रीवउवाच ॥ यथैवलोकेभूपालाः शिक्षयंतिनिजान्जनान् ॥ ५ ॥
ममसेवामिमांकुर्या श्चेत्धनंत्वमितंततः ॥ दास्यामिनोचेन्नोदद्या मथत्वंस्तेयकर्मचेत् ॥६॥ करोषिवाथमेदास्या दन्यथावर्तसेयदि॥
दंडनीयोमयानूनं ममद्वेषंकरोषिचेत् ॥ ७ ॥ शिरच्छेदादिनांत्वांहि योजयिष्यामिनान्यथा ॥ अथानन्यमनस्त्वेन ममभक्तिंकरोषि-
चेत् ॥ ८ ॥ दिनेदिनेकरिष्यामि तववेतनवर्धनं ॥ एवंसतियथाकुर्या स्तथाफलमवाप्स्यसि ॥ ९ ॥ नचमित्रंनवाशत्रु रसित्वंमे-
स्वभावतः ॥ यथाभावयसेमांत्वं तथात्वांभावयाम्यहं ॥ १० ॥ अनादिकालतस्त्वेवं संकल्पःस्वयमेवहि ॥ कृतोस्तितेननैवस्या
त्स्वातंत्र्यस्यविघातनं ॥ ११ ॥ श्रुतिस्मृतीममैवाज्ञे कुर्यात्तदनुसारतः ॥ सत्कर्माणिददाम्यस्मै फलंकर्मानुसारतः ॥ १२ ॥ निषि-
द्धानितुयःकुर्याद ज्ञानात्धाष्टर्यतोपिवा ॥ विहितंचनकुर्वीत तंकुर्यान्नरकेस्थितं ॥१३॥ श्रवणंमननंध्यानं कुर्वन्साक्षात्करोतिमां॥
यस्तस्मैमोक्षदाताहं योद्वेष्टिसतत्तंहिमां ॥ १४ ॥ तमोंधेपातायिष्यामि निवृत्तिर्नयतोभवेत् ॥ तमोनारंभणंवव्रे मनंतंपंचकष्ट-
दं ॥ १५ ॥ तन्मध्येपतितोजातु नबाहिर्गंतुमर्हति ॥ नहिप्रीणाम्यहंकंचि न्नहिद्वेष्मिचकंचन ॥ १६ ॥ येयथामांप्रपद्यंते तांस्तथै-

अस्ति
९
अ

९ वभजाम्यहं ॥ सत्यसंकल्पतस्तस्मा दन्यथानकरोत्ययं ॥ १७ ॥ अन्यःकोपिनचास्त्येव #तत्संकल्पविघट्टकः ॥ सत्यसंकल्पतस्त-
स्मा ज्जायतेसर्वदैवाहि ॥ १८ ॥ जीवसृष्ट्यादिकंसर्वं दोषशंकापितत्रन ॥ ब्रह्मोवाच ॥ कर्मैवास्तुततःकिंनु कार्यमस्माकमीश्व--
रात् ॥१९॥ यतएवभवेन्क्रुणा मूर्ध्वाधोगमनंसदा॥श्रीहयग्रीवउवाच ॥ चौर्यवापारदार्यंवा थवान्यदपराधनं ॥ २० ॥ करोतिकं-
श्चित्तत्कर्म तन्नदंडयतिस्वयं ॥ किंतुराजानरस्यास्य विदित्वाकर्मपापकं ॥ २१ ॥ दंडंकरोतिशास्त्रोक्तं स्वेच्छयैवात्रपूरुषे ॥ एवंहि-
कश्चित्स्वगृहे निर्जनेवाथवावने ॥ २२ ॥ करोतिधावनादीनि तत्फलंनसमश्नुते ॥ तादृक्चधावनादीनि भूपस्याग्रेकरोतिचेत्
॥ २३ ॥ तुष्टःसएवदद्याच्च तत्तत्कर्मानुसारतः ॥ एवंकर्मजडंनैव फलंदातुमलंस्वयं ॥ २४ ॥ ततएवास्त्यपेक्षात्र फलदानेमहेशितुः॥
तुष्टःपापंदहेदेष रुष्टःपुण्यंदहेदपि ॥ २५ ॥ तस्यैवतच्चरेद्भक्तिं नचद्वेषंमनागपि ॥ इतितेसर्वमाख्यातं यत्पृष्टंमेत्वयानघ ॥ २६ ॥ मनाक्
इदानींकथयिष्यामि येनपूर्णंभवेन्मनः ॥ श्रुणुष्वावहितोब्रह्मन् परंगुह्यंवदामिते ॥ २७ ॥ ॥ इतिश्री विष्णुरहस्ये स्वातंत्र्याद्यु-
पपादनंनाम षष्ठोध्यायः ॥ ६ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीवेदव्यासायनमः ॥ हयग्रीवउवाच ॥ एवंवस्तुषुसर्वेषु विद्यमानंमहेश्वरं ॥ वेदास्तुवंतिमामेव नानारूपमनेकधा ॥ १ ॥ ता-

वद्रूपैस्तुतंत्राणि स्फुटंतैस्तैश्चनामाभिः ॥ प्रसादयंतिमांमंत्रै स्तत्तदागमदीक्षिताः ॥ २ ॥ सर्वरूपस्तुतिपराः सर्वैवेदाहिमुख्यतः ॥
आव्हानतत्पराण्याहुः सर्वतंत्राणिमुख्यतः ॥ ३ ॥ वेदाःश्रुतयइत्युक्ता स्तंत्राणिस्मृतयस्त्विति ॥ श्रुतिस्मृतीउभेनेत्रे विप्राणांपरि-
कीर्तिते ॥ ४ ॥ एकेनहीनःकाणस्या द्वाभ्यामंधःप्रकीर्तितः ॥ अतोविप्रेणकर्तव्यं शीलनैवेदतंत्रयोः ॥५॥ अनुष्टानंतथाकुर्या दुभयो-
र्क्तविशेषतः ॥ अतस्तंत्राणिवक्ष्यामि तेनपूर्णोभविष्यसि ॥६॥ श्रीभगवानुवाच ॥ एवमुक्तःसभगवान्ह यग्रीवोयंमत्तनुः ॥ ब्रह्मणे-
कथयामास क्रमात्तंत्राणिसर्वशः ॥ ७ ॥ पंचरात्रंपाशुपतं कापिलंशाक्तमेवच ॥ सौरगाणेशवाम्नादी न्सुसिद्धान्यामलादिकान्
॥ ८ ॥ देवताऋषिगंधर्वाः सिद्धगुत्धकपन्नगाः ॥ वृक्षगुल्मलताद्याश्च वज्राद्यारत्नजातयः ॥ ९ ॥ गजाश्वगोजमेषाद्या येचान्येस्युः-
पदार्थकाः ॥ सर्वैतेवेदवाक्येषु स्तूयंतेहितथैवच ॥ १० ॥ तंत्रेषुतेषामाव्हानं प्रसादोन्मुखताततः ॥ तत्तन्मंत्रैश्चजायेत तत्तद्भक्तेभ्य-
एवहि ॥ ११ ॥ योभावयतिसर्वत्र तृणगुल्मलतादिषु ॥ स्थितंमांसोश्नुतेसर्वं फलंमत्प्रीतिसंभवं ॥ १२ ॥ इतिश्रुत्वावचस्तस्य ह-
यास्यस्यमहात्मनः ॥ पप्रच्छपुरुषस्त्वाद्यः प्रणयोत्फुल्ललोचनः ॥ १३ ॥ श्रीब्रह्मोवाच ॥ भगवन्निदमाख्यातं तंत्रजातंत्वयाखिलं ॥ १०
वेदाश्चसर्वेव्याख्याताः वदतत्राधिकारिणः ॥ १४ ॥ श्रीहयग्रीवउवाच ॥ सर्ववर्णाश्रमाचाराः सर्वेदेवाःप्रकीर्तिताः ॥ वेदेषुचाथ-
तंत्रेषु तेमुख्यात्वधिकारिणः ॥ १५ ॥ तेषुसर्वेष्वपिभवा न्मुख्यतःसर्वसारवित् ॥ अधिकारीमुख्यतमः सर्वेपितदनंतरं ॥ १६ ॥

10

या

एतेहिविष्णुंसर्वत्र सर्वशब्दाभिधंपरं ॥ वैदिकैस्तांत्रिकैर्मंत्रै र्यथायोग्यमुपासते ॥ १७ ॥ न्यायेनानेनयज्ञेषु सर्ववेदस्वरूपिणं ॥ त-
त्तन्मंत्रैश्चहविषा मामेवहिभजंतिते ॥ १८ ॥ इंद्रियेषुचसर्वेषु तेषामहमवस्थितः ॥ तदृषीकेशस्ततोहंवै ख्यातोवेदविदांमुखे॥१९॥
यथायोग्यतर्मान्येच यथाज्ञानंचतेखिलाः ॥ आराधयंतितेवैमां तंत्रैर्नानास्वरूपिणं ॥ २० ॥ गंधर्वाऋषयःसिद्धाः पिशाचागुंह्यका-
दयः ॥ ततोधमामनुष्यास्यु र्वेदतंत्राधिकारिणः ॥ २१ ॥ तत्रापिब्राह्मणाश्रेष्टाः क्षत्रियाश्चततोधमाः ॥ वैश्याश्चैवानुलोमाश्च के-
चिद्वेदाधिकारिणः ॥ २२ ॥ स्त्रीशूद्रप्रतिलोमाद्या तंत्रमात्राधिकारिणः ॥ नतेषांवैदिकेमार्गे प्रवेशोविहितोदितः ॥ २३ ॥ सात्विका-
राजसाश्चैव तामसाश्चतथापरे ॥ मनुष्येषुहिविद्यंते तत्रयेसात्विकानराः ॥ २४ ॥ ब्राह्मणाद्याश्चसर्वेपि संसाराद्यमुमुक्षुवः ॥ तेतु-
तंत्रंपंचरात्र माश्रेयेयुर्नचेतरत् ॥ २५ ॥ राजसामनुजायेतु विद्यैश्वर्यधनेप्सवः ॥ शाक्तगाणेशसौरादो नाश्रयेयुःस्तथागमान्॥२६॥
परदारपरद्रव्य परवश्यपरक्षयाः ॥ मारणोच्चाटनादीनि क्रूरकर्माणियानितु ॥ २८ ॥ सुरामांसोपहाराद्यैः श्मशाननिलयादिभिः ॥
साध्यानितानिरोचंते तामसास्तेनरामताः ॥ २८ ॥ तेहियामलवामादि कापालाद्यागमानपि ॥ आश्रयेर्युस्ततोभ्रष्टा स्तत्तद्देवा-
भिमानिनः ॥ २९ ॥ पापाचाराहिजायंते लभंतेहिफलानिते ॥ अंतेनिरयवासस्या त्तेषांपापात्मनांसदा ॥ ३० ॥ तत्रापिब्राह्मणा-
येस्युःसात्विकाविष्णुतत्पराः ॥ क्षत्रियाश्चतथावैश्याः पंचरात्रंहितन्मतं ॥ ३१ ॥ अन्येषामागमानांतु वक्तारोऽन्येभवत्यपि ॥ पां-

चरात्रस्यकृत्स्नस्य वक्ताहंस्वयमेवहि ॥ ३२ ॥ अतोहिसर्वशास्त्रेषु वरमेतन्निगद्यते ॥ मन्मुखादेवसंश्रुत्य नारदाद्यामहर्षयः ॥ ३३ ॥
लोकेप्रकाशयिष्यंति मद्भक्तेष्वेवनाऽन्यथा ॥ सनकाद्याश्चशृण्वंति नारदात्पांचरात्रकं ॥ ३४ ॥ भविष्यंतोपिमेभक्ताः करिष्यंत्ये--
वमेवहि ॥ प्रल्हादध्रुवबल्याद्या वशिष्टाद्यामहर्षयः ॥ ३५ ॥ स्वायंभुवाद्यामनवो त्वन्येतद्वंशजास्तथा ॥ महर्षयःस्तथापुण्याः
पुंण्याराजर्षयःपरे ॥ ३६ ॥ विभीषणाद्याःसर्वेपि ब्रह्मरुद्रादिदेवताः ॥ आराध्यपंचरात्रेण विधिनामांप्रपेदिरे ॥ ३७ ॥ उपनीता--
द्विजाःसर्वे वेदेष्वधिकृतामताः ॥ तंत्रेषुदीक्षिताएव प्रोच्यंतेत्वधिकारिणः ॥ ३८ ॥ दीक्षाहिद्विविधाप्रोक्ता बाह्याभ्यंतरभेदतः ॥
ज्ञानिनामुभयंतत्र बाह्योवाऽज्ञानिनांभवेत् ॥ ३९ ॥ अयंसर्वेष्टदातामे सर्वानिष्टनिवारकः ॥ सर्वोत्कृष्टोयमेवैक स्तदीयोहंसमे-
पतिः ॥ ४० ॥ इतिज्ञानंनिश्चितंय त्सादीक्षाभ्यंतरामता ॥ नामाचिन्हादिनादेहे वन्हिनावामृदांकनं ॥ ४१ ॥ सबाह्याप्रोच्यते--
दीक्षा ह्यज्ञानांज्ञानिनामपि ॥ शिशवःपशवोन्नानि पात्राण्याभरणानिच ॥ ४२ ॥ रथध्वजपताकादि सर्वमज्ञात्तमुच्यते ॥ एते--
षांहिमदीयत्व ज्ञापनायालिखेत्स्वयं ॥ ४३ ॥ विष्णुभक्तोविशेषेणब्राह्मणश्चविशेषतः ॥ अदीक्षितायांभार्यायां दीक्षतोजनयेत्सुतं ॥
॥४४॥ सहिजारजवत्प्रोक्तो दीक्षतश्चेद्विशुध्यति ॥ तस्कराश्चयथालोके कस्यचिन्नायतेतथा ॥ ४५ ॥ राजकीयान्तैःसाकं व्यवहा-
रंहिकुर्वते ॥ तथादीक्षाविहीनाये निर्नाथास्तस्कराइव ॥ ४६ ॥ यमदूतैर्नीयमाना न्नरकश्चिद्वारयेच्चतान् ॥ हन्यमानान्यथाचैरा

न्नहिकश्चिन्निवारयेत् ॥ ४७ ॥ पत्युश्चिन्हंयथानारी कंठसूत्रंबिभर्तिहि ॥ सनाथासुभगातेन पूतगात्राचजायते ॥ ४८ ॥ तेनैवही--
नाविधवा निंदितामंगलादिषु ॥ अन्यथाचापवित्रांगी दीक्षाहीनस्तथानरः ॥ ४९ ॥ दीक्षितोलभतेपूजां यमादपिबिभेतिन ॥ नृ--
पामात्यःकथंत्रस्ये दन्यस्मांनृपबाह्यतः ॥ ५० ॥ स्वस्ववर्णाश्रमाचार निरतःसत्यवाक्शुचिः ॥ सएवलभतेसर्व दीक्षाग्रहणजंफलं
॥ ५१ ॥ विष्णुदीक्षायुतोयोपि विष्णुभक्तिविवर्जितः ॥ दीक्षाफलंनतस्यास्ति दीक्षयानरकंव्रजेत् ॥ ५२ ॥ सर्वासामपिदीक्षाणां
विष्णुदीक्षाधिकामता ॥ यतःसर्वेश्वरोविष्णु र्देवानामपिदेवता ॥ ५३ ॥ यन्महिम्नःपरंपारं वेत्ताजातोनचास्तिन ॥ नभविष्यति-
कश्चापि कुतस्तस्यसमोधिकः ॥ ५४ ॥ यस्यस्याद्वैष्णवीदीक्षा सर्वैर्मान्यःसदीक्षितः ॥ अवजानातियस्तंतु सोवजानातिकेशवं ॥
॥ ५५ ॥ अंकितंशंखचक्राद्यै र्विष्णुदीक्षान्वितंनरं ॥ योनिंदतिविमूढात्मा सद्वेष्टाविष्णुमेवहि ॥ ५६ ॥ तप्तचक्रंभुजेयस्य विप्रादेर्य-
स्यकस्यवा ॥ विष्णोरेवहिसामूर्ति र्नावमन्येतकर्हिचित् ॥ ५७ ॥ नीचवर्णोपियोविष्णु दीक्षावान्सहिबंधुवत् ॥ विनाप्रणामंमान्य-
स रामकृष्णादिनामभिः ॥ ५८ ॥ उच्चवर्णोपियोविप्रो वदवेदांगपारगः ॥ सदाचाररतोपिस्या द्विष्णुदीक्षाविवर्जितः ॥ ५९ ॥
सचोरवद्बहिष्कार्य स्तस्मैदत्तंचनिष्फलं ॥ पात्रंहिपरमंप्रोक्तं हव्यकव्यादितःसदा ॥ ६० ॥ यस्यस्याद्वैष्णवीदीक्षा दत्तंभवतिचाक्ष-
यं ॥ तप्तचक्रांकितोयस्या त्सचांडालोवरोभवेत् ॥ ६१ ॥ किंपुनर्ब्राह्मणाःपुण्या सदाचाराविशेषतः ॥ नारीवापुरुषोवापि तप्तच-

क्रांकवर्जितः ॥ ६२ ॥ श्मशानकाष्ठवत्तस्य स्पर्शेस्नानंसमाचरेत् ॥ कंचुकंकंठसूत्रंच ललाटेचोर्ध्वपुंड्रकं ॥ ६३ ॥ तप्तचक्रंतथाशंखं य-
स्यागात्रेनविद्यते ॥ हव्यंकव्यंतयास्पृष्टं देवाश्वपितरोपिहि ॥ ६४ ॥ नैवगृण्हंतिकुपिताः शुनास्पृष्टंयथातथा ॥ पतिताअपिशुध्यंति
तप्तचक्रादिधारणात् ॥ ६५ ॥ स्वस्ववर्णाश्रमाचाराः किंपुनर्ब्राह्मणादयः ॥ दाताहिपरमांमित्रं यतोजीवयतेर्थिनः ॥ ६६ ॥ योहि-
विष्णुपरंद्वेष्टि तेनमैत्रींकरोतियः ॥ रिपुर्मित्रायतेतस्मै कथंविष्णुःप्रसीदति ॥ ६७ ॥ यःकुर्याद्वैष्णवंचिन्हं तप्तचक्रादिधारणा-
त् ॥ तदीयोस्मीतियोनित्यं भावयन्मनसापिहि ॥ ६८ ॥ तन्मंत्रजापकोयस्या त्तन्नाम्नांचापिकीर्तकः ॥ कथंसनभवेन्मूर्तिः सर्वदे-
वपतेर्हरेः ॥ ६९ ॥ कथंनस्याच्चसंतोषो विष्णोरपितदर्चनात् ॥ सर्वदेवात्मकस्यास्य विष्णोराराधनेकृते ॥ ७० ॥ सर्वदेवाःकथंन-
स्यु स्तुष्टास्तत्तोषतोषिणः ॥ तादृशस्यहरेर्मूर्ते रवज्ञानेकृतेखिलाः ॥ ७१ ॥ कथंदेवानरुष्येयु र्नारायणपरायणाः ॥ तस्मात्तुवैष्णवी-
दीक्षा निखिलैर्ब्राह्मणादिभिः ॥ ७२ ॥ मनसाकर्मणावाचा ग्रहणीयाप्रयत्नतः ॥ तथैवपूज्यतांयाति प्रियतांचहरेरपि ॥ ७३ ॥
प्राप्नोत्यपिचसर्वेष्ट मैहिकामुष्मिकंसदा ॥ क्रमेणमुक्तिमाप्नोति पुनर्नावर्तततततः ॥ ७४ ॥ आषाढकार्तिकेमाघे वैशाखमार्गशीर्षके ॥
पुष्टचंद्रेतिथौतत्र दशम्यादौविशेषतः ॥ ७५ ॥ बुधभार्गवजीवानां शनेरर्कस्यवासरदिने ॥ मृदुक्षिप्रध्रुवर्क्षेषु कुयोगैर्वर्जितशुभे ॥ ७६ ॥
गृण्हीयाद्वैष्णवींदीक्षां श्रवणेचविशेषतः ॥ शनिर्यदानुकूलःस्या त्तदादीक्षाफलाधिका ॥ ७७ ॥ गंगादिपुण्यतीर्थेषु चंद्रसूर्यग्रहेत-

12 था ॥ महागुरुसमाजेच कालंनैवप्रतीक्षयेत् ॥ ७८ ॥ तदानींयदिलभ्येत शुभकालस्तदाधिकं ॥ नामकर्मणिबालानां तथोपनयने-
पिच ॥ ७९ ॥ दीक्षाकालःसविज्ञेयः पितुःकुलगुरोरपि ॥ दीक्षांगृण्हीतयत्नेन विष्णुप्रीणनहेतवे ॥ ८० ॥ शिखायज्ञोपवीताभ्यां
यथाहीनोनकर्मसु ॥ अधिकारीतथानस्या त्तप्तचक्रादिवर्जितः ॥ ८१ ॥ गायत्र्यादिषुमंत्रेषु वेदस्याध्ययनादिषु ॥ अतप्तचक्रगात्रो-
पि नाधिकारीभवेद्ध्रुवं॥८२॥मंत्रगृहणकालेतु तप्तचक्रादिधारणं ॥ वैष्णवैःक्रियतेतद्धि मंत्रसौद्गुण्यकृद्भवेत्॥८३॥विनामंत्रग्रहंयत्तु ५।
तप्तचक्रादिधारणं॥पापानांनाशकंतस्यात्पुण्यानांचविवर्धकं॥८४॥विष्णुप्रीतिकरंभूय स्ततोपिप्रत्यहंलिखेत्। स्वस्ववर्णोक्तपुंड्रेषुत्द्दादि-
बाहूदरादिषु ॥८५॥ चक्रादीनियथास्थानं द्वारवत्यादिमृत्स्नया ॥ विधिनाग्निंप्रतिष्ठाप्य तिलाज्येनघृतेनवा ॥ ८६ ॥ सहस्त्रंव्यात्हृ-
तीर्हुत्वा वषट्तेविष्णुमंत्रतः ॥ अष्टोत्तरशतंहुत्वा प्रत्यकंचततःपरं ॥ ८७॥ होमशेषंसमाप्याग्नौ चक्रशंखौप्रतापयेत् ॥ अभिवादन-
तःपश्चा त्प्रपन्नंविष्णुतत्परं ॥ ८८ ॥ पितावापिगुरुर्वापि यःकोपिहिमहान्भवेत् ॥ सदहेद्दक्षिणेबाहौ चक्रंशंखंचवामतः ॥ ८९ ॥
स्तनयोरूर्ध्वतश्चापि स्वेच्छयाचतथोदरे ॥ एवंमुद्रापंचकंवा मुद्राद्वयमथापिवा ॥ ९० ॥ गृण्हीयात्तुप्रयत्नेन बाल्यदीक्षातुसाभवेत्॥
बालानामुदरेष्वेव बाव्हांरेवहियोषितां ॥९१॥ शूद्रादीनांतथैवस्या न्मुद्राद्वितयमेवहि ॥ शूद्रादियोषितादीनां नदहेत्धोमवन्हि-
ना ॥ ९२ ॥ द्विजानामेवहोमाग्नि तप्तचक्रादिधारणं ॥ द्विजानांयोषितोबालां श्चक्रशंखादिमुद्रया ॥ ९३ ॥ होमाग्निनापिदग्धव्याः

शूद्रादीन्नतथादहेत् ॥ मंत्रंवोपदिशेत्पश्चा त्तत्तद्योग्यतयागुरुः ॥९४॥ त्रिवारमुपदेशःस्या दंतेशिष्योन्नमेदपि ॥ प्रसन्नोभवताद्वि-
ष्णु स्तत्तन्मंत्राधिदेवता ॥ ९५ ॥ इत्याशिषंप्रयुज्याथ न्यसेत्तन्मस्तकेकरं ॥ परस्परंनिरीक्ष्याथ प्रीत्याशिष्यंविसर्जयेत् ॥ ९६ ॥
कृपयातत्प्रगृण्हीत वासुदेवेसमर्पयेत् ॥ इतिदीक्षाविधानंते कथिताश्चाधिकारिणः ॥ ब्रह्मन्पृष्टंत्वयायत्तु किमन्यच्छ्रोतुमिच्छसि ॥
॥ ९७ ॥ इतिश्री विष्णुरहस्ये दीक्षाधिकारकथनंनाम सप्तमोध्यायः ॥ ७ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीवेदव्यासायनमः ॥ ब्रह्मोवाच ॥ दीक्षाप्रदानेभगवन् केकेस्युरधिकारिणः ॥ गौणमुख्यप्रभेदेन वदतद्दययामम ॥ १ ॥ श्री-
हयग्रीवउवाच ॥ प्रतिलोमानुलोमानां वर्णानामपिसर्वशः ॥ ब्राह्मणोहिगुरुर्मुख्यो गौणाःपित्रादयस्मृताः ॥२॥ ब्रह्मचारीगृहस्थो-
वा वानप्रस्थोथवायतिः ॥ ब्राह्मणःसर्वजंतूनां गुरुर्मुख्यःप्रकीर्तितः ॥ ३ ॥ विप्राणांगुरवोविप्रा मिथोयेज्ञानिनोधिकाः ॥ तेषामपि-
विशेषेण वनस्थोवायतिर्भवेत् ॥ ४ ॥ गृहस्थेष्वपिपित्राद्या येवास्युर्वैष्णवोत्तमाः ॥ ज्ञानतोवाधिकायेस्युः कुलस्यगुरवोपिये ॥ ५ ॥ १३
पिताभ्रातातुयोज्येष्टः पितृव्योमातुलस्तथा॥तत्सुतःश्वशुरोपिस्या देषांपित्रादयोपिच ॥६॥ तत्रापिज्ञानवंतःस्यु र्दीक्षादानेधिकारि-
णः ॥ ब्रह्मचार्युपदेष्टारो गृहस्थादित्रयोपिच ॥ ७ ॥ वनस्थायतिनश्चापि नैष्ठिकब्रह्मचारिणः ॥ गुरवोगृहिणःस्युःस नत्वेतेषांगुरु-

भवेत् ॥ ८ ॥ यतीनांयतयःप्रोक्ता गुरवोन्येनहिक्वचित् ॥ नैष्ठिकव्रतिनःप्रोक्तो नैष्ठिकव्रतवान्गुरुः ॥ ९ ॥ वनीयतिर्वावनिनो वनी-
प्रव्राजकोगुरुः ॥ ब्राह्मणेषुविवेकोयं यतीनांवनवासिनां ॥ १० ॥ क्षत्रियाणांचवैश्यानां नैष्ठिकब्रह्मचारिणां ॥ गृहस्थानांतथान्येषां
ब्राह्मणोगुरुरेवहि ॥ ११ ॥ ब्रह्मचारीगृहस्थोवा वनस्थोवाथवायतिः ॥ सर्वाश्रमवतांक्षत्र वैश्यानामनुलोमिनां ॥ १२ ॥ मुख्योगु-
रुर्भवेद्विप्रः क्षत्रियादिषुयेधिकाः ॥ तेपिविप्राज्ञयातेषां दीक्षायांगुरवोमताः ॥ १३ ॥ शूद्रादिष्वपिसर्वेषु श्वपाकांतेष्वपिक्रमात् ॥
जातितोज्ञानतोयेस्यु रधिकास्तेपिसर्वशः ॥ १४ ॥ पित्रादयोथवापिस्युः पूर्वाभावेपरःपरः ॥ गुर्वाधिक्यवशात्प्रोक्तं दीक्षाग्रहणजं-
फलं ॥ १५ ॥ ब्राह्मणोत्रगुरुर्मुख्य स्तदन्येतुतदाज्ञया ॥ अन्यथानरकंयाति गृहीतारोपितादृशाः ॥ १६ ॥ स्थंडिलेग्निंप्रतिष्ठाप्य
वासुदेवादिनामभिः ॥ चतुर्भिश्चचतुर्थ्यंतै र्नमोंतैर्मंत्रयेच्चरुं ॥१७॥ चक्रादितत्रसंताप्य संस्कार्याहिद्विजेतराः ॥ अदत्वाविधिवन्मु-
द्रां योमंत्रंवैष्णवंवदेत् ॥ १८ ॥ सयातिनरकंघोरं शिष्येणापिसहैवतु ॥ पूर्वोक्तेनविधानेन दीक्षांगृण्हातिवैष्णवीं ॥ १९ ॥ सोचि-
रेणेवनिर्मुक्तो विष्णुलोकेमहीयते ॥ अकालेचाप्यदेशेच विधिमुल्लंघ्ययोनरः ॥ २० ॥ लोभाद्युपाधिनावापि यस्मात्कस्माच्चपूरु-
षात् ॥ स्वयंवापिदहेद्गात्रं चक्रशंखादिकैरपि ॥ २१ ॥ सोपिव्रजेतनिरयं साकंस्वगुरुणाचिरं ॥ तस्मात्तुविधिनाब्रह्म न्गृण्हीयात्सद्गु-
रोरपि ॥ २२ ॥ देशेकालेविशेषेण विष्णुभक्तिसमन्वितः ॥ विष्णुदीक्षाफलंकृत्स्नं सम्यक्सलभतेनरः ॥ २३ ॥ अन्यथानतथातस्य

॥ श्रीवेदव्यासायनमः ॥ ब्रह्मोवाच ॥ एषांहिप्रतिलोमानां दर्शनादेवजायते ॥ शौचभंगोद्विजातीनां तेषांमुद्रांकनंकथं ॥ १ ॥ क-
थंचोपदिशेयुस्तान् श्वपाकादीन्द्विजोत्तमाः ॥ कथंवाबिभृयुर्हस्तंतेषामुपरिमस्तके ॥ २ ॥ उपादिशेयुःकान्मंत्रान् तेषुजात्यधमेषु-
वै ॥ एतंमेसंशयंदेव छेत्तुमर्हस्यशेषतः ॥ ३ ॥ हयग्रीवउवाच ॥ यथानानारसालोके यथानानौषधीगणः ॥ सर्वव्याधिहराःप्रोक्ताः
प्रयुक्ताश्चचिकित्सकैः ॥ ४ ॥ दययारोगिसंघेषु भवंतिव्याधिघातकः ॥ तथासंसारदुःखेन संतापैस्त्रिविधैरपि ॥ ५ ॥ अनिशंपीड्य-
मानानां परमंदुःखमोचनं ॥ दीक्षायाग्रहणंविष्णो रेकमेवास्तिनान्यथा ॥ ६ ॥ नात्रवर्णानियम्यंते नाप्याश्रमनिवासिनः ॥ स-
र्वाश्रमैःसर्ववर्णैः सर्वाभिर्जातिभिस्तथा ॥ ७ ॥ विलोमैःप्रतिलोमैश्च तथाकुंडैश्चगोलकैः ॥ कर्तव्याविष्णुभक्तैश्च ग्राह्यादीक्षाहरे--
रपि ॥ ८ ॥ संसारेदुःखबहुले वियोगःप्रियवस्तुनः ॥ संयोगश्चाप्रियस्यैव जायतेसततंनृणां ॥ ९ ॥ तस्मादतोविरक्तस्या देकैकं- १४
चशनैःशनैः॥विसृजेद्विषयंधीमान् नित्यमुद्विग्नमानसः ॥१०॥ सत्यवादीजितक्रोधो दयावान्विजितेंद्रियः ॥ परदारपरद्रव्य परद्रो-
हपराङ्मुखः ॥११॥ तीर्थसेवापरोनित्यं नातितृष्णोतिशांतधीः ॥ न्यायाद्द्रव्यार्जकोयश्च पात्रेदानंकरोतियः ॥ १२ ॥ सतांसंतोषको-

14

यः स्या दसतांसंगवर्जितः ॥ आस्तिक्यबुद्धिःसततं पश्चात्तापोहिपातकात् ॥ १३ ॥ अद्वेष्टासर्वभूतानां शुश्रूषुरतिथिप्रियः ॥ प्रियव-
क्तासदाचारो विष्णुभक्तिसमन्वितः ॥ १४ ॥ विष्णुदीक्षाधिकारीस्या द्योवाकोवाभवेत्वसौ ॥ पूर्वोक्तगुणवान्विप्रो गुरुर्मुख्योनिगद्य-
ते ॥ १५ ॥ एवंयोविद्यतेकश्चि त्प्रपन्नोदीक्षणेहरेः ॥ सोनुग्राह्योभवेदेव नैवत्याज्यःकथंचन ॥ १६ ॥ दर्शनस्पर्शनप्रश्नैः श्वपाका-
द्दीनपिध्रुवं ॥ रोगिणोहिचिकित्संते दयावंतश्चिकित्सकाः ॥ १७ ॥नैवंतांस्तेजुगुप्संते शौचहानेर्नबिभ्यति ॥ दययाक्लिन्नमनसो रो-
गंतेषान्नुदंतिहि ॥ १८ ॥ पुनःशौचंप्रकुर्वंति पुनःस्नानंप्रकुर्वते ॥ नैवोद्विजंतितेभ्यस्ते रोगिभ्यःसुचिकित्सकाः ॥१९॥ तथादयाल--
वःशांता विष्णुभक्तिपरायणाः ॥ पतितादीन्श्वपाकांता न्ननुगृण्हंतिदीक्षणः ॥ २० ॥ अनुगृण्हातिदृष्ट्वैव तत्तज्जात्यधिकानपि ॥
आज्ञाप्यतत्तज्जातीयं दीक्षयंत्यथवाहिते ॥ २१ ॥ तस्मात्सर्वप्रयत्नेन प्रतिपन्नंतुवैष्णवं ॥ यथातथानुगृण्हीत नसत्याज्योहरि-
प्रियैः ॥ २२ ॥ मंत्रानानाविधाःसंति सोंकाराश्चनिरोंकृताः ॥ सबीजाश्चापिनिर्बीजा नानाधिकृतभेदतः ॥ २३ ॥ तत्तंन्नामचतुर्थ्य-
तं नमोंतंप्रणवादिकं ॥ इतिसामान्यतोमंत्र स्तत्तद्देवस्यकीर्तितः ॥ २४ ॥ न्नमःशब्दोथवापूर्वो नाम्नास्वाहांततोपिवा ॥(संबुध्यंता)
(नमःस्वाहा वर्जिताश्चापिकेचन) ॥ २५ ॥ श्रोंकारपूर्वकाःकेचि न्मालामंत्रास्तथापरे ॥ तत्तद्देवस्तुतिपराः नानासिद्धिप्रदाश्चते॥
॥ २६ ॥ नानाधिकारिणस्तेषु विस्ताराद्धच्मितछृणु ॥ सोंकारास्तेषुयेमंत्रा द्विजास्तत्राधिकारिणः ॥ २७ ॥ तत्राप्यष्टौमहामंत्राः

महाविष्णोर्महाप्रियाः ॥ सदाचारैर्द्विजैरेव जपितव्यातिशौचिभिः ॥ २८ ॥ प्रणवोमातृकाष्टार्णो व्याहृतिर्द्वादशाक्षरः ॥ गाय-
त्रीपुरुषोविष्णु महामंत्राष्टकंस्मृतं ॥ २९ ॥ तत्रापिप्रणवोमंत्रो यतीनामेवकीर्तितः ॥ अन्याश्रमाहितंजप्त्वा भवंतिप्रत्यवायिनः
॥ ३० ॥ मातृकादिषुमंत्रेषु गृहस्थाश्चाधिकारिणः ॥ नरसिंहहयग्रीव हंसवाराहभार्गवाः ॥ ३१ ॥ कपिलव्यासदत्ताद्या द्विजाना-
मेवकीर्तिताः ॥ स्वस्ववर्णाश्रमाचारै दुराचारविवर्जितैः ॥ ३२ ॥ एतेमंत्राउपास्यास्यु रन्यथानफलप्रदाः ॥ परदारपरद्रव्य दुष्प्रति-
ग्रहवर्जितः ॥ एतेमंत्रा० ॥ ३३ ॥ अग्निहोत्ररतायेत्र वेदाध्यायरताश्चये ॥ एतेमंत्रा० ॥ ३४ ॥ हिंसायांविमुखायेतु जितश्वासा--
जितेंद्रियाः ॥ एतेमंत्रा० ॥ ३५ ॥ स्वस्थचित्तैर्ध्यानपरैः निक्रोधैरतिथिप्रियैः ॥ एतेमंत्रा० ॥ ३५ ॥ विष्णुभक्तिर्दृढायेषां दानेचि-
त्तंसदैवतु ॥ एतेमंत्रा० ॥ ३७ ॥ ईश्वरार्पितसर्वस्वाःन्यायागतधनाश्चये ॥ एतेमंत्रा० ॥ ३८ ॥ तत्रापिचहयग्रीव नारसिंव्हवराह-
काः ॥ भार्गवश्चदुराचारै नैवसेव्याःकथंचन ॥ ३९ ॥ एतन्मंत्रोपासकाये यदिस्युःपरदारिणः ॥ परद्रव्यहरावापि वृथाहिंसापराथ-
वा ॥ ४० ॥ मद्यमांससुरादीनां यदिस्युःसेविनोथवा ॥ मंत्रक्षोभोभवेत्तेषां तत्कालेस्युःपिशाचकाः ॥ ४१ ॥ अन्यवैष्णवमंत्रास्तु १५
कालेनैवापकारकाः ॥ विलंबेनापकारोपि जायतेनात्रसंशयः ॥ ४२ ॥ एवंसंकर्षणोमंत्र स्त्रिविक्रमजनार्दनैः ॥ नारसिंव्हादिवज्ज्ञे-
या उपास्यानियतव्रतैः ॥ ४३ ॥ रामगोपालकृष्णाद्या हरिदामोदराच्युताः ॥ मत्स्यवामनकूर्माद्याः सर्वेस्युःसौम्यमूर्तयः ॥ ४४ ॥

नकुर्य्यंतिदुराचारैः सदाचारैःफलाधिकाः ॥ द्विजैरेतेतुसोंकारा उपास्याविष्णुवल्लभाः ॥ ४५ ॥ तत्तध्यानानुसारेण तत्तद्वीजानुसा-
रतः ॥ तत्तद्भक्तेष्टदातारो भवत्येवनसंशयः ॥ ४६ ॥ एतएवनिरोंकाराः सबीजाःशुचिभिःसदा ॥ द्विजस्त्रीभिरुपास्यास्युः नान्यै-
रेवकथंचन ॥ ४७ ॥ पतितायेद्विजातीनां प्रायश्चित्तविवर्जिताः ॥ पश्चात्तापेनसंतप्ता वैदिकात्कर्मणोगताः ॥४८॥ मद्यमांससुराभ-
क्षै रुज्झिताधर्मबुद्धयः ॥ पापकर्मभिरप्यन्ये परदारधनादितः ॥ ४९ ॥ निवृत्तास्तेपिसंस्कार्या द्विजस्त्रीवद्दयालुभिः ॥ तप्तचक्रां-
कनंतद्व तद्वन्मंत्रोपदेशनं ॥ ५० ॥ तथाकृतेक्रमेणैव पापमुक्ताभवंतिते ॥ अनुलोमेषुयेकेचित् त्रयीविद्याधिकारिणः ॥ ५१ ॥ ते-
पिद्विजातिवज्ज्ञेया ॥ तेषांदीक्षादिकंतथा ॥ सच्छूद्राअपियेकेचित् सत्ताद्याःप्रतिलोमिनः ॥ ५२ ॥ द्विजस्त्रीवत्संस्कार्या स्तथामंत्रो-
पदेशनं ॥ ब्राह्मणाः क्षत्रियावैश्या स्त्रयोवर्णाद्विजातयः ॥५३॥ तैरादौवैदिकंकर्म संध्याहोमजपादिकं ॥ कृत्वैवतांत्रिकीपूजा तंत्र-
मंत्रजपादिकं ॥ ५४ ॥ कर्तव्यंनान्यथाकुर्या त्कृतंचेन्निष्फलंभवेत् ॥ विनोपनयनंयद्व न्नाधिकारीश्रुतिश्रुतौ ॥ ५५ ॥ तथावि-
नानित्यकर्म नाधिकारितुतांत्रिके ॥ वैदिकानाधिकारायेस्त्रीशूद्रपतितादयः ॥ ५६ ॥ तेषांतांत्रिकमेवस्या त्पूजामंत्रजपादिकं ॥ नि-
रोंकाराश्चनिर्बीजा नमःपूर्वानमोंतकाः ॥५७॥ श्रीशब्दपूर्वकावापि संबुध्यंताश्चयेस्मृताः ॥ सौम्यरूपाश्चरामाद्या मनवस्तेयथारु-
चि ॥ ५८ ॥ शूद्रादिश्वपचांतेभ्य उपदेश्याविशुद्धये ॥ तत्रापियेविशिष्टास्युः नियमव्रतचारिणः ॥ ५९ ॥ तेषांसामान्यतोबीज

युक्तान्मंत्रानुपादिशेत् ॥ यस्तुनामादिमोवर्णः सोनुस्वारसमन्वितः ॥ ६० ॥ भवेत्सामान्यतोबीजं नाममंत्रेषुसर्वशः ॥ इतिमंत्र-
विवेकस्ते तथातदधिकारिणः ॥ ६१ ॥ विस्तरेणमयाप्रोक्ताः शेषंविध्धितदागमात् ॥ ॥ इतिश्री विष्णुरहस्ये मंत्राधिकारिविवे-
कोन्नाम नवमोध्यायः ॥ ९ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीवेदव्यासायनमः ॥ ब्रह्मोवाच ॥ कस्यांमूर्तौप्रकर्तव्यं पूजनंतववैष्णवैः ॥ कथंचैतत्प्रकर्तव्यं भगवंस्तद्वदस्वमे ॥ १ ॥ श्रीहय-
ग्रीवउवाच ॥ चलाचलविभेदेन प्रतिमाद्वितयंमम ॥ चलातुवैष्णवोविप्रो द्विविधात्वचलामता ॥ २ ॥ सहजाहितभेदेन सहजात्रि-
विधास्मृता ॥ तीर्थक्षेत्रशिलाभेदा ज्जलंतीर्थमितिस्मृतं ॥ ३ ॥ भूभागःक्षेत्रमित्युक्तं सालग्रामादिकाशिला ॥ प्रयागकाशीबदरी
कुरुक्षेत्रादिकानिच ॥ ४ ॥ भूखंडानिपवित्राणि क्षेत्राणिममंमूर्तयः ॥ गंगापुष्करकृष्णाद्या ममस्युस्तीर्थमूर्तयः ॥ ५ ॥ शालग्राम-
शिलायांतु पूजनंसर्वसंमतं ॥ तस्याःसहजमूर्तिर्वा श्वपाकस्पर्शनादिना ॥ ६ ॥ सांनिध्यंममनापैति सर्वदाममसन्निधिः॥ नात्रप्र-
तिष्ठापेक्षास्ति पूजयेत्तांदिनेदिने ॥ ७ ॥ ब्राह्मणाद्याश्वपाकांता स्तत्पूजाधिकृतामता ॥ नात्रजातिविवेकोस्ति तथैवैकादशीव्रते॥८॥
कीर्तनेविष्णुनाम्नांच दयादानक्षमादिषु ॥ देवताऋषिनामानि नाशुचिःपरिकीर्तयेत् ॥ ९ ॥ ममदिव्यानिनामानि सर्वदापरिकी-

जाति विवेको नास्ति

र्तयेत् ॥ उपचारैःषोडशभि स्तत्तन्मंत्रसमर्पितैः ॥ १० ॥ अर्चयेत्प्रतिमांविष्णोः त्रिकालंनित्यमादृतः ॥ सौवर्णीराजतींताम्रीं यां-
कांचिद्वाशिलामयीं ॥ ११ ॥ स्वस्वध्यानानुसारेण निर्मिताप्रतिमाहिता ॥ तत्रप्राणप्रतिष्ठानं मंत्रैर्वैदिकतांत्रिकैः ॥१२॥ कुर्वंतिवि-
धिनापश्चा त्पूजयेत्तांदिनेदिने ॥ द्विजैरेवाहिपूज्यासा नस्त्रीभिर्नापिपादजैः ॥ १३ ॥ येतुवेदेष्वधिकृता स्तैस्तैरेवाभिपूज्यते ॥ शूद्रसं-
स्पर्शनात्सद्यः संनिधानंविनश्यति ॥ १४ ॥ चांडालपतितोदक्या सूतिकादिनिरीक्षणैः ॥ पूजाभावाद्दशाहंच सन्निधानंविनश्यति
॥ १५ ॥ परदाररतस्पर्शा त्परद्रव्यापहारिणः ॥ कुयोनिगामिनस्पर्शा त्सन्निधानंविनश्यति ॥ १६ ॥ नीलकार्पासवस्त्रस्य तथाम-
लिनवाससः ॥ स्पर्शाच्चदीपतैलस्य सन्निधानंविनश्यति ॥ १७ ॥ यस्याद्रजस्वलागंता मद्यपोव्यर्थमांसभुक् ॥ महापातकसंसर्गी
वृथाहिंसापरायणः ॥ १८ ॥ वेदाध्ययनहीनश्च नास्तिकोवेदनिंदकः ॥ (द्रोहीचदेवताविप्र) तीर्थक्षेत्रादिकस्ययः ॥ १९ ॥ कन्यायादू-
षकोयश्च मातापित्रोश्चनिंदकः ॥ तस्यस्पर्शनमात्रेण सन्निधानंविनश्यति ॥ २० ॥ ब्राह्मणाःक्षत्रियावैश्या येन्येवेदाधिकारिणः ॥
तेचदोद्दशकर्माणो नयोग्याःप्रतिमार्चने ॥ २१ ॥ प्रसक्तिरेवनास्त्यत्र वेदेष्वनधिकारिणां ॥ लक्षणैःपांचरात्रोक्तैः निर्मितावयवा-
हिया ॥ २२ ॥ प्रतिष्ठितापितैर्मंत्रै र्वेदमंत्रैर्यथाविधि ॥ पूजनीयाद्विजैरेव मंत्रैर्वैदिकतांत्रिकैः ॥ २३ ॥ त्रिसंध्यादीक्षितोनित्यं तत्त-
न्मंत्रस्यजापकः ॥ यदिदीक्षाविहीनस्तां स्पृशेत्धातुमयींतनुं ॥ २४ ॥ नैवसिध्धिमवाप्नोति प्रत्यवायोभवेदपि ॥ लोहसीसकरंगा-

वि० र० १७

णां मूर्तिर्नैवारकूटकी ॥ २५ ॥ कर्तव्यासित्थिदानैव पूजकानांभवेत्विसा ॥ पूजाविधानविस्तारो विज्ञेयःपांचरात्रतः ॥ २६ ॥ गृहीत्वावैष्णवींदीक्षां नास्तिक्यार्थैस्त्यजेदिमां ॥ गुरुमंत्रपरित्यागी रौरवंनरकंव्रजेत् ॥ २७ ॥ एवंचवैष्णवींदीक्षां पंचरात्रोक्तमार्गतः ॥ गृहीत्वाकुरुतेनित्यं स्वकर्माणिनरःशुचिः ॥ २८ ॥ पूर्वोक्तगुणवान्कोपि जपेन्मंत्रंचनित्यशः ॥ पूजयेत्प्रतिमांचापि ममनित्यंयतव्रतः ॥ २९ ॥ मत्कथाश्रवणेसक्तो मद्भक्तैःसंगवान्सदा ॥ मत्समर्पितसर्वस्वो नचिरान्मुक्तिमाप्नुयात् ॥ ३० ॥ तस्मात्सर्वप्रयत्नेन ममप्रीतिमभीप्सुभिः ॥ पूर्वोक्तेनविधानेन पंचरात्रोक्तमार्गतः ॥ ३१ ॥ ग्राह्याहिवैष्णवीदीक्षा तथामंत्रजपादिकं ॥ यथाधिकारंकर्तव्यं देहबंधान्मुमुक्षुभिः ॥ ३२ ॥ येर्चयंतिमहाविष्णुं मनोवाक्कायकर्मभिः ॥ तेषांहिवचनंग्राह्यं तेहिविष्णुसमामताः ॥ ३३ ॥ इतिदीक्षादिसंकल्पं मयोक्तंश्रृणुयान्नरः ॥ पठेद्वाश्रावयेद्वापि ज्ञानयज्ञफलंलभेत् ॥ इतितेकथितंब्रह्म न्किमन्यच्छ्रोतुमिच्छसि ॥ ३४ ॥ इतिश्री विष्णुरहस्ये प्रतिमापूजाविवेककथनंनाम दशमोध्यायः ॥ १० ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

अ० ११

॥ श्रीवेदव्यासायनम ॥ ब्रह्मोवाच ॥ सृष्टिवैचित्र्यहेतुर्य ज्जीवानांयदनादितः ॥ कर्मतस्यकथंभेदा विस्तरात्तद्वदस्वमे ॥ १ ॥ श्रीहयग्रीवउवाच ॥ येनबद्धोनरोमुक्तिं नव्रजत्येषसंसृतौ ॥ स्वर्गेवानरकेवापि भ्रमत्येवानिशंयतः ॥ २ ॥ यस्यक्षयेणजीवस्य

मुक्तिर्भवतिदेहतः ॥ तात्विकमैतिविज्ञेयं पुण्यंपापमितिद्विधा ॥ ३ ॥ सुखमेवहिपुण्यस्य दुःखंपापस्यवैफलं ॥ साक्षादिष्टंसुखंप्रो-
क्त मनिष्टंदुःखमुच्यते ॥ ४ ॥ श्रुतिस्मृतिपुराणाद्यै रन्यैश्चापिसदागमैः ॥ कर्तव्यमितियत्प्रोक्तं तत्कृत्वापुण्यमश्नुते ॥ ५ ॥ यदेव-
रागतःप्राप्तं निद्राभक्षणमैथुनं ॥ अनिषिद्धंचयत्किंचि त्तत्यागादपिपुण्यभाक् ॥ ६ ॥ यच्चश्रुत्यादिभिर्नैव कर्तव्यमितिकीर्तितं ॥
यत्कृत्वाजायतेपापं यत्तःकर्तव्यमीरितं ॥ ७ ॥ सर्वथैवाकृतेस्तस्य नित्यनैमित्तिकस्यच ॥ जायतेचतथापापं द्वयमेवत्रिधामतं ॥
॥ ८ ॥ मानसंवाचिकंचैव कायिकंचेतिभेदतः ॥ अहंताममताद्रोह लोभनास्तिक्यमत्सराः ॥ ९ ॥ ईर्षादुर्मैथुनेच्छाच शठत्वंवं-
चनंतथा ॥ इत्यादिमानसंपाप महंतादिविवर्जनं ॥ १० ॥ आस्तिक्यंदुर्विषयत्यागो मयिभक्तिरचंचला ॥ ध्यानंक्षमाचमननं मा-
नसंपुण्यमुच्यते ॥ ११ ॥ शास्त्रप्रवचनवेद पंचकाध्ययनंजपः ॥ सत्योक्तिश्चप्रियोक्तिश्च मौनंपुण्यंतुवाचिकं ॥ १२ ॥ स्वाध्याय-
स्यपरित्यागः तथाप्रवचनस्यच ॥ दुर्वार्तापिशुनोक्तिश्च निष्ठुरंचानृतंतथा ॥ १३ ॥ वाचिकंपापमेतत्स्या(त्सत्यंभूतहितंस्मृतं)॥ येन-
सत्येनजायेत सज्जनानांनिरागसां ॥ १४ ॥ अहितंतन्नसत्यंस्या त्पापंवाचिकमेवतत् ॥ येनानृतेनजायेत परेषामुपकारिता ॥
॥ १५ ॥ अनृतंनैवतत्प्रोक्तं पुण्यंवाचिकमेवतत् ॥ येनकेनापिपापेन स्यात्सतामुपकारिता ॥ १६ ॥ निरागसांवाजायेत तत्पापंपु
ण्यसाधनं ॥ स्वाधीनःस्वानुरक्तोवा भक्त्यापृच्छेच्चयोहितं ॥ १७ ॥ ब्रूयाद्देवहितंतस्मै यद्यपिस्यात्तदप्रियं ॥ नित्यंनैमित्तिकंकाम्यं

वि० र० १८ स्नानंशौचादिकंतुयत् ॥१८॥ क्रियतेकायिकंतत्स्यात् पुण्यंपापमथाब्रुवे ॥ नित्यंनैमित्तिकंकर्म सर्वथानक्रियेतचेत् ॥ १९ ॥ काय- अ० ११ 18
साध्यनिषिद्धस्य कृतिःकायिकपातकं ॥ देवगोगुरुविप्राणां मन्येषामपिवासतां ॥ २० ॥ कायक्लेशेनयावृत्तिः तत्पुण्यंकायिकंस्मृतं
॥ निर्बीजंराजसंप्रोक्तं पुण्यबीजंतुसात्विकं ॥ २१ ॥ पापबीजंतामसंस्या न्निर्बीजंभोगतोगतं ॥ देशकालाद्यनुगुणान् न्यायार्जितधने-
नयत् ॥ २२ ॥ विधिवच्छ्रद्धयायुक्तं क्रियतेनिरुपाधिकं ॥ तत्पुण्यंसात्विकंप्रोक्तं तत्फलंगतिरुत्तमा ॥ २३ ॥ तदाधिक्यवशादेव
स्वर्गलोकाधिवासता ॥ जायतेचततःक्षीणे पुंण्येसंजायतेभुवि ॥ २४ ॥ पुण्यशेषेणतेनैव सत्कुलेजायतेजनिः ॥ धनवान्पुत्रवान्द
क्षः सुंदरःसुंदरीप्रियः ॥ २५ ॥ दाताभोक्ताकर्मनिष्ठः परोपकरणेरतः ॥ फलेनानेनपुण्यस्य पुनःपुंण्यंविवर्धते ॥ २६ ॥ पुनःस्वर्ग-
पुनःसंप देवंजन्मनिजन्मनि ॥ यदिमय्यर्पितंपुण्यं तर्हिस्यात्ज्ञानसाधकं ॥ २७ ॥ ज्ञानेनजायतेमोक्षः क्रमेणैवविनिश्चयात् ॥
यद्यन्यदेवताभक्तः पुंण्यमेवकरोतिचेत् ॥ २८ ॥ पुनःपुनःसभवति स्वर्गेवापृथिवीतले ॥ नैवमोक्षमवाप्नोति यावत्कामोनपूर्यते
॥ २९ ॥ सकामोपिहिमद्भक्तो लभतेकर्मणःफलं ॥ अंतेनिष्कामतांप्राप्य क्रमान्मुक्तिमवाप्नुयात् ॥ ३० ॥ येनपुण्यफलेनस्या दे १८
वंपुण्यस्यवर्धनं ॥ तत्सात्विकमितिप्रोक्तं येनपुण्यफलेनच ॥ ३१ ॥ जायतेपापवृद्धिश्च तत्तामसमितीरितं ॥ ईर्ष्यासूयालोभदंभ
भययुक्तेनचेतसा ॥ ३२ ॥ विधिवत्क्रियतेकर्म तत्फलात्पापवर्धनं ॥ वेश्यादिगमनंयद्व दुष्टसंगात्धनागमः ॥ ३३ ॥ चौर्यादिना

पुण्यकर्मापि

18

धनावाप्तिः दुष्प्रतिग्रहतस्तथा ॥ ईदृशानीहपुंण्यस्य फलानिपापवृत्धये ॥ ३४ ॥ यानिप्रसंगाज्जायंते नभक्त्यानभयादिना ॥
पुंण्यानितानिवित्धित्वं राजसानिविनिश्चयात् ॥ ३५ ॥ यथास्वपत्नीभोगादि त्व्यनिषित्धस्ववांच्छया ॥ लब्धस्यभक्षणंयद्व न्याय-
प्राप्तधनादितः ॥ ३६ ॥ यथाकालंगजाश्वादि भोगोयोजायतेनृणां ॥ पुण्यस्यवाथपापस्य येनोत्पत्तिर्नजायते ॥ ३७ ॥ भोगेनक्षी-
णतांयाति यत्फलंराजसंहितत् ॥ एवमेवहिपापानि बुत्धिपूर्वकृतानिच ॥ ३८ ॥ नास्तिक्यद्वेषभूरीणि तामसानिप्रकीर्तितं ॥
पापानामेववृत्धिस्या त्तत्फलैश्चपुनःपुनः ॥ ३९ ॥ आदौपापेननरकान् चिरंनानाविधान्भजेत् ॥ पापशेषेणतेनैव दारिद्र्यादि-
गुणान्वितः ॥ ४० ॥ जायतेचततोपिस्या च्चौर्यादिनाधनार्जकः ॥ प्राणिहिंसापरोवापि नित्यंधावन्श्रमान्वितः ॥ ४१ ॥
एवंपापफलंदुःखं भुंजानःपापकर्मकृत् ॥ पुनःपुनश्चनिरयां स्तिर्यग्योनींस्तथाव्रजन् ॥ ४२ ॥ पुनःपापंपुनर्दुःख मास्तेत्व्यनुभ-
वन्सदा ॥ तत्रापियदिमद्वेष स्तदायातितमोधिकं ॥ ४३ ॥ मध्येकदाचित्पुण्यानि कृत्वातत्फलमश्नुते ॥ पुनःसपापबुत्धित्वा
त्पुण्यंतामसमार्जयेत् ॥ ४४ ॥ तत्फलादपिपापानि तत्फलंदुःखमश्नुते ॥ एवंपापस्यबीजत्वा त्फलंपापस्यतामसं ॥ ४५ ॥ य-
त्तुदुष्टभयेनैव नलोभान्नापिमत्सरात् ॥ पश्चात्तापयुतेनैव नरकस्यभयावहं ॥ ४६ ॥ आवश्यकत्वादापत्तौ यत्कुर्यात्कर्मपापकं ॥
तत्फलाज्जायतेपुंण्यं येनस्याद्बहुलंसुखं ॥ ४७ ॥ यात्रासुपुण्यक्षेत्राणां तथास्नानादिकर्मसु ॥ चोरव्याघ्रहिमोष्णादे र्यद्दुःखंप्रा-

प्यतेहितत् ॥ ४८ ॥ महापुण्यस्यजनकं तत्पापंसात्विकंतथा ॥ प्रमादाज्जायतेयत्तु यदज्ञानाच्चजायते ॥ ४९ ॥ तत्पापंराजसंप्रो-
क्तं भोगादेवक्षयंभवेत् ॥ नपुण्यंनाथवापापं जनयेत्तत्फलंपुनः ॥ ५० ॥ गर्तादौपतनंयद्व द्‌घातःकाष्टशिलादितः ॥ सात्विकादिषु-
पुंण्येषु तथापापेष्वपिस्फुटं ॥ ५१ ॥ भेदत्रयंतुप्रत्येकं नानाभेदेष्वपिस्मह ॥ पूर्णांगान्युत्तमान्याहुः सात्विकानीतिचोच्यते ॥
॥ ५२ ॥ किंचिदंगैर्विहीनानि मध्यमानीतिकीर्तितं ॥ तान्येवराजसान्याहुः सर्वैरंगैर्विवर्जितं ॥ ५३ ॥ प्रधानमात्रंयत्कर्म ताम-
संचाधमंचतत् ॥ तामसेराजसेपापे व्युत्क्रमात्सात्विकादयः ॥ ५४ ॥ भेदाऊत्द्याश्चसर्वेषु पुण्येष्वपिचपाप्मसु ॥ तत्तद्देशविशेषे-
ण तत्तत्कालविशेषतः ॥ ५५ ॥ अन्येषांकारणानांच विशेषस्तुसहस्रशः ॥ लक्षशःकोटिशश्चापि गणशोनंतशस्तथा ॥ ५६ ॥
कर्मभेदाःप्रजायंते तान्यहंवेद्मिसर्वशः ॥ वक्तुंशक्यानिनैवस्यु स्तानिवर्षशतैरपि ॥ ५७ ॥ मत्प्रसादाद्विजानाति यमोराजाखिला-
नितु ॥ त्वमप्येवंप्रसादान्मे सर्वज्ञोह्यसिमाचिरं ॥ ५८ ॥ मानसादित्रिधाभिन्नं प्रत्येकंतत्रिधैवतु ॥ सात्विकादिप्रभेदेन तथाचन-
वधास्मृतं ॥ ५९ ॥ तत्रापिसात्विकाद्यैस्तु प्रत्येकंभिन्नमागतं ॥ सप्तविंशतिधाचैव प्रत्येकंपुण्यपाप्मनां ॥ ६० ॥ तेषामेवावांत-
रास्युर्भेदाश्चैवमनंतशः ॥ तत्रापिपुण्यभेदेषु त्रैविध्यंस्यात्प्रतिप्रति ॥ ६१ ॥ विष्णवर्पितत्वंतस्माद्य दन्यस्मिन्दैवतेर्पितं ॥ अन-
र्पितंचकुत्रापि तदेवंत्रिविधंभवेत् ॥ ६२ ॥ विष्णवर्पितंवरंप्रोक्तं तदन्यत्रतुमध्यमं ॥ अनर्पितंकनिष्ठंस्या द्यथाकर्मतथाफलं ॥ ६३ ॥

१४ पूर्णं सर्वे च १९

19

पापेष्वपितुप्रत्येकं त्रैविध्यंसकलेष्वपि ॥ मयेदंयत्कृतंपापं तन्नैवशुभदंमम ॥ ६४ ॥ स्वामिन्विष्णोक्षमस्वैत न्नैवकुर्यामिदंपुनः ॥
इतिभावेनयस्त्यागः पापकर्मणिजायते ॥ ६५ ॥ पश्चात्तापोह्ययंप्रोक्तः पापंस्वल्पफलंततः ॥ कृत्वापापंपुनस्तत्र सक्तोयत्कुरुतेपुनः
॥ ६६ ॥ किंभविष्यत्यनेनेति सोत्साहोपिपुनःपुनः ॥ पापोत्साहःसविज्ञेयो वृद्धिःपापफलेततः ॥ ६७ ॥ पश्चात्तापेनयत्तप्तं तत्पापं-
सात्विकंभवेत् ॥ उत्साहेनयुतंयत्तु तत्तामसमितीरितं ॥ ६८ ॥ उभाभ्यांचविहीनंय त्तद्राजसमुदाहृतं ॥ एवंहिकर्मणांभेदाः गण-
शोनंतशस्तथा ॥ ६९ ॥ प्रवाहतोनादिभिस्तै रेवंबद्धाह्यनंतशः ॥ गणतोनंतशोजीवा स्तत्तत्कर्मफलाशिनः ॥ ७० ॥ अतःप्रत्येक-
वैचित्र्यं सर्वजीवेषुविद्यते ॥ पूर्वोक्तान्यखिलान्येव जीवकर्माण्यनंतशः ॥ ७१ ॥ नानाविशेषभिन्नानि त्रिविधानिपुनःशृणु ॥ प्रा-
रब्धंसंचितंचैव क्रियमाणमितित्रिधा ॥ ७२ ॥ क्रियतेक्रियमाणंत त्संचितंतच्चकालतः ॥ फलोन्मुखंतुप्रारब्धंत्रैविध्यमितिकर्मणः
॥ ७३ ॥ जन्मांतरेफलावाप्तिः प्रायशःकर्मणांभवेत् ॥ संचितंसहकारीस्यात् क्रियमाणस्यकर्मणः ॥ ७४ ॥ तदैवतर्हिलभते क्रिय-
माणफलंनरः ॥ यथाचोरादिकस्यात्र शूलारोपादिदृश्यते ॥ ७५ ॥ इतिसंक्षेपतःसर्वे कर्मभेदाह्यनंतशः ॥ वैचित्र्येसर्वसृष्टीनां हे-
तवोमीप्रकीर्तिताः ॥ ७६ ॥ जडानांसृष्टिवैचित्र्यं जीवभोगायकेवलं ॥ जीवकर्मैवतत्रस्या द्वैचित्र्येकारणंतथा ॥ ७७ ॥ यएवंकर्म-
णोभेदान् शृणोतिश्रावयेच्चयः ॥ तस्यक्रमेणजायेत कर्मणामपिसंक्षयः ॥ ७८ ॥ इदंतवहिसृष्ट्यर्थं जीवानांकथितंमया ॥ जडा-

नांचापिसर्वेषां ज्ञात्वैवंसृजसर्वशः ॥ ७९ ॥ अहंहिसर्वदातस्मिन् ब्रह्मन्संनिहितःसदा ॥ स्मरिष्यतितदात्मानं दर्शयाम्यपिनान्य-
था ॥ ८० ॥ श्राव्यंश्रुतंत्वयाप्रायः स्वस्थचित्तोभवाधुना ॥ मद्भक्तौनिरतोनित्यं ब्रह्मन्सर्वमिदंसृज ॥ ८१ ॥ इतिश्री विष्णुरहस्ये
कर्मभेदकथनंनाम एकादशोध्यायः ॥ ११ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीवेदव्यासायनमः ॥ ब्रह्मोवाच ॥ सृजेयंकथमेतानि जीववृंदान्यनेकशः ॥ एतद्विस्तरतोब्रूहि कृपयाभूतभावन ॥ १ ॥ श्री-
हयग्रीवउवाच ॥ सर्वेषांबीजभूतायै स्थावराजंगमास्तथा ॥ सर्वान्सृष्ट्वैवसूक्ष्मांस्तान् निदधेत्वच्छरीरके ॥ २ ॥ अन्येप्यनंतसं-
ख्याकान् देहमात्राश्चसर्वशः ॥ त्वय्येवनिहिताब्रह्मन् तान्सृक्षेहंत्वयिस्थितः ॥ ३ ॥ पितामहत्वंसर्वेषां सर्वोत्पत्तियशस्त्वयि ॥
दास्यामिकेवलंतस्मात् स्वस्थचित्तोभवाधुना ॥ ४ ॥ सर्वेषांप्रकृतिर्माता बीजदातात्वहंपिता ॥ अन्येनिमित्तमात्राणि यथापुण्यं-
यशप्रदः ॥ ५ ॥ पालकस्त्वेकएवाहं मातापित्रादिषुस्थितः ॥ अन्यथामातृगर्भस्थो गर्भोबीजादिकंतथा ॥ ६ ॥ कथंवर्धेतकस्या-
पियत्रनास्तिप्रवेशनं ॥ संहारकोपिसर्वेषां मृत्युकारणसंस्थितः ॥ ७ ॥ अपिमृत्योरहंमृत्यु स्तत्तत्कर्मानुसारतः ॥ स्वदेहरक्षकाः-
सर्वे नम्रियेरन्निजेच्छया ॥ ८ ॥ अतोहमेवसर्वेषां संहर्ताचनियोजकः ॥ अतएवहिसर्वेपि नानाकर्मस्वनिच्छया ॥ ९ ॥ नस्यो-

तादृषभायद्धेप्रवर्ततेतथासदा ॥ अज्ञानिनोज्ञानयुता न्ज्ञानिनोमूढचेतसः ॥ १० ॥ करोमिस्वेच्छयाब्रह्मन् बध्नामिभवपाशतः ॥
मोक्षयामितथाकांश्चि दहमेवनचापरः ॥ ११ ॥ इंद्रियाणांचयेदेवा तेषामिंद्रियसंस्थितः ॥ प्रवर्तयामिसर्वांस्तां स्तथायज्ञाधिदेव-
ताः ॥ १२ ॥ नानारूपधरोहंवै तत्तद्देवेषुसंस्थितः ॥ यदादेवामहायज्ञा न्वितन्वंतिसहस्रशः ॥ १३ ॥ तदाहमेवसर्वेषां यज्ञभोक्ता-
भवामिवै ॥ अहमग्निरहंभानु रहंसोमोबृहस्पतिः ॥ १४ ॥ ब्रह्मावायुस्तथारुद्रो वरुणोमित्रएवच ॥ इंद्रोश्विनौचवसवो विश्वेदे-
वाहमेवतु ॥ १५ ॥ यजमानोहविश्वाहं सर्वसर्वास्थितत्वतः ॥ सूर्योनजायतेयाव त्तावत्सूर्योहमेवतु ॥ १६ ॥ जातेसूर्येहमेवात्र स्थि-
तोलोकप्रकाशकः ॥ नक्षत्राण्यहमेवास्मि ग्रहाःसर्वेप्यहंतथा ॥ १७ ॥ अतोग्रहाणांसर्वेषा महमेवफलप्रदः ॥ योयःपुंण्यवशाद्दे--
वो यदादेहंनिर्जलभेत् ॥ १८ ॥ तावत्तत्कार्यकर्ताहं जातेतस्मिन्हितत्स्थितः ॥ पुनःसर्वकरोम्येव सजानातिस्वयंकृतं ॥ १९ ॥ य-
दाहमेवतंदेवं बोधयामितदैवतु ॥ जानातिस्वस्थितंमांस नान्यथातुकदाचन ॥ २० ॥ एवंममवशेसर्व महंकस्यापिनोवशः ॥ स-
र्ववस्तुषुयाशक्तिः सामदीयैवनान्यथा ॥ २१ ॥ मयैवदत्तंस्वातंत्र्यं केवलेष्वपिसर्वसु ॥ तावन्मात्रेणसंमुग्धः स्वातंत्र्यंमन्यतेनिजं ॥
॥ २२ ॥ स्वातंत्र्येपहतेपश्चा ज्जानंतिपरतंत्रतां ॥ ज्ञानिनोपिहिमन्यंते मन्मायामुष्टचेतनाः ॥ २३ ॥ स्वातंत्र्यंस्वशरीरादौ किंसु-
ज्ञानविवर्जिताः ॥ त्वामारभ्यतृणंयाव ज्जगत्स्थावरजंगमं ॥ २४ ॥ ममशक्तिंविनाब्रह्मन् स्पंदितुंनैवशक्यते ॥ कालेकालेतुया-

बुद्धिः सर्वदेहिषुजायते ॥ २५ ॥ उत्पादयाम्यहंतांवै तत्तत्कर्मानुसारतः ॥ बुध्यापवर्ततेकार्ये सुखार्थीसर्वएवहि ॥ २६ ॥ दुःखं-
चलभतेतस्मा त्सामायाममनान्यथा ॥ कदाचिल्लभतेसौख्यं प्रवृत्तोयंनिजेच्छया ॥ २७ ॥ मदिच्छयैवतद्विध्दि यथादुःखमयत्न-
तः ॥ एवंरूपसहस्राणि सृष्टिकालेस्वलीलया ॥ २८ ॥ वितत्यसर्वरूपेषु क्रीडाम्येकोहमेवहि ॥ अंतेसंत्द्दत्यसर्वाणि निजांप्रकृति-
मास्थितः ॥ २९ ॥ गुणसाम्येखिलंक्षिप्त्वा मोदेस्वानंदरूपतः ॥ तस्मादहंत्वयिस्थित्वा त्वत्तोजातेषुसर्वशः ॥ ३० ॥ स्थित्वा-
कार्याणिसर्वाणि करिष्यामिकथंत्विति ॥ पश्यब्रह्मन्सदैवत्वं सर्वदासर्ववस्तुषु ॥ ३१ ॥ यइदंममामाहात्म्यं भक्त्यापरमयायुतः ॥
श्रृणुयाच्छ्रावयेद्वापि मयिभक्तिंसविंदति ॥ ३२ ॥ ज्ञानयज्ञोमयैवोक्तो मत्कथाश्रवणंहितत् ॥ मद्भक्तानांतथाब्रह्म न्येनस्याद्ब्रह्म-
दर्शनं ॥ ३३ ॥ यमांश्चनियमांश्चापि ऋत्विजःप्राप्ययत्नतः ॥ कामक्रोधादिकान्हित्वा विरक्त्यावज्रकल्पया ॥ ३४ ॥ मय्यग्नौजु-
हुयादादौ मनःसोमंततःपरं ॥ बुध्यैवाध्वर्युणायुक्त सुनुयात्तद्विचक्षणः ॥ ३५ ॥ विवेकोपलसंघृष्टं ततस्त्रिषवणंमनः ॥ रसंमुंच-
तिसंशुद्ध मद्भक्त्याख्यमनुत्तमं ॥ ३६ ॥ जुहुयान्मत्पदेग्नौतु शेषंपीत्वाचमाद्यति ॥ आनंदात्सामगानानि कृत्वाकृत्वाचमोदते ॥
॥ ३७ ॥ अनुभूयतमानंदं त्वद्यालिंगितमत्तनुः ॥ बाह्यंकिंचिन्नजानाति स्वदेहस्यापिचेष्टितं ॥ ३८ ॥ आयातोयंकदादेहो गतोवा-
पिकथंपुनः ॥ इत्येवमपिनोवेत्ति किंपुनःक्षुद्रचेष्टितं ॥ ३९ ॥ एवमंतःसुपक्वोयं सर्वत्रापिबहिःसदा ॥ सर्ववस्तुषुमामेव पश्यत्येव-

चनान्यथा ॥ ४० ॥ जीवन्मुक्तःसएवात्र यावत्प्रारब्धसंक्षयः ॥ निवृत्ताशेषपाप्मासौ क्रियमाणैरलेपभाक् ॥ ४१ ॥ मुक्तकर्मालभे-
न्मुक्तिं ततोनावर्ततेपुनः ॥ अयंहिपरमोलाभो यन्मद्भक्तस्यदर्शनं ॥ ४२ ॥ तत्रापिमत्कथालापो यतोमुक्तिरवाप्यते ॥ श्रूयमाणं-
हरेत्पापं मनसोनिर्वृतिंपुनः ॥ ४३ ॥ वितनोत्यखिलान्भावा न्प्रकाशयतियत्परं ॥ मत्कथाश्रवणंब्रह्मन् तस्मात्कोविरजेत्पुमान्
॥ ४४ ॥ श्रेयसांयन्नपात्रंस्या त्पात्रंदुःखस्ययोभवेत् ॥ सएवविरजेन्मूढो मत्कथाश्रवणान्नरः ॥ ४५ ॥ अतोहिपौरुषेदेहे स्थितःस्वो-
द्धरणेरतः ॥ सनित्यंश्रृणुयाद्भक्त्या मद्भक्तोमत्कथाःशुभाः ॥ ४६ ॥ ऐहिकामुष्मिकंमोक्षं तेनैवसकलंलभेत् ॥ दिवसेषष्टिनाडीके मु-
हूर्तमपिनित्यशः ॥ ४७ ॥ संकोच्यसर्वकर्माणि ममश्रवणमाचरेत् ॥ तेनसार्थकतांयाति तद्दिनंतेनसंसृतिः सार्थक्यंयातिजीवाना
मन्यथादुर्दिनंसदा ॥ ४८ ॥ इतिश्री विष्णुरहस्ये विष्णुमहिमोपवर्णनंनाम द्वादशोध्यायः ॥ १२ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीवेदव्यासायनमः ॥ ब्रह्मोवाच ॥ भोगेनसुखदुःखानां जायतेकर्मणांक्षयः ॥ भोगोहिसुखदुःखानां ज्ञानमेवनचान्यथा ॥ १ ॥
एवंचज्ञानहीनानां सारासारमजानतां ॥ पशुबालवराकादि देहिनांकर्मसंक्षयः ॥ २ ॥ सुवस्त्रहेममाणिक्य चामरादिपारिस्कारैः ॥
दुर्वस्त्रकाष्टपाषाण धारणादिभिरप्युत ॥ ३ ॥ जायतेवानवेत्यत्र संशयोममजायते ॥ श्रीहयग्रीवउवाच ॥ सुखस्यवाथदुःखस्य-

कारणंयस्ययद्भवेत् ॥ ४ ॥ वस्त्रादितत्तुजीवानां भोगदंकर्मणःक्षयं ॥ तेनसंजायतेनूनं सर्वथानात्रसंशयः ॥ ५ ॥ बालादीनांतुके-
षांचि त्धेमरूप्याद्यलंकृतिः ॥ दृश्यतेतारतम्येन तद्विशेषमजानतां ॥ ६ ॥ नज्ञानंजायतेतेषां दृष्टृणांप्रेमतोथवा ॥ रोषतोवापितृ-
भ्रातृ मात्रादीनांद्विषांतथा ॥ ७ ॥ तेषामेवहिभोगःस विज्ञेयःसुविचक्षणैः ॥ दृश्यतेभोगवैचित्र्यं बालादिष्वपिकेषुचित् ॥ ८ ॥
तत्रापिकारणंब्रह्मन् ब्रुवेतच्छ्रद्धयाच्छृणु ॥ दंभादिनाबहिश्चित्तं कृतंकर्मशुभाशुभं ॥ ९ ॥ तत्फलंजायतेतादृक् जीवानांबाह्यमेवहि ॥
यथाहयगजादीनां नृपैर्हेमादिभूषणैः ॥ १० ॥ अलंकृतानांजायेत दर्शनस्पर्शनादिना ॥ नृपादीनांतथासर्वं मूहनीयंविपश्चिता ॥
॥ ११ ॥ तस्माद्यत्ज्ञानपूर्वंतु तथाभक्त्यासमन्वितं ॥ सांगंविष्ण्वर्पितंकर्म सूतेसाधुफलानितत् ॥ १२ ॥ अश्रद्धयातुयत्कर्म बा-
ह्यचित्तेनदेहिनां ॥ नसम्यक्फलदंतत्स्या त्कृतंपुण्यमपिस्महृ ॥ १३ ॥ उद्विजेत्सर्वथासाधु मनसापापकर्मणः ॥ पुण्यकर्मणिस-
क्तःस्या द्विपरीतोविपर्यये ॥ १४ ॥ देवतागुरुविप्राणा मवज्ञानाच्चगर्वतः ॥ पुण्यक्षयोभवेत्पुंसां पापवृद्धिश्चजायते ॥ १५ ॥ अ-
स्यैववैपरित्येन फलेस्याद्विपरीतता ॥ १६ ॥ इतिसंक्षेपतःसर्वं तवाग्रेकथितंमया ॥ रहस्यंसर्वशास्त्राणां किमन्यच्छ्रोतुमिच्छसि ॥
॥ १७ ॥ इतिश्री विष्णुरहस्ये भोगविवेकोनाम त्रयोदशोध्यायः ॥ ॥ १३ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीवेदव्यासायनमः ॥ ब्रह्मोवाच ॥ इमेनानाविधाजीवाः नानाकाराश्चसर्वशः ॥ कथंमोक्षंप्राप्नुवंति निर्बंधानादिकर्मणा ॥
॥ १ ॥ हयग्रीवउवाच ॥ अनादिकर्मणाबध्दा विचित्रेणामुनाखिलाः ॥ जीवाभ्रमंतिसंसारे यावत्कर्मक्षयोभवेत् ॥ २ ॥ भोगा-
दिनैवनोकर्तु शक्योवैकर्मणांक्षयः ॥ यतएकशरीरस्थः शरीराणांसहस्रशः ॥ ३ ॥ लक्षशःकोटिशःश्चापि कारणानिकरोत्ययं ॥
येहिजीवाशरीरस्था योग्याविधिनिषेधयोः ॥ ४ ॥ ब्रह्मविट्क्षत्रियाद्याश्च ज्ञानिनःपापभीरवः ॥ तेपिकुर्वंत्यहरह र्निजबंधकरा-
णिवै ॥ ५ ॥ कारणानीहकर्माणि देहानांदशकस्यहि ॥ वक्तव्यंकिमुजीवानां कर्माणिस्वैरचारिणां ॥ ६ ॥ प्रायोविकर्मनिष्ठाहि
चेतनाःसात्विकाअपि ॥ राजसा स्तामसास्तत्र विकर्मस्थाइदंकिमु ॥ ७ ॥ जीवमानोहिजीवोयं पूर्वोक्तेनप्रकारतः ॥ यावत्स्वदे
हपातस्या त्तावत्कर्ममहाचलान् ॥ ८ ॥ करोतियेषांभोगार्थं बहुजन्मान्यवाप्नुयात् ॥ स्थावरंजंगमंयाव च्चंद्रसूर्यादिकंतथा ॥
॥ ९ ॥ प्रयातिनाशंतत्रापि कर्मशेषोवशिष्यते ॥ येनबध्दोविचित्राणि तत्तत्कर्मानुसारतः ॥ १० ॥ तृणगुल्मलतादीनि शरी-
राणिसमश्नुते ॥ शीतवातातपंवर्षं छेदभेदविमोहजं ॥ ११ ॥ अनुभूयसदादुःखं जंगमेषुप्रजायते ॥ क्रिमिकीटमृगव्याल वृक-
व्याघ्रद्विजन्मनां ॥ १२ ॥ यादसांचशरीराणि गोश्वमाहिषकादिनः ॥ भुक्तिक्रमणमानुष्यं प्राप्यपार्वतिकोभवेत् ॥ १३ ॥ वसं-
तेयेहिपर्णानि भक्षंतिपशुमांसकं ॥ कंदमूलफलादीनि मुक्ताविधिनिषेधतः ॥ १४ ॥ औपस्थजैंव्ह्यमात्रज्ञा विशेषज्ञानवर्जिताः ॥

शीतवातातपसहाः पशुप्रायाःकुदेहिनः ॥ १५ ॥ किरातम्लेंछशबर पुलिंदाबर्बरादयः ॥ दस्यवःपापनिरताः पार्वतीयाहितेखि-
लाः ॥ १६ ॥ ततःकालेनतद्भोगा ज्जायतेशुभयोनिषु ॥ विधेर्वापिनिषेधस्य विषयाब्राह्मणादयः ॥ १७ ॥ तत्रापिक्रमतःप्राप्य
त्रैवर्ण्यसंसृतौभ्रमन् ॥ यदिकुर्याद्दुराचारं ततोनरकमाप्नुयात् ॥ १८ ॥ भुक्त्वाकर्मार्जितांलोका न्निरयान्बहुवत्सरं ॥ कर्मशेषेणभू-
यःस स्थावरादिषुजायते ॥ १९ ॥ पूर्वोक्तेनक्रमेणासौ प्राप्यत्रैवर्णिकादिकं ॥ भ्रमन्नास्तेससंसारे तत्रमोक्षकथाकुतः ॥ २० ॥ शु-
भयोनिस्थितोजीवो यदिकर्मशुभंचरेत् ॥ तदासस्वर्गतिंप्राप्य कर्मशेषस्ततश्च्युतः ॥ २१ ॥ पुनःशुभेषुदेहेषु स्थित्वासत्कर्मनिष्ठि-
तः ॥ दयादानरतःश्रीमान् देवतातिथिपूजकः ॥२२॥ स्वकर्मणार्जितान्देहान् शुभयोनीन्पुनःपुनः ॥ प्राप्यत्रिदिवभूमिष्ठः प्रायो-
भ्रमतिसंसृतौ ॥ २३ ॥ ईषत्पापस्ययोगेन कदाचिन्नरकेस्थितः ॥ कुयोनिस्थःकदाचित्स्या त्पुनस्याच्छुभयोनिगः ॥ २४ ॥ योहि-
स्याद्राजसोजीव स्तामसोवाकथंचन ॥ कदाचित्सोपिलभते सत्कर्मानुष्ठितेर्बलात् ॥ २५ ॥ स्वर्गेवापिशुभांयोनिं पुनःपापात्कुयो-
निजः ॥ एवंसर्वेइमेजीवा मन्मायाचक्रसंस्थिताः ॥ २५ ॥ भ्रमंतिसंसृतौब्रह्म न्कर्मबंधात्पुनःपुनः ॥ नहिमोक्षकथातत्र यावन्नम-
दनुग्रहः ॥ २७ ॥ पुण्यकर्मणिविघ्नानि कुर्वंतीमेममाज्ञया ॥ देवाश्चराक्षसाश्चापि येचान्येक्रूरयोनयः ॥ २८ ॥ जीवकर्मानुसारेण
शुभस्याप्यशुभस्यवा ॥ योजयेत्कर्मणःसिद्धिं घातयेवपरस्परं ॥ २९ ॥ अनाद्यनंतकालंहि कुर्वनेवंसदैवतु ॥ क्रीडामिलीलया-

२३

23

ब्रह्मन् कस्यचिन्नवशेस्थितः ॥ ३० ॥ तस्माद्भोगादिनाकोपि क्षेप्तुंकर्मनशक्यते ॥ तस्मान्मांशरणंयाया न्मुमुक्षायस्यजायते ॥
॥ ३१ ॥ यतःपूर्वाणिकर्माणि भोक्तुंप्रारब्धकानिच ॥ प्राप्तेशरीरेकुर्वंति नित्यंकर्माण्यनेकशः ॥ ३२ ॥ क्रीयमाणानितानिस्यु र-
शुभानिशुभानिच ॥ तान्यवपरतःकाले संचितानिभवंतिहि ॥ ३३ ॥ संचितानिचकालेन लाभाच्चसहकारिणः ॥ फलोन्मुखानि
जायंते तानिप्रारब्धकानितु ॥ ३४ ॥ तेषांफलस्यभोगाय ध्रियमाणशरीरकं ॥ पुनःकरोतिकर्माणि स्यादेवंतुपुनःपुनः ॥ ३५ ॥
कर्मणांहिप्रवाहोय मेवमनादिकालतः ॥ बध्वाभ्रामयतेजीवा न्मदपारोक्षवर्जितान् ॥ ३६ ॥ एवंतेकर्मणांबंध प्रकारःकथितोवि-
धे ॥ ज्ञात्वैवंमुक्तये प्राज्ञः कूर्याद्यत्नमतंद्रितः ॥ ३७ ॥ इतिश्री विष्णुरहस्ये कर्मबंधप्रकारवर्णननाम चतुर्दशोध्यायः ॥ १४ ॥

॥ श्रीवेदव्यासायनमः ॥ ब्रह्मोवाच ॥ यदित्वंसर्वजीवानां कर्मकारयसेच्युत ॥ कथंतर्हिफलंतेषां जायतेतद्वदस्वमे ॥ १ ॥ रा-
जाज्ञयाकृतंपापं कर्मपुण्यमथापिवा ॥ फलभाक्तत्रराजास्ति नप्रेष्यदृश्यतेफलं ॥ २ ॥ राज्ञाहतोयंदुर्वृत्तो राज्ञासंवर्धितोध्य-
यं ॥ इत्येवंव्यवहारोस्ति ननाम्नाभृतकस्यहि ॥ ३ ॥ जितंराज्यंनृपेणेदं हारितंराज्यमित्यपि ॥ कीर्त्यादिजायतेराज्ञ स्तन्नियुक्त
स्यनैवतत् ॥ ४ ॥ जीवोहिश्वसातिश्वास मोक्षेपिनप्रभुःस्वयं ॥ कथंतस्यसुखंदुःखं तत्फलंपुण्यपापयोः ॥ ५ ॥ स्वतंत्रोसित्वमे-

वेश शुभंवाप्यथवाशुभं ॥ कर्मकारयसेजीवा त्कथंतेफलभोगिनः ॥ ६ ॥ संशयंनुददेवेश येनस्याद्विमलंमनः ॥ श्रीहयग्रीवउवा-
च ॥ अनादीनीहकर्माणि जीवानांकथितानिते ॥ ७ ॥ अनादितोप्यहंब्रह्म न्नियंतासर्वदेहिनां ॥ सात्विकादिविभेदेन जीवानि-
गदिताःपुरा ॥ ८ ॥ स्वभावएवतेषांस कर्मणामपिचित्रता ॥ मद्भक्तिःसात्विकांशेषु मद्वेषस्तामसेष्वपि ॥ ९ ॥ नैसर्गिकमिदं-
प्रोक्तं कदाचित्तद्विपर्ययः ॥ आगंतुकोभवेत्कर्म सहकार्यनुसारतः ॥ १० ॥ तथातेषांमयिप्रीति र्द्वेषोवापिभवेद्विधे ॥ तथाफलं-
भवेत्तेषां मत्तएवचनान्यतः ॥ ११ ॥ देवादिष्वप्यहंस्थित्वा फलंतेभ्योददामिहि ॥ तत्तत्कालपरिछिन्नं तत्तत्कर्मानुसारतः ॥
॥ १२ ॥ मामुद्दिश्यकृतंयत्तु सकामंतत्तथैवहि ॥ निष्कामंयद्भवेत्कर्म तदेवानंतमुच्यते ॥ १३ ॥ मध्यमास्तत्रयेभक्ता मोक्षकामा
भजंतिमां ॥ एकांतिनोऽस्युत्तमास्ते मदर्थंमोक्षकांक्षिणः ॥ १४ ॥ यथासुखंभवेत्प्रीति र्निरुपाधिस्तथामयि॥ एकांतिनांभवेत्प्रीति
र्मोक्षस्तेषांमदर्थकः ॥ १५ ॥ अज्ञानलेशरहिताः कर्मबंधाद्विनिर्गताः ॥ कदाभूत्वाहरेरूपं द्रक्ष्यामःसर्वदैवहि ॥ १६ ॥ इतिबुध्या-
यतंतेते मोक्षायनसुखायच ॥ अन्येसंसारतापेन संतप्ताविमुमुक्षवः ॥ १७ ॥ विचित्वामोक्षदातारं भजंतेमध्यमाहिते ॥ एतेभ्यो-
भक्तिहीनाये तेधमाइतिकीर्तिताः ॥ १८ ॥ मुख्यकर्तास्वतंत्रत्वा त्सर्वेषांकर्मणामहं ॥ नकिंचिन्मद्दतेकिंचि त्कर्मयत्कर्तुमीहते ॥
॥ १९ ॥ स्थित्वाभक्तशरीरादौ स्वयमेवसमर्चये ॥ अतोविप्रतमंप्राहु श्चित्रकर्ममहामिति ॥ २० ॥ हविषावावृधानोहं यजेर्या-

पृथिवीमुत ॥ एवंहिश्रुतयस्फीता बहुशोवर्णयंतिमां ॥ २१ ॥ तथापिकर्मणांभोगो यथाजीवेषुजायते ॥ तथाप्रकारंवक्ष्यामि श्रु-
णुष्वसुसमाहितः ॥ २२ ॥ स्वातंत्र्यंयोममगुणः तंभक्तेषुयथाक्रमं ॥ दत्वेंद्रियगुणाधीशान् भवदादीन्करोम्यहं ॥ २३ ॥ तथापिक-
लिमुख्यानां दत्वाकिंचित्स्वतंत्रतां ॥ बुध्यादिषुनियोज्यैव नानाजीवान्सृजाम्यहं ॥ २४ ॥ जीवोपिकिंचित्स्वातंत्र्यं मद्दत्तमवतिष्ठ
ते ॥ येनायंभक्षयत्यन्नं देहचेष्टास्तथेतराः ॥ २५ ॥ करोतियावत्स्वातंत्र्यं तस्मिन्नपत्दृतेमया ॥ नकिंचिच्छक्नुतेकर्तुं ततोवेत्तिपरा-
त्मतां ॥ २६ ॥ बुध्यादिनैवकुरुते पुण्यंवापापमेववा ॥ तत्रपुण्यफलंदेवे तत्तदिंद्रिययंतरि ॥ २७ ॥ यथास्वातंत्र्यमाप्नोति जी-
वेस्वल्पंभवेत्ततः ॥ यत्तुपापफलंकर्म तत्तदिंद्रिययंतरि ॥ २८ ॥ कल्यादौदैत्यनिवहे यथास्वातंत्र्यमेवहि ॥ तस्माज्जीवेस्वल्पमेव
पापंतेनैवपात्यते ॥ २९ ॥ नानादुःखेषुजीवोयं सुखेष्वपिसुकर्मणः ॥ सुखंपुण्यफलंयस्मा त्तद्भोक्ताहंतुमुख्यतः ॥ ३० ॥ दुःखंपा-
पफलंयत्त त्तन्मेदूराद्विनश्यति ॥ यथानालोकतेसूर्य स्तमोलेशमपिक्वचित् ॥ ३१ ॥ तथादुःखस्यलेशोपि कर्हिचिन्नमयेक्षते ॥ य-
थाक्षुद्रःपिपीलादि स्तोषंयात्यल्पभक्षतः॥ ३२ ॥ म्रियतेचाल्पघातेन तथाजीवस्यजायते ॥ स्वल्पादेवसुखावाप्तिः स्वल्पाद्दुःखाच्चपी
डनं ॥ ३३ ॥ एतयोर्बलतोदैत्याः पीडयंतिसुरानपि ॥ तत्तेषांतपसोहान्यै मत्प्रीत्यर्थंसहंत्यपि ॥ ३४ ॥ ततःक्रीडनकाएते सर्वे-
जीवगणामम ॥ संसारेप्यथवामुक्तौ तेनब्रह्मन्नियंस्थितिः॥ ३५॥ मद्भक्त्यासुकृतंकर्म वर्धतेपापमन्यथा ॥ मद्द्वेषात्पापकर्मैवं व-

र्धतेपुण्यमन्यथा ॥ ३६ ॥ बीजाद्बीजमितिन्यायाद नादेरेवकर्मणः ॥ करोमिकर्मणांवृद्धिं क्षयंभोगादिनातथा ॥ ३७ ॥ जीव-
कर्माखिलंज्ञात्वा कारयामिशुभाशुभे ॥ ददामिसुखदुःखेच नमेलेपोस्तिकस्यचित् ॥ ३८ ॥ योयथामांभजेज्जीवः तथैवफलमा-
प्नुयात् ॥ नमेद्वेष्योथवामित्रं नलाभोमित्रतोमम ॥ ३९ ॥ नहानिःशत्रुतःक्वापि सर्वोत्कृष्टस्यसर्वदा ॥ राजाज्ञयापियेभृत्याः शुभं
वाप्यथवाशुभं ॥ ४० ॥ कुर्वंतितेफलंतेषां यथायोगंप्रजायते ॥ तथाजयेपराजित्यां नृपस्याज्ञानुसारिणां ॥ ४१ ॥ दृष्टादृष्टफला-
वाप्ति र्व्यवहारेपिदृश्यते ॥ अतोयद्यन्मयाप्रोक्तं तथैवचनचान्यथा ॥ ४२ ॥ अन्यथामनुतेयस्तु नरकंपितृभिर्व्रजेत् ॥ इतितेसर्व-
माख्यातं ब्रह्मन्यत्पृष्टवानसि ॥ ४३ ॥ यत्किंचिदन्यच्छ्रोतव्यं तदप्यत्रैवपश्यभो ॥ मयागीतमिदंब्रह्म न्नर्थाःसर्वेप्यतस्तव ॥
॥ ४४ ॥ विदितास्युर्नचापीष दज्ञातमवशिष्यते ॥ विष्णुरुवाच ॥ ब्रह्माणमित्युदीर्याथ हयग्रीवोथमत्तनुः ॥ पस्पर्शपाणि-
नामूर्ध्नि ब्रह्माणंप्राणमेवच ॥ ४५ ॥ ब्रह्माप्राणौसपत्नीकौ भक्त्यातंनेमतुस्तदा ॥ कृतकृत्यंस्वमात्मानं मत्वाविधिरुवाचह ॥-
॥ ४६ ॥ धन्योहंकृतकृत्योहं श्रुत्वात्वद्गीतमुत्तमं ॥ अज्ञानतमसोनाशा द्विज्ञानार्कोधुनोदितः ॥ ४७ ॥ इतिब्रुवत्येतस्मिन्स ह- २५
यग्रीवास्तिरोदधे ॥ गीतंहयग्रीवस्येदं योभक्त्यापठतेनरः ॥ ४८ ॥ सकर्तासर्वयज्ञानां ॥ इहामुत्रचशंलभेत् ॥ ४९ ॥ इतिश्री
विष्णुरहस्ये भगवतःस्वातंत्र्यवर्णनंनाम पंचदशोध्यायः ॥ १५ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीवेदव्यासायनमः ॥ ब्रह्मोवाच ॥ अंतर्हितेहयग्रीवे लब्धज्ञानास्तुतेखिलाः ॥ सृष्टवंतःकथंजीवां स्तन्मेविस्तरतोवद ॥ १ ॥
महत्तत्वविभागेन चत्वारोनिर्मिताःकथं ॥ तदप्याख्याहिभगवन् कृपयाभूतभावन ॥ २ ॥ श्रीभगवानुवाच ॥ महत्तत्वविभागोर्धः
शतधाचविभाजितः ॥ पुरुषास्त्रिंशताभागैः पंचविंशतिभिस्ततः ॥ ३ ॥ प्रकृतिर्निर्मितासूत्र मष्टाविंशतिभागकैः ॥ वाग्देवीसप्तद-
शभिः भागैःसृष्टाभवत्पुरा ॥ ४ ॥ सृष्ट्यादौपुरुषोजज्ञे तेनाद्यब्रह्मसंज्ञितः ॥ ओतत्वात्सर्वजीवेषु सूत्रंप्राणइतीरितः ॥ ५ ॥ सतु-
वर्षद्वयादूर्ध्वं जजानब्रह्मजन्मनः ॥ प्राणत्वेनस्थितस्ताव दहमेवहिपूरुषे ॥ ६ ॥ पुरुषाधिष्ठितेप्राणे जातेप्राणोविशद्विधिं ॥
अन्योन्यंसंभृतावेतौ सर्वजीवेषुसंस्थितौ ॥ ७ ॥ शीर्येत्प्राणंविनाब्रह्मा म्रियेत्प्राणोविधिंविना ॥ जज्ञातेप्रकृतिःशुल्वे वायोर्वर्षत्रयात्प-
रं ॥ ८ ॥ वैकारिकाद्यहंकार दलानित्रीण्यतःपरं ॥ मिश्रीकृत्यतदंशेन तयोःपुत्रौविनिर्मितौ ॥ ९ ॥ प्रकृत्यांपुरुषाज्जीवः कालो-
वाग्वायुयोगतः ॥ सर्पाकारोभवज्जीवः कालोभूत्पक्षिरूपधृक् ॥ १० ॥ प्रकृतेर्जन्मतोवर्षे द्वयादेतौबभूवतुः ॥ येनिर्मिताःपुरादेहा
महत्तत्वादिभिर्मया ॥ ११ ॥ तेषामुपचयाद्यर्थं महत्तत्वादिराशयः ॥ कारितोविधिसूत्राभ्यां पृथक्पूर्ववदेवहि ॥ १२ ॥ पार्थिवोदक-
तेजोभि र्देहानांवर्धनंयथा ॥ तत्तत्तत्वस्ययोगेन कालानुग्रहतस्तथा ॥ १३ ॥ ब्रह्मादीनांदेहवृध्धि र्बभूवातःपरंतथा ॥ यथामृज्जल-
तेजोभि र्वृक्षादेर्वर्धनंभवेत् ॥ १४ ॥ तथैवगुणसंबंधा त्तत्ववृध्धिःप्रजायते ॥ अथापचयमापन्ना प्रकृतिस्त्रिविधाभवत् ॥ १५ ॥ स-

त्वादिगुणयोगेन गायत्रीचसरस्वती ॥ सावित्रीतिचतास्वेको ब्रह्मावीर्यमवासृजत् ॥ १६ ॥ ताभ्योविनिःसृतंतत्तु मिश्रीभूतंतथाभव-
त् ॥ जीवोत्पत्तेर्वर्षमात्रा दैकस्माज्जज्ञिवान्विधिः ॥ १७ ॥ द्वितीयेनतुमार्गेण प्राणोभूत्सूत्रनामकः ॥ महत्तत्वशरीरौतौ ततोब्र-
ह्मसुतःशिवः ॥ १८ ॥ तथैवानंतनामासी दहंकारस्यभागतः ॥ सूत्राच्चतैजसाद्रुद्रः तामसोनंतजःशिवः ॥ १९ ॥ बभूवैवंत्रिधारु-
द्रो भेदैर्वैकारिकादिभिः ॥ सत्वाधिक्येनरुद्रोसौ वैकारिकतनुःपुनः ॥ २० ॥ विष्णुरित्यपिशास्त्रेषु गीयतेदेवदेहसृक् ॥ तथारज-
स्तमोयोगा दसावेवविधिर्हरः ॥ २१ ॥ वैकारिकादिभागेन त्रिविधाबात्धिरप्यभूत् ॥ ततोबुत्धौविष्णुयोगा च्छक्रप्रद्युम्नकौस्तुतौ ॥
॥ २२ ॥ मरुद्गुरुःशाचीशुक्रोऽनिरुत्धाद्याःपरेपिच ॥ ततोवायुशशिसूर्यौ यमोथवरुणोनलः ॥ २३ ॥ अन्येप्यादित्यरुद्राद्या वस-
वोधनदादयः ॥ स्वधास्वाहाबुधोभौम उषोषःशनिपुष्करः ॥ गंधर्वापितरोभूवन् सूक्ष्मरूपास्तुतेखिलाः ॥ तैजसाहंकृतेरासन् ज्ञा-
नकर्मेंद्रियाणिच ॥ २५ ॥ वैकारिकान्मनोजज्ञे तामसाद्भूतपंचकं ॥ शब्दाद्याविषयाःपंच तत्राविष्ठास्तुदेवताः ॥ २६ ॥ बहुधा-
जायमानोहं तत्रापिप्राविशंक्रमात् ॥ ब्रह्मणोदशवर्षेषु सृष्टिरेवमजायत ॥ २७ ॥ एतस्मिन्नंतरेप्राणा च्छक्राद्याअपिजज्ञिरे ॥
वाजपेयाश्वमेधादि यज्ञानांदेवताअपि ॥ २८ ॥ सुनंदनंदप्रमुखा ममयेपार्षदाःसुराः ॥ तेसर्वेब्रह्मणोजाताः विष्वक्सेनोमरुत्सु-
तः ॥ २९ ॥ एवंविलसितंब्रह्मन् प्रकृतेःप्राकृतस्यच ॥ जीवानांदेहयोगेन सृष्टिरेवंविधोच्यते ॥ ३० ॥ ॥ इतिश्री विष्णुरहस्ये

सूक्ष्मसृष्टिकथनंनाम षोडशोध्यायः ॥ १६ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥

॥ श्रीवेदव्यासायनमः ॥ ब्रह्मोवाच ॥ प्रकृतिःकतिधाप्रोक्ता प्राकृतंचापिकिंविधं ॥ अप्राकृतंचकतिधा तन्मेविस्तरतोवद ॥ १ ॥
श्रीभगवानुवाच अविद्यमानोयोयत्र सोर्थोनोयत्रभासते ॥ यथार्थमितितज्ज्ञानं साप्रमापरिकीर्तिता ॥ २ ॥ तयायदाकदापि-
स्या दस्तीतिविषयोहियत् ॥ तत्प्रमेयमितिप्रोक्तं चेतनंचाप्यचेतनं ॥ ३ ॥ जानातीच्छतियोयत्नं कुरुतेचेतनोहिसः ॥ तद्विही-
नंतदन्यत्स्या च्चेतनोप्राकृतोमतः ॥ ४ ॥ स्वतंत्रःपरतंत्रश्च द्विधाचेतनइष्यते ॥ यस्यनास्तिनियंतान्यः सस्वतंत्रोन्यथेतरः ॥
॥ ५ ॥ अहमेवस्वतंत्रोन्य न्मदधीनंततोखिलं ॥ अत्रामुकंचनास्तीति प्रतीतिविषयोहियः ॥ ६ ॥ अभावोयंतदन्योहि भाव-
इत्यभिधीयते ॥ चेतनाचेतनंभावः स्यादभावोत्वचेतनः ॥ नाशोयस्यभवेत्तत्स्या दनित्यंनित्यमन्यतः ॥ ८ ॥ चेतनोनित्यए-
वस्या त्तदन्यद्विविधंमतं ॥ अचेतनैवप्रकृति र्नित्यैवपरिकीर्तिता ॥ ९ ॥ सत्वंशुद्धंतमःशुद्धं माकाशःकालएवच ॥ अकाराद्या-
स्तथावर्णा वाचोवेदात्मिकास्तथा ॥ १० ॥ इत्यादिप्रकृतिर्नित्या नानाभेदसमान्विता ॥ अनंतासनवैकुंठ नारायणपुरेषुये ॥
॥ ११ ॥ श्रीभागाःशुद्धसत्वस्थाः पद्मशंखांबरादिच ॥ किरीटकटकाद्याये प्यलंकाराममाश्रियः ॥ १२ ॥ इत्याद्याःसत्वरूपास्युः

नित्यानादयएवते ॥ सत्वाधिक स्तुभूभागो दुर्गाभागस्तमोधिकः ॥ १३ ॥ वैकुंठादित्रिकेयोस्ति सर्गेसर्गेथजायते ॥ अमुक्ताःस्त
त्रनंदंति सनश्यतिलयेलये ॥ १४ ॥ अंधंतमस्तमःशुत्धं चक्रादीन्यायुधानिच ॥ रजोरागेणतेषुस्या त्कालेकालेप्रदीप्तता ॥
॥ १५ ॥ स्वभावाद्विविधाकारः सत्वेतमसिदृश्यते ॥ अतःपर्वतवृक्षादि सुवर्णादिजलादिषु ॥ १६ ॥ सत्वभागेतमोभागे नाना-
वस्तूपलंभनं ॥ अतोन्योस्तितमोरासिः सत्वराशिस्तथापरा ॥ १७ ॥ ताभ्यांप्रजायतेसृष्टि कालेपूर्वोक्तवद्द्रजः ॥ प्रलयेविशते-
सत्वं सत्वेतमसिवैतमः ॥ १८ ॥ गुणद्वित्वेनसाम्यंस्या त्स्थितिरित्थंपुनः पुनः ॥ यत्प्रकृत्यैक्यतांयाया तत्प्राकृतमितीर्यते ॥
॥ १९ ॥ अनित्यमेवयत्प्रोक्तं साद्यनादीतितद्विधा ॥ आकाशवायुतेजोंबु भूतानांपंचकंत्विदं ॥ २० ॥ एतद्वीजानितन्मात्राः
क्रमात्पंचेरिताःस्त्विमाः ॥ शब्दस्पर्शोथरूपंच रसोगंधश्चपंचमः ॥ २१ ॥ एतन्नामकमेवस्या द्विषयाणांचपंचकं ॥ तज्ज्ञापका-
निपंचैव क्रमाज्ज्ञानेंद्रियाणितु ॥ २२ ॥ श्रोत्रंत्वक्नयनंजिंव्हा नासिकापंचमीस्मृता ॥ दानोपादानगमन वचनोत्सर्जनानिच ॥
॥ २३ ॥ कर्माणितेषांसिध्यर्थं हस्तौपादौतथैववाक् ॥ उपस्थंपायुरित्येव पंचकर्मेंद्रियाणितु ॥ २४ ॥ एषामनुग्रहार्थाय तथा-
स्मृत्यादिहेतवे ॥ संकल्पात्मविकल्पात्म मनएकादशंस्मृतं ॥ २५ ॥ एकादशेंद्रियाण्येवं तन्मात्रापंचकंतथा ॥ षोडशैवकलाः
प्रोक्तालिंगदेहस्तदात्मकः ॥ २६ ॥ सर्वेषामपिजीवाना ममुक्तानांभवेदयं ॥ ब्रह्मादितत्वदेवानां महत्तत्वादिरूपकः ॥ २७ ॥

लिंगदेहोस्तितत्रापि कलाःसूक्ष्मास्तुषोडश ॥ अनादिलिंगदेहोयं साक्षाद्दर्शनतोमम ॥ २८ ॥ प्रारब्धानांक्षयेजाते नश्यत्येवन-
संशयः ॥ सत्वभागस्तुसत्वेस्या त्लीनस्तमसितामसः ॥ २९ ॥ अतःप्राकृतमेतत्स्या त्सांतंचानादिमत्स्मृतं ॥ यथाव्रीह्यादिधा-
न्यानां पशुवृक्षादिदेहिनां ॥ ३० ॥ तत्तद्वीजानुसारेण मृत्तेजोजलयोगतः ॥ यथानानाविधावृत्धि स्तथैषांमहदादिनां ॥ ३१ ॥
तथातथाभिवृध्यर्थ तत्तत्तत्वस्यसर्जनं ॥ सृष्ट्यादौक्रियतेवश्यं पूर्वोक्तविधिनाततः ॥ ३२ ॥ व्युत्क्रमात्प्रलयस्तेषां प्रकृतौजायते
पुनः ॥ सादिसांतमिदंप्रोक्तं प्राकृतंतवसन्निधौ ॥ ३३ ॥ इतिश्री विष्णुरहस्ये प्रकृतिप्राकृतादि विभागकथनन्नाम सप्तदशोध्यायः ॥

॥ श्रीवेदव्यासायनमः ॥ शौनकउवाच ॥ सृष्ट्यादौनिर्मितोब्रह्मा ततस्तत्वादिदेवताः ॥ क्रमेणनिर्मिताःसूत विष्णुनाप्रभविष्णु
ना ॥ १ ॥ तत्तत्तत्वादिदेवस्य यावत्प्रजननंभवेत् ॥ तावत्पूर्वस्यदेवस्य कथंतत्वप्रवर्तनं ॥ २ ॥ कथंवास्योच्चदेवेषु नीचानांत-
त्ववृत्तिता ॥ एषनःसंशयोविद्वं स्त्वयाच्छेद्योयथातथं ॥ ३ ॥ सूतउवाच ॥ मुख्यतःसर्वतत्वानां चेष्टकोहरिरेकलः ॥ यथासचिव-
राहित्ये नृपतिःस्वयमेवतत् ॥ ४ ॥ कार्यंकरोतिवाकैश्चि दन्यैःसचिवभृत्यकैः ॥ तथासर्वेषुतत्वेषु स्वयमेवस्थितोहरिः ॥ ५ ॥
उद्बोध्यनिर्ममेसृष्टे रादौब्रह्माणमेवहि ॥ यद्यत्सृजतिविश्वात्मा तत्राप्याविशतिस्वयं ॥ ६ ॥ अतोब्रह्माणमाविश्य तत्तत्तत्वमची

वि० र० कॢपत् ॥ जातेजातेतत्त्वदेवे तत्तत्त्वेनियोजयेत् ॥ ७ ॥ एवमेवाधिकेदेवे तत्वदेवेषुवैहरिः ॥ अन्येनाधिकदेवेन स्वयंचापिप्रवर्त अ० १८
२८ येत् ॥ ८ ॥ निर्मितास्तत्वदेवास्ते परस्परमथीवदन् ॥ कोनुश्रेष्ठोस्मासुभवे दहंवाश्रेष्ठइत्यपि ॥ ९ ॥ सप्राणास्तेततोजग्मु ब्र-
ह्माणंविष्णुमेवच ॥ तदाज्ञयावदद्ब्रह्मा प्राणाद्यास्तत्वदेवताः ॥ १०॥ अयंहिपौरुषोदेहो गतेयस्मिन्पतेत्पुनः ॥ उत्तिष्ठेद्यत्प्रवेशे-
च सएवश्रेष्ठतामियात् ॥ ११ ॥ ततस्तथेतितैरुक्तो एकैकोगतवांस्ततः ॥ ततःकार्यविहीनोभू द्देहोनैवपपातसः ॥ १२ ॥ गते-
ष्वपिचसर्वेषु तथैवावस्थितोहिसः ॥ प्राणेगतेपतच्छीघ्रं व्यशीर्यतततःपुनः ॥ १३ ॥ शरीरमितितंप्राहुः पुनर्दार्ढ्यायतेखिलाः
एकैकशःप्रविविशु स्तेदेहंसर्वशोपिवा ॥ १४ ॥ नैवोत्तस्थौतदादेहः ततःप्राणोविशत्प्रभुः ॥ प्रविष्टमात्रउत्तस्थौ प्राणेदेहोथते
खिलाः ॥ १५ ॥ प्राणंक्षमापयामासुः स्पर्धमानावृथावयं ॥ प्रतिवादरताभूमन् त्वयानाथविमोहिताः ॥ १६ ॥ अथत्वमसिनो-
नाथ स्त्वद्दासाअखिलावयं ॥ इत्थमासीत्पुरावृत्तं ततोदेहेषुसर्वशः ॥ १७ ॥ सप्तसप्तकसंख्याकै र्मरुद्भिःपरिवारितः ॥ सूत्रंप्रा-
णःस्थावरेषु जंगमेषुविशेषतः ॥ १८ ॥ जाग्रत्तिष्ठतिसर्वेषु स्वपत्स्वपिसदाप्रभुः ॥ प्रवेशयेदयंजीवा न्नानादेहान्स्वकर्मणा ॥ २८
॥ १९ ॥ निर्मितान्यावदायुष्यं वर्धयित्वाततोंततः ॥ प्रयातिजीवमादाय महेश्वरपुरःसरः ॥ २० ॥ अयंहिजाठरोभूत्वा पचत्य-
न्नानिदेहिनां ॥ अंगानिवर्धयेत्येषु प्रापयित्वास्वपत्स्वपि ॥ २१ ॥ तत्तदन्नरसंपश्चा द्विकरोत्ययमेवहि ॥ जनयत्यप्ययंरोगान्

जीवकर्मानुसारतः ॥ २२ ॥ शमयत्यौषधद्वारा सएवस्वयमेववा ॥ कालेकालेसुखंदुःखं ददात्येषोखिलाधिपः ॥ २३ ॥ बलंज्ञानं-
धृतिर्बुद्धि र्भक्तिश्रद्धातएवहि ॥ प्राणस्यास्यापिसप्राणः श्रीविष्णुःसकलेश्वरः ॥ २४ ॥ विश्वसाक्षीजगद्धाता दयालुर्भक्तवत्सलः ॥
त्वद्दिस्थःसर्वजीवानां सहरिःसशिवःस्मृतः ॥ २५ ॥ ब्रह्मेतिपरमात्मेति परब्रह्मेतिगीयते ॥ तत्तद्गुणानुसारेण चंद्रःसूर्योनिलोनलः
॥ २६ ॥ मनुरिंद्रश्चवरुणो रुद्रउग्रःप्रजापतिः ॥ हिरण्यगर्भःसविता सुपर्णोयज्ञईश्वरः ॥ २७ ॥ इत्याद्यनंतनामासा वेकएवमहे--
श्वरः ॥ सर्वजन्मादिकृद्वेदैः सर्वैर्विष्णुरुदीर्यते ॥ २८ ॥ संतप्तस्त्रिविधैस्तापै र्मग्नःसंसारवारिधौ ॥ तमेवशरणंयाया द्भक्त्यानन्यधि-
यान्नरः ॥ २९ ॥ तस्मादेवलभेन्मोक्षं संतुष्टाद्दृढभक्तितः ॥ मयेत्थंकथितोविप्राः प्राणस्यचहरेरपि ॥ महिमासर्वदेवानां मुख्योर्थो-
यंश्रुतोस्तिवः ॥ ३० ॥ इतिश्री विष्णुरहस्ये प्राणेश्वरमहिमावर्णनन्नामाऽष्टादशोध्यायः ॥ १८ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीवेदव्यासायनमः ॥ हारीतउवाच ॥ कथंसूतमहाभाग त्रिविधस्तापउच्यते ॥ कथंहिशरणंयाया द्धरिंवैभक्तवत्सलं ॥ १ ॥
कथंतस्यप्रसादःस्या त्प्रसन्नःकिंप्रयच्छति ॥ भक्तिर्नामकथंतस्य दार्ढ्यंचापिकथंस्मृतं ॥ २ ॥ एतन्नोब्रूहिशुश्रूषून् श्रद्दधानान्महा--
मते ॥ सूतउवाच ॥ तापोहिप्रोच्यतेदुःखं तत्तुस्यात्त्रिविधंपुनः ॥ ३ ॥ आध्यात्मिकंचाधिभूत माधिदैविकमेवच ॥ आत्मामन-

स्तुतस्यैव जातंयदपराधतः ॥ ४ ॥ धनपुत्रगृहक्षेत्र कलत्रादेःप्रियस्ययत् ॥ विघातादेस्तथानिष्ट प्राप्तेश्चाप्यतिचिंतया ॥ ५ ॥
असूययाभिमानेन दुःस्वप्नाच्चवृथाभयात् ॥ स्वस्थस्यापिहियद्दुःखं तदाध्यात्मिकमुच्यते ॥ ६ ॥ भूतानिप्राणिनःप्रोक्ता स्तथाका--
शादिपंचकं ॥ सर्पव्याघ्रवराहादे स्तस्करादेर्नृपादपि ॥ ७ ॥ स्वदेहेस्वप्रियस्यापि पुत्रादेःपीडनाद्भवेत् ॥ दुःखंतथैवविस्फोट हि--
क्काकासज्वरादिना ॥ ८ ॥ भौतिकेष्विहदेहेषु जायतेदुःखमुल्बणं ॥ तदाधिभौतिकंनाम दृश्यतेखिलजंतुषु ॥ ९ ॥ दृष्टकारणही--
नंय ज्जायतेदैवयोगतः ॥ अकस्मान्मरणाद्यच्च महामारुतवृष्टयः ॥ १० ॥ दुर्भिक्षंमारकेवन्हि व्याध्याद्याईतयस्तुयाः ॥ बहुसा-
धारणालोके दृश्यंतेजंतुपीडकाः ॥ ११ ॥ तेभ्योयज्जायतेदु.ख माधिदैविकमेवतत् ॥ नहिकश्चित्तथाजंत र्नानुभूताइमेत्रयः॥१२॥
येन्स्युस्ततएतेभ्यो मुक्त्येतंशरणंव्रजेत् ॥ रक्षतीत्येवविश्वास स्तदीयोहमितिस्मृतिः ॥ १३ ॥ शरणागतिरेषास्या द्विष्णौमोक्षफ-
लप्रदा ॥ प्रियव्रतध्रुवोत्तान पादप्रल्हादनाहुषाः ॥ १४ ॥ मांधातृनलवैन्याद्याः कार्तवीर्यगयादयः ॥ इक्ष्वाकुरघुपार्थाद्याः सगरोभर-
तादयः ॥ १५ ॥ महाबलामहावीर्याः सार्वभौमाःसहस्रशः ॥ दीर्घायुषोदक्षदेहा महासकलसंपदाः ॥ १६ ॥ यत्रोद्विग्नाइमेता--
पैः प्रयाताशरणंहरिं ॥ तत्रस्वल्पायुषोमर्त्या मंदभाग्यात्युपद्रुताः ॥ १७ ॥ नयांतिशरणंविष्णुं नजानेदुर्मतिंनृणां ॥ भाग्यमां--
द्यमिदंचैषां वर्णयामःकियद्वयं ॥ १८ ॥ त्यजंतिविषयाएना न्नत्यजंतिचतानमी ॥ समृद्धंराज्यमुत्सृज्य योषित्पुत्रादिसंपदः॥१९॥

यातास्तेशरणंविष्णुं तपसावनमास्थिताः ॥ इमेहिदुर्भगामर्त्याः सर्वसंपद्विवर्जिताः ॥ २० ॥ निजैर्लोकैःपरित्यक्ता सुत्दृद्भार्यासु-
तादिभिः ॥ अनश्नुवानाक्षुधिता अन्नमप्यात्मवांच्छया ॥ २१ ॥ कुतोवासःकुतःशय्या भोगाश्चस्वप्नदुर्लभाः ॥ देवेनापित्द्दतानर्था
न्वांछंत्येतेपुनःपुनः ॥ २२ ॥ वांछंतोहिमृताःप्रायः केचित्प्राप्यापिवांछितं ॥ असूयेर्षादिभिर्दोषै र्लब्धस्थैर्यस्यचिंतया ॥ २३ ॥ दं-
दत्यमानाअनिशं विमूढाबद्धमत्सराः ॥ भुंजंतेविषवद्भोगान् यत्नलब्धानपिस्फुटं ॥ २४ ॥ ईदृशेष्वपिभोगेषु कालेनविहतेष्व--
पि ॥ स्मृत्वास्मृत्वातपत्येव दारिद्र्यादपिभूरिशः ॥ २५ ॥ नहिवंध्याश्नुतेदुःखं यथाहिमृतपुत्रिणी ॥ नदरिद्रस्तथादुःखी लब्ध--
क्षीणधनोयथा ॥ २६ ॥ यथैवेहतथास्वर्गे भोगइत्यवधार्यतां ॥ दृश्यंतेकतिचिल्लोके यत्नतोलब्धवांछिताः ॥ २७ ॥ अपूर्णभोग-
वांछास्ते यांतिकालवशंनराः ॥ नेनीयमानाःकालेन क्रोशंत्यपिविचेतसः ॥ २८ ॥ ममपुत्रास्त्रियोमेमे धनंहाहावृथागतं ॥ हाहा--
सुतामेशिशवो योषितोयौवनेस्थिताः ॥ २९ ॥ वृथाप्रयांतिगेहानि रचितान्यतियत्नतः ॥ अहोचित्रमहोचित्रं म्रियमाणोप्ययंन-
रः ॥ ३० ॥ चिंतांवहतिपुत्रादे र्महामोहस्यजृंभितं ॥ क्वत्यःपुत्रःकुतस्त्यास्त्वं कुतस्त्यायोषितादयः ॥३१॥ मृतोनावर्ततेकोपि न--
पुनर्दर्शनंततः ॥ कुतोबध्नात्ययंचित्तं नीयमानोयमालयं ॥ ३२ ॥ यत्प्रियार्थमयंचक्रे पापेनापिधनार्जनं ॥ बुभुजेविषयांदुष्टा न्सो-
पिदेहोत्रसंस्थितः ॥ ३३ ॥ किंपुनस्तनयानार्यो धनवाजिगजादयः ॥ पुण्यपापसहायोय मेकएवहिगच्छति ॥ ३४ ॥ वृथापश्चा--

त्तपत्येष भुंजानोनिरयान्बहून् ॥ प्रयांतिपुत्रदाराद्याः स्वस्वकर्मार्जितागतीः ॥ ३५ ॥ दानंपुण्यंकृतंचेत्स्या दनेनास्मिन्हिजन्मनि ॥
तर्ह्येवकिंचिद्भुङ्क्तेसौ विषयांश्चंचलानपि ॥३६॥ तत्रापिदुःखमेवांते पूर्वोक्तविधयाभवेत् ॥ यथैवधूर्तादुर्मंत्रै र्मोहयित्वामनोनृणां
॥ ३७ ॥ तथैवंसास्मितापांगै र्विलासैर्विविधैस्त्रियः ॥ यूनांमनांसिसंमोह्य सर्वस्वानिहरंत्यहो ॥ ३८ ॥ तथैवचटुलालापै र्मुग्ध--
क्रीडनकैरपि ॥ बालाविमोह्यचेतांसि हरंत्यस्माद्धनान्यहो ॥ ३९ ॥ वृथैवकेचिदासक्ताः प्रियाण्येषांहिकुर्वते ॥ यत्रयत्रमनोह्य--
र्थ मयंबध्नातिदुर्मतिः ॥ ४० ॥ माभूदनिष्टमस्येति चिंतयातप्यतेनिशं ॥ खिद्यत्यप्रियसंप्राप्तौ प्रियस्यापिवियोगतः ॥ ४१ ॥ त-
थैवचिंतयाप्येषा मनिशंदुःखभागयं ॥ नजानेयंकदातेभ्यो लभतेसुखविप्रुषः ॥ ४२ ॥ पुराहिभरतोराजा त्यक्त्वाराज्यंसमृद्धिमत् ॥
सक्तोहरिणशावेभू त्ततोभूद्विस्मृतिर्हरेः ॥ ४३ ॥ नोपद्रवेयुस्तंशावं वृकाद्याःक्रूरजंतवः ॥ बुभुक्षावापिपासावा नतंबाधेतकर्हिचि-
त् ॥ ४४ ॥ इत्येवंसततंचिंता मग्नःस्नानादिकर्मसु ॥ नसस्मारहरिंजातु वृथास्नेहनियंत्रितः ॥ ४५ ॥ ध्यायन्नेवतमेवांते जहौप्रा-
णांस्ततःपरं ॥ मृगदेहमसौप्राप्त स्तत्रेमेमानवाःकथं ॥ ४६ ॥ गृहक्षेत्रसुतस्त्रीषु सक्ताःसुखमवाप्नुयुः ॥ कथंवास्वहितार्थाय कुर्वी-
रन्पुण्यकर्मच ॥ ४७ ॥ कथंवास्वस्यमुक्त्यर्थं स्मरेयुर्विष्णुमीश्वरं ॥ ध्यायतोमनसाविष्णु र्मोचयेत्कर्मबंधतः ॥ ४८ ॥ ददात्यप्यै-
हिकेष्टानि तादृशंहिमनोनृणां ॥ ह्रियतेसुतभार्याद्यै रन्यैर्दुर्विषयैस्तथा ॥ ४९ ॥ दस्यवोहिवरंतेभ्यो धनमात्रापहारिणः ॥ एवमे-

30

तेहिविषया ऐहिकामुष्मिकादमुं ॥ ५० ॥ मुष्णंतिसुखतोदुःखं ददत्युभयतःस्फुटं ॥ इत्थंबहुलदुःखेस्मि न्संसारेसुखविप्रुषि ॥
॥ ५१ ॥ सक्तोभवतिमूढात्मा विद्वानुद्विजतेमुतः ॥ एवंजानंतिमुनय स्तापान्नानाविधानिमान् ॥ संसारेनुभवंतोपि नाविंदंतिवि
मोहिताः ॥ ५२ ॥ इतिश्री विष्णुरहस्ये तापत्रयवर्णनन्नाम एकोनविंशोध्यायः ॥ ॥ १९ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीवेदव्यासायनमः ॥ गोभिलउवाच ॥ वृद्धौचमातापितरौ साध्वीभार्यासुतःशिशुः ॥ अप्यकार्यशतंकृत्वा भर्तव्यामनुरब्रवी
त् ॥ १ ॥ चत्वारितेतातगृहेवसंतु सदानुषक्तस्यगृहस्थधर्मे ॥ वृद्धोज्ञातीरवसन्नःकुलीनः सखादरिद्रोभगिनीचानपत्या ॥ २ ॥ ऋ-
तुस्नातांतुयोनारीं संनिधौनोपगच्छति ॥ घोरायांभ्रूणहत्यायां युज्यतेनात्रसंशयः ॥ ३ ॥ रविग्रहेकुरुक्षेत्रे मेषकृष्णाजिनादिकं ॥
चांडालात्प्रतिगृह्यापि यजेतावश्यकर्मखैः ॥ ४ ॥ इत्यादिनानाशास्त्रेषु येषामुक्तंहिपोषणं ॥ आवश्यकंत्वयातेषां पापमूलत्वमी
रितं ॥ ५ ॥ दृश्यतेप्रत्यवायोपि भार्यासंगमकुर्वतः ॥ प्रजावृद्धिःप्रियासंग स्त्वयादुःखदईरितः ॥ ६ ॥ ज्योतिष्टोमादयोयज्ञाः प्रो-
क्तास्त्वावश्यकाइति ॥ फलंस्वर्गश्रुतंयेषां त्वयातेपिनिराकृता ॥७॥ कथमत्रविधेयंस्या न्निवृत्तेनमुमुक्षुणा ॥ तद्याथातथ्यतोब्रूहि व-
यंशुश्रूषवोयतः ॥ ८ ॥ सूतउवाच ॥ पितादशैवमनुष्याणां मातातस्माद्दशाधिका ॥ सखाहिपरमोजाया जन्मज्योतिःसुतःस्मृतः

वि० र०
३१

॥ ९ ॥ अन्येप्यनाथायेत्रस्युः पितृमातृस्वबांधवाः ॥ सुहृद्दोंधदीनबधिर मूकव्यंगाश्चरोगिणः ॥ १० ॥ अतिथ्यभ्यागताविप्रा दा-
सदासीपशुव्रजाः ॥ एतेपोष्यागृहस्थस्य यावत्स्याच्छाक्तवैभवं ॥ ११ ॥ आश्रमाणांहिसर्वेषा माश्रयोयंगृहाश्रमः ॥ द्वारंस्वर्गस्यमो-
क्षस्य नरकस्याप्ययंस्मृतः ॥ १२ ॥ योवजानातिशक्तोपि द्वेषाल्लोभान्मदादपि ॥ पूर्वोक्तपोष्यान्संप्रेया न्मृतोनिरयमुल्बणं ॥
॥ १३ ॥ अकीर्तिंलभतेजोव न्नकोर्तेर्मरणंवरं ॥ नैवगृण्हंतिनामास्य योपकीर्त्यैहजीवति ॥ १४ ॥ धिक्तस्यजीवितंयस्य नामनस्तु
वतेजनः ॥ यदिस्वार्जितवित्तेन पुष्णीयान्निजपोषकान् ॥ १५ ॥ सक्तचेताहिभोगेषु स्वर्गलोकमवाप्नुयात् ॥ असक्तचेताभोगेषु वि-
ष्णुभक्तिपरायणः ॥ १६ ॥ क्रमेणप्राप्नुयान्मोक्षं ततोनावर्ततेपुनः ॥ मनएवहिसर्वेषां बंधनंमोक्षकंतथा ॥ १७ ॥ विषयासंगिबं-
धाय तद्विरक्तविमुक्तये ॥ भोगबुध्याहियःस्त्रीषु सक्तःपित्रादिकेष्वथ ॥ १८ ॥ उदासीनोथवाद्वेषी सघोरनरकंव्रजेत् ॥ यश्चस्त्रीष्वपि-
वैषम्यं कुर्यात्स्नेहविशेषतः ॥ १९ ॥ सोपिपापमवाप्नोति वैषम्यंपापसाधनं ॥ यथायोगंतुयःसर्वा न्यथाहारंयथावयः ॥ २० ॥
यथाक्रमंयथान्यायं यथाशक्तिचयोभवेत् ॥ सर्वेष्वपिव्रजंत्येव स्वर्गनानाविधंनराः ॥ २१ ॥ कीर्तिंचलभतेलोके ततःस्यात्पुण्यवर्ध-
नं ॥ अन्यथानिरयंगच्छे दपकीर्तिंचविंदति ॥ २२ ॥ यावदत्रभवेत्कीर्तिः पापकीर्तिश्चदेहिनां ॥ स्वर्गेवानरकेताव दवाप्नोतिनसंश-
यः ॥ २३ ॥ अनित्यस्येहदेहस्य फलंत्रितयमीरितं ॥ ऐहिकंसंततिःकीर्तिः कर्मचामुष्मिकंस्मृतं ॥ २४ ॥ समीचीनासमीचीन त- तया

अ० २०
३१

यातद्द्विविधंमतं ॥ शुभंचाप्यशुभंतेन देहिनाप्राप्यतेफलं ॥ २५ ॥ भावयित्वातुसर्वेषु योषित्पुत्रधनादिषु ॥ स्वीयत्वंपरमंविष्णो
स्तद्भक्त्यातान्भजत्यपि ॥ २६ ॥ संगमेतुष्यतेनैव वियोगेनैवशुष्यति ॥ उदासीनतयास्थित्वा योगृहेषुगृहाश्रमी ॥ २७ ॥ श्रवणं-
मननंध्यानं योहरेःसततंचरेत् ॥ मनस्तत्रैवबध्नीया न्नैवानित्येषुकर्हिचित् ॥ २८ ॥ विरक्तःसर्वकामेभ्यः स्ववर्णाश्रमकर्मकृत् ॥
सर्वत्रपश्येद्योविष्णुं ससाक्षाद्धरिमीक्षते ॥ २९ ॥ लभेतापिततोमुक्तिं विमुक्तःकर्मबंधतः ॥ सृष्ट्यादौविष्णुनापूर्वं विहितंसृष्टिहेत
वे ॥ ३० ॥ पुंस्त्रीयोगेनमिथुनं नावजानीततत्स्त्रियं ॥ यदेतल्लोहितंस्त्रीणा मृतुकालेप्रजायते ॥ ३१ ॥ वन्हिर्हिदैवतंतत्र बीभत्सेत
ततोनतत् ॥ यच्चरेतोमनुष्याणां सूर्यस्तत्राधिदेवता ॥ ३२ ॥ बीभत्सेतततोनैत त्तद्योगादेहसंततिः ॥ स्वर्गाद्वानरकाद्वापि लोका-
द्वापियतःकुतः ॥ ३३ ॥ कर्मशेषयुतोजीव स्तत्तत्कर्मानुसारतः ॥ यमदूतैरप्रमत्तैः स्वन्नपानादियोगतः ॥ ३४ ॥ प्रवेश्यतेपितुर्दे- तै:
हे रेतःसंक्रमतेक्रमात् ॥ ततःकालेविशेन्मातु गर्भेलोहितयोगतः ॥ ३५ ॥ जायतेदैवयोगेन कलिलंतुतयोर्द्वयोः ॥ पृथिवीजलसं-
युक्तं पक्वंवन्ह्यर्कतेजसा ॥ ३६ ॥ घनीभूतेततस्तस्मिन् रेतसास्थ्नांविनिर्मितिः ॥ रुधिरात्स्नायुमांसादि निर्माणंकुरुतेहरिः॥३७॥
सहिप्राणसखोदेहे तिष्ठंन्नचयतेखिलं ॥ योषित्स्याल्लोहिताधिक्ये वीर्याधिक्येपुमान्भवेत् ॥ ३८ ॥ तृतीयमन्यथाभावे व्यंगः-
स्यात्पूर्वकर्मतः ॥ अंगानांन्यूनताधिक्ये गौरश्यामादिकंतथा ॥ ३९ ॥ मातुरन्नरसांशेन वर्धमानतनुस्ततः ॥ कालेनिर्यातिदेहो-

यं येनियंत्रप्रपीडितः ॥ ४० ॥ विसंज्ञोजायतेपूर्वं लब्धसंज्ञश्चरोदिति ॥ ततोयज्जायतेदेहे सर्वैस्तज्ज्ञायतेखिलं ॥ ४१ ॥ इत्थं-
हिजायतेसृष्टि स्ततोदेहस्यवृध्धय ॥ माययासृजतिस्नेहं मात्रादीनांशिशौक्रमात् ॥ ४२ ॥ यथायथावर्धतेयं तथास्नेहोपिवर्धते ॥
गुणाधिक्येविशेषेण यथास्नेहंचखिद्यति ॥ ४३ ॥ यस्ययस्ययथास्नेहो यत्रयत्रचवस्तुनि ॥ तेनतेनतथाखिद्य स्नेहोदुःखस्यकारणं
॥ ४४ ॥ यावतादेहयात्रास्या त्तावद्देवसुतादिषु ॥ कुर्वीतस्नेहमाधिक्या द्दुःखाधिक्यमवाप्नुयात् ॥ ४५ ॥ मनोहिपरमंन्क्रुणां ये-
नस्याद्ब्रह्मदर्शनं ॥ तादृशंतुमनःस्नेहात् भृशंयातिक्षणेक्षणे ॥ ४६ ॥ अनित्यत्वाद्विनाशादि संभूतश्चिंतयानिशं ॥ तथैवस्वन्नपा-
नादे श्चिंतयाप्रियवस्तुनः ॥ ४७ ॥ परोक्षेप्यापरोक्षेपि यथास्नेहंहिखिद्यति ॥ अहंतासर्वदादेहे ममतादेहयोगिषु ॥ ४८ ॥ सदा-
जागर्तितेनायं प्रायोदुःखंसमश्नुते ॥ सुखविप्रुषिसक्तोयं वेत्तिनोदुःखसागरं ॥ ४९ ॥ तस्माद्दुःखस्यहानाय नातिस्नेहमिहाचेर-
त् ॥ सहसानैवशक्नोति स्नेहंत्यक्तुमशेषतः ॥ ५० ॥ देहादिषुततःप्राज्ञो विरजेतशनैःशनैः ॥ यथायथाविरक्तोयं जायेतात्मसुता-
दिभिः ॥ ५१ ॥ तथातथानिबध्नीत मनोविष्णुपदांबुजे ॥ लभेतार्थनिजानंद संदोहानुभवंतथा ॥ ५२ ॥ ग्रासेग्रासेयथापुष्टि स्तु- ३२
ष्टिर्नाशिःक्षुधोपिच ॥ कालेकालेत्रयंत्वेत द्भुंजानस्यभवेदिह ॥ ५३ ॥ नित्यंनैमित्तिकंकर्म कृत्वाविष्णौसमर्पयेत् ॥ नैवतद्बीज-
तांयाति भ्राष्ट्रक्वथितधान्यवत् ॥ ५४ ॥ काम्यकर्मविकर्मभ्यां मुक्तचेताःशनैःशनैः ॥ हरिध्यानाग्निनाध्याना क्रमाच्छुत्धमनाअ-

३२

पि ॥ ५५ ॥ जातापरोक्षधीर्विष्णोः परमंसाम्यमेत्यथ ॥ मुक्तसंसारबंधोसौ बद्धानन्यान्प्रपश्यति ॥ ५६ ॥ अनित्येबद्धचित्तस्य
नित्यंसक्तवतःस्वयं ॥ युक्तएवोभयभ्रंशो अधःपातःफलंस्फुटं ॥ ५७ ॥ बंधायविषयासक्ति र्दुःखायापिहिसाभवेत् ॥ तस्मादस-
क्तोदेहादौ यदृच्छालाभतुष्टधीः ॥ ५८ ॥ पूर्वकर्मार्जितान्भोगान् भुंजानश्चक्षणेक्षणे ॥ विष्णुमायामिदंपश्य न्नत्दृष्यतिनतुष्य-
ति ॥ ५९ ॥ कार्याकार्यविधिंसम्यक् शास्त्रदृष्ट्याकरोतिच ॥ स्वतंत्रतांहरेःपश्य न्सर्वस्यतदधीनतां ॥ ६० ॥ तद्व्याप्तिमापिसर्वत्र
पश्यन्नैवविमुत्यति ॥ तदाज्ञैवेतिविज्ञाय कालेयायात्स्वयोषितं ॥ ६१ ॥ तस्यैवपोष्यादेहाद्याः मत्वेत्थंपोषयेच्चतान् ॥ लिप्य--
तेनचपापेन पद्मपत्रमिवांभसा ॥ ६२ ॥ अत्रैवोदाहरंतीम मितिहासंपुरातनं ॥ विदेहोजनकःपूर्व शुकाच्छृण्वन्हरेःकथाः ॥
॥ ६३ ॥ सक्तंचैतानचाज्ञासी त्स्वान्नपानादिकंचन ॥ तादृशंतन्मनोज्ञात्वा तमेवेक्ष्यजगौकथां ॥ ६४ ॥ अपाहसन्मिथोलोका
येन्येतत्रसमागताः ॥ अयंराजेतिलोभेन तस्यैवमुखमुन्मुखः ॥ ६५ ॥ शुकःश्रावयंतगाथां वीतरागोपिनान्यथा ॥ तद्विदित्वासृ-
जन्मायां महायोगेश्वरःशुकः ॥ ६६ ॥ मिथिलायामभूद्वान्हिः सहसादहतगृहान् ॥ तत्प्रदेशगृहान्श्रुत्वा विव्हलाद्रुद्रुवुर्जनाः ॥
॥ ६७ ॥ वन्हिर्हिसर्वतोदिक्षु प्रजज्वालान्खिलान्गृहान् ॥ तत्तत्प्रदेशसद्मानो दुद्रुवुस्तेखिलाजनाः ॥ ६८ ॥ शुकोवक्तानृपःश्रो-
ता द्वावेवासांबभूवतुः ॥ तदामात्यगणाभूप मभ्येत्योच्चैःप्रचुक्रुशुः ॥ ६९ ॥ राजन्सर्वापुरीदग्धा हास्तिनोमंदिराअपि ॥ कोशा-

वि० र०
३५
३३

गाराणिशुत्धांता नकिंचिदवशेषितं ॥ ७० ॥ कंवयंशरणंयामः किंब्रूमःकिंचकुर्महे ॥ सकुटुंबावयंदग्धा हाहापश्यतवैशसं ॥ ॥ ७१ ॥ नहीदृशंपुराक्वापि दृष्टंवाश्रुतमप्यहो ॥ विनाकल्पांतमेषोग्निः कल्पांतइवदीप्यति ॥ ७२ ॥ अयंशुकोमहायोगी त्वंचराजामहानसि ॥ तथाविधेहियेनस्या च्छिष्टानामवशेषणं ॥ ७३ ॥ तेषामित्थंवचःश्रुत्वा तानुवाचसभूपतिः ॥ भक्तत्वेनमहाविष्णो र्युष्माकंसंमतावयं ॥ ७४ ॥ तत्कथंविप्रियंतस्य कुर्मोभक्तिविरोधिकृत् ॥ भक्तिर्हिपरमःस्नेहो विप्रियाचरणात्कथं ॥ ७५ ॥ अनपायोभवेत्तस्मा न्नेच्छामोविप्रियंहरेः ॥ सएकःसृजतेविश्वं पालयत्यपिहंतिच ॥ ७६ ॥ यद्यद्यदायदावांछे त्तत्तत्कुर्यात्तदातदा ॥ इदानींयदितस्येच्छा मिथिलादहनेहरेः ॥ ७७ ॥ तत्रस्थानांचसंहार स्तदेवेष्टंहिनःपरं ॥ अनंतंबूथमावित्तं यस्यमेनास्तिकिंचन ॥७८॥ मिथिलायांप्रदीप्तायां नमेकिंचनदह्यति ॥ नह्यस्माकंस्वदेहोपि मनाक्स्वातंत्र्यमीक्ष्यते ॥७९॥ तत्कथंवन्हिशांत्यर्थं धृष्टंतत्कुर्महेवयं ॥ नह्ययंस्वेच्छयादेहः प्राप्यतेसर्वजंतुभिः ॥ ८० ॥ तिष्ठतिस्वेच्छयानैव नप्रयातिनिजेच्छया ॥ स्वयमत्तिस्वकांजिव्हांसुप्तोयातिवदत्यपि ॥ ८१ ॥ निजश्वासविमोक्षेपि नह्यस्यास्तिस्वतंत्रता ॥ अहोधार्ष्ट्यमहोधार्ष्ट्यं किंवयंवर्णयामहे ॥ ८२ ॥ महेश्वरस्यवस्तूनां यदहंममतानृणां ॥ काष्ठादिपुत्तलीप्रायो विड्भस्मपरिपाकवान् ॥ ८३ ॥ देहोयंदृश्यतेतास्मि न्परतंत्रेप्यहंमतिः ॥ उत्पद्यंतेविवर्धंते नश्यंत्यापेहरीच्छया ॥ ८४ ॥ तत्रस्त्रीदेहपुत्रादौ ममताज्ञानिनामहो ॥ ईशावास्यमिदंसर्वं दृश्यतेश्रूयतेपियत्

अ० २०
33
३५
३३

33

॥ ८५ ॥ तेनदत्तेनपुष्टयेत वृथातृष्णान्यवस्तुनि ॥ ददात्वेषहरत्वेष जीवयत्वेषहस्वयं ॥ ८६ ॥ मत्प्रियस्यमहाविष्णोः प्रियंप्रेष्टतमं-
मम ॥ गतंगतमिदंहाहा ममायुर्नवृथाभवेत् ॥ ८७ ॥ अंतरायोभवेन्मात्र दुर्लभेश्रवणेहरेः ॥ यःसखासर्वकालेषु सर्वेष्टानांचपूरकः
॥ ८८ ॥ यद्विनाशस्यचिंतानो नचिंतायस्यसंपदां ॥ मनोमात्रेणयःसेव्य स्तध्यानाधिकृतंमनः ॥ ८९ ॥ कदाचिन्मिलितैःक्षुद्रै र-
नित्यैकार्यबंधुभिः ॥ वृथापापकरैर्नित्यं संपदामपहारकैः ॥ ९० ॥ प्रकाशतस्करैर्नित्यं न्हियतेस्मात्किमद्भुतं ॥ नित्यानंदहरेवि--
ष्णो प्रियप्रेष्टतमोसिमे ॥ ९१ ॥ यद्यदिच्छसितत्तन्नः परमिष्टतमंभवेत् ॥ इतिब्रुवतिराजेंद्रे सर्वैमात्यगणास्तुते ॥ ९२ ॥ जज्वलु-
र्वन्हिनानेन ततोज्वालानृपंशुकं ॥ पस्पर्शुनचचालासौ स्वासनादीषदप्यहो ॥ ९३ ॥ देहेचटचटाशद्बे जायमानेपिवन्हिना ॥
नामुंचत्धरिपादाब्जं मनसाजनकोनृपः ॥ ९४ ॥ विदित्वातस्यदार्ढ्यंत द्विष्णुभक्तस्यभूपतेः ॥ मायांन्यवारयद्योगी पस्पृशेपाणि--
नानृपं ॥ ९५ ॥ धन्यधन्यमहाराज बत्धचित्तेहरेत्वयि ॥ नाद्भुतंत्वादृशैश्चीर्ण प्रल्हादादिभिरीदृशं ॥ ९६ ॥ अन्येपिहरिभक्तायेत--
द्बत्धदृढसौत्हृदाः ॥ तमेवेष्टंप्रपद्यंते तदर्थमोक्षवांछकाः ॥ ९७ ॥ अथवामध्यमास्तेतु मोक्षार्थंहारिभक्तयः ॥ विषयैर्बत्धचित्तास्ते
द्वेषमत्सरतत्पराः ॥ ९८ ॥ परेषांवित्तदारादे र्हरणोपायचिंतकाः ॥ वृथामानावृथाज्ञाना वृथापंडितमानिनः ॥ ९९ ॥ देहेहंबुत्ध-
योमूढा धनादौममबुत्धयः ॥ प्राप्नुवंतिनतत्सौख्यं हरिचिंतनजंमहत् ॥ १०० ॥ क्षणेक्षणेप्रपद्यंते तापंयद्यपिदुर्धियः ॥ नविंदं-

तिमहाविष्णो र्मायामुषितचेतनाः ॥ १०१ ॥ ईदृशाअपिकालेन बाल्यभक्त्यापिसंस्कृताः ॥ जन्मजन्मांतराभ्यासा त्यक्तचित्ताः-
शनैःशनैः ॥ १०२ ॥ मध्यमोत्तमभावेन यांतिविष्णोःपरंपदं ॥ मुकुंदेविमुखायेतु सर्वथाबाल्यतोपिच ॥ १०३ ॥ शशशृंगायतेते--
षां किंवदंत्यपिमोक्षतः ॥ इतिब्रुवतियोगींद्रे नतत्राग्निरदृश्यत ॥ १०४ ॥ सर्वेपरस्परंदृष्ट्वा किंकिंजातंमहद्भुतं ॥ विस्मिताजह-
सुःकेचि त्ध्यायंतःकेचिदासिरे ॥ १०५ ॥ वन्हिंदृष्ट्वापुरायेतु दुद्रुवुर्भयविव्हलाः ॥ योगींद्रंतेसमागम्य लज्जितानेमिरेजनाः ॥
॥ १०६ ॥ शुकोविहस्यतान्प्राह कानुश्रोतामतोत्रवः ॥ ऊचुस्तभगवन्वक्ता श्रोतायंजनकोनृपः ॥ १०७ ॥ वयंविमूढासंसारे मग्न--
चित्ताक्षमस्वभो ॥ इत्थमासीत्पुरावृत्तं भवद्भ्यःकथितंमया ॥१०८॥ तस्माच्छास्त्रेणविहितं कुर्यान्निंद्यंपरित्यजेत् ॥ अनिषिद्धंभ-
वेद्यच्च रागप्राप्तंचरेदपि ॥ १०९ ॥ असक्तचेताःसततं व्यवहारंसमाचरेत् ॥ आसक्तिरेवदोषोत्र ययादुःखंसमेत्ययं ॥ ११० ॥ उ--
त्तमोब्रह्मचारीस्या दृतौगच्छन्स्वयोषितं ॥ अनिषिद्धदिनेगच्छ न्मध्यमःपरिकीर्तितः ॥ १११ ॥ अकालेतांव्रजेत्ज्ञेयो ब्रह्मचार्यधमो-
गृही ॥ नित्यंनैमित्तिकंकर्म प्रत्यवायभियाचरेत् ॥ ११२ ॥ नकुर्यात्काम्यकर्माणि विष्णुभक्तिपरायणः ॥ नित्यकाम्यानियानिस्यु
रग्निहोत्रमुखानितु ॥ ११३ ॥ तत्कामनिरपेक्षःसं स्तानिकुर्याद्यथाविधि ॥ पुराहिमुद्गलायेंद्र स्तुष्टस्तत्तपसावदत् ॥ ११४ ॥ याहि-
स्वर्गमिदंपश्य विमानंशीघ्रमारुह ॥ मुद्गलउवाच ॥ देवेंद्रकेगुणाःस्वर्गे तान्मेवदततःपरं ॥ ११५ ॥ इदंविमानमारुह्य यामित्वंय-

३५

त्रनेष्यसि ॥ इंद्रउवाच ॥ स्वर्गेनानाविधाभोगाः प्रासादाःसुमनोहराः ॥ रम्योद्यानानिसुंदर्यो दिव्याअप्सरसश्वतं ॥ ११६ ॥ रम
यंतिविलासैस्वैः कुचनाभिप्रदर्शनैः ॥ मुक्तादामविचित्रेषु रत्नकुट्टिमभूमिषु ॥ ११७ ॥ दिव्यकस्तूरिपंकाद्यै र्धूपैर्नानाविधैरपि ॥
विचित्रैःकुसुमैश्चापि भवनेषुसुगंधिषु ॥ ११८ ॥ नृत्यवादित्रगीतानि कुर्वतीभिस्तादिच्छया ॥ मंचेषुक्रीडमानोसौ कामचारोदि-
वानिशं ॥ ११९ ॥ कामभक्षःकामभोगः स्वर्गइत्यादयोगुणाः ॥ मुद्गलउवाच ॥ स्वर्गस्यदेवदेवेंद्र यथावैवर्णितागुणाः ॥ तथैवतत्र-
येदोषा स्तान्वर्णयितुमर्हसि ॥ १२० ॥ इंद्रउवाच ॥ दोषाणांहित्रयंस्वर्गे याथातथ्येनवच्मिते ॥ प्राज्ञोनैवानृतंब्रूया न्नानृतात्पात
कंपरं ॥ १२१ ॥ भुज्यतेकृतमेवात्र किंचिन्नैवार्ज्यतेनवं ॥ दृष्ट्वाहिस्वाधिकान्भोगा नसूयाजायतेभृशं ॥ १२२ ॥ बहुकालंभुक्त--
भोगो नतृप्तिमधिगच्छति ॥ अतृप्तएवभोगेषु क्षीणेपुण्येपतत्यधः ॥ मुद्गलउवाच ॥ नेदृशंस्वर्गमिच्छामि कामंगच्छादेवस्पते ॥
तदादिशयथानस्या ज्जातुकालभयंसुखे ॥ १२४ ॥ नत्वसूयादयोदोषा बाधेरन्ममममानसं ॥ तादृशंयदिजानासि तदुपायंवदस्व--
मे ॥ १२५ ॥ इंद्रउवाच ॥ अजयंतपुरादेवाः विष्णुंयज्ञेनभूरिशः ॥ तेधर्माःप्रथमाआसं स्तेप्रापुस्तत्पदंहरेः ॥ १२६ ॥ देवाःसा--
ध्याःसंतियत्र मुक्ताःसंसारबंधनात् ॥ पश्यंतिसततंविष्णो र्लोकेसृष्ट्यादिकाःक्रियाः ॥ १२८ ॥ वैराग्यंप्रथमोयज्ञः श्रवणंमननं
तथा ॥ ध्यानंचक्रमशोयज्ञाः प्रथमाइतिकीर्तिताः ॥ १२९ ॥ पुरुषार्थेषुसर्वेषु मोक्षोहिप्रथमोयतः ॥ तत्साधनत्वादेतेषु प्रथमत्व--

मुदीर्यते ॥ १३० ॥ मार्गप्रदर्शनाल्लोके देवास्तेप्रथमामताः ॥ ध्यानसंशोधितंचित्तं स्वप्रकाशेनलेहरौ ॥ १३१ ॥ जुहुवुर्देवताःपूर्वा
यज्ञोसौप्रथमस्ततः ॥ अतःप्रथमयज्ञेन सर्वेषांप्रथमंहरिं ॥ १३२ ॥ आराधयित्वाप्रथमं पुरुषार्थमवाप्नुहि ॥ सूतउवाच ॥ इत्या-
दिश्यमुनिंशक्रः सामियायनिजंपदं ॥ मुद्गलोपितथाकृत्वा फलंलेभेतथैवसः ॥ १३३ ॥ यत्रतत्परमंविष्णोः पदंलोकेमहीयते ॥
अधिष्ठितंसुकृतिभिः देवैस्तत्रामृतोभवत् ॥ १३४ ॥ नन्यवर्ततलोकेस्मि न्विमुक्तःकर्मबंधतः ॥ ज्योतिष्टोमादयोयज्ञाः प्रोक्ताआव
श्यकाइति ॥ १३५ ॥ द्विजातीनांततःकार्या निष्कामेनैवतेखिलाः ॥ कर्मणाशुद्धचित्तत्वा द्भवेज्ज्ञानोदयोनृणां ॥ १३६ ॥ तेनप-
श्यंतिसर्वेशं तेनमुक्तिरवाप्यते ॥ प्रत्यवायीभवेत्कर्म त्यागतस्तेनमानसं ॥ १३७ ॥ मलिनीभूयपापेषु सर्वदैवविषज्यते ॥ तेना-
प्नोतिमहादुःख मधोधःक्रमशोव्रजेत् ॥ १३८ ॥ इत्थंवःकथितंविप्राः रहस्यंपरमाद्भुतं ॥ श्रुतंद्वैपायनमतं मयाशुकमुखात्पुरा ॥
॥ १४० ॥ इति श्रीविष्णुरहस्ये विंशोध्यायः ॥ २० ॥ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीवेदव्यासाययमः ॥ सूतउवाच ॥ अनादिकर्मणाबद्धान् लिंगमात्रशरीरिणः ॥ वीक्ष्यतद्बंधमोक्षाय सिसृक्षुर्भगवानभूत ॥ १ ॥
सृष्ट्वापिविविधान्देहा न्पशुवृक्षादिरूपिणः ॥ नातितृप्तइवास्त्राक्षो न्मानुषंदेहमुत्तमं ॥ २ ॥ आहारंमैथुनंनिद्रा मित्यादिनिखिले

35

ष्वपि ॥ बंधमोक्षप्रदंज्ञानं मानुषेष्वेवजायते ॥ ३ ॥ सुखविष्ठुषिदेहेस्मि न्महादुःखैःप्रपूरिते ॥ तिष्ठंतोपिनराःकेचि न्नास्त्येवेश्वर-
इत्यपि ॥ ४ ॥ अहमेवेश्वरइति केचित्प्राहुरिहोद्धताः ॥ इदंनसत्यंमिथ्यैवे त्यादिनानाप्रचक्षते ॥ ५ ॥ तेषांमतनिराकृत्यै दारि--
द्र्यंचाप्यनित्यतां ॥ आधिव्याध्यादिसिध्यर्थं विवेकायसतांनृणां ॥ ६ ॥ सृष्टवान्जगदीशोसौ बंधमोक्षायदेहिनां ॥ दुर्लभोमानु--
षोदेहः संसारभ्रमतांनृणां ॥ ७ ॥ ज्ञेयोयंपरमःपोतःसंसारार्णवतारणे ॥ यदिविंदेदिहज्ञानं तर्ह्येवामृततांव्रजेत् ॥ ८ ॥ अन्य--
थात्मविघातोस्या दूरारूढस्यपातनात् ॥ यथास्वादुफलेत्यार्जे त्वगस्थ्यादिविलोक्यते ॥ ९ ॥ रसादिगृत्थ्यतेसुज्ञै स्तथावर्तेतसं--
स्मृतौ ॥ आसक्तिर्व्यवहारेषु त्याज्याकर्मसुकाम्यता ॥ १० ॥ सुखंवर्तेतसंसारे यदृच्छालाभतोषतः ॥ इदानीमुप्यतेयत्धि नेदा-
नींतत्फलंलभेत् ॥ ११ ॥ किंतुपूर्वोप्तधान्यादे रिदानींफलमश्नुते ॥ इदानीमुप्तबीजस्य फलंकालेनलप्स्यते ॥ १२ ॥ तथात्रसं--
स्मृतौतिष्ठं श्चिंतयेत्पारलौकिकं ॥ ऐहिकंतुभवेत्पूर्वं कर्मणांपरिपाकतः ॥ १३ ॥ केचिद्राजकुलोत्पन्ना जायंतेबाल्यतोनृपाः ॥ के--
चित्पित्रार्जितेद्रव्ये तस्मादुत्पत्तिमात्रतः ॥ १४ ॥ जायंतेस्वामिनोलोके केचिद्धीनकुलोद्भवाः ॥ जायंतेसत्कुलेकेचि त्केचित्पश्वा-
दियोनयः ॥ १५ ॥ गर्भाधाःगर्भखंजाश्च सुरूपाश्चकुरूपिणः ॥ इत्थंनानाविधाभावा नेदानींतनयत्नतः ॥ १६ ॥ यथाभवंतिसर्वेपि
तथाज्ञेयाविवेकतः ॥ पचनंगमनंभक्ष्यं भुक्तिरित्यादिकर्मसु ॥ १७ ॥ दृश्यतेयत्नसाध्यत्वं दैवंतत्रापिचिंतयेत् ॥ कर्तुमिच्छाविघा--

दैवं चिंतयेत्

ताद्ये लिंगैःसम्यग्विवेकिना ॥ १८ ॥ पूर्वदेहविनाशोपि तत्तत्कर्मफलाशनात् ॥ जीवोहिदेहतोभिन्नः यथात्रापिविलोक्यते ॥ १९ ॥
यथावस्थितदेहस्य चेष्टाहानिविलोकनात् ॥ व्यवहारोमृतइति सयद्गमनतोभवेत् ॥ २० ॥ यत्स्थितौविविधाश्चेष्टा भवेयुरशनाद-
यः ॥ सएवजीवःसोप्यत्र स्वेच्छयानावतिष्ठते ॥ २१ ॥ स्वेच्छयानप्रयात्यस्मा ज्जीवतोपिपरात्मतां ॥ दृष्ट्वैवंपरतंत्रत्व मस्यज्ञेयं-
विपश्चिता ॥ २२ ॥ यःपरोत्रसएवंश सविष्णुःसशिवोहरिः ॥ ब्रह्माचसविताशक्रः सूर्यचंद्रादिनामभिः ॥ २३ ॥ अनेकैरप्यनंतैश्च
तत्तद्गुणविशेषतः ॥ स्तूयतेभगवानेकः स्त्रीरूपोहिक्वचित्क्वचित् ॥ २४ ॥ लक्ष्मीसरस्वतींद्राणी गायत्रीत्यादिनामभिः ॥ नानालिं
गोनेकरूपो वेदेषुस्तूयतेहरिः ॥ २५ ॥ सएवक्रीडनार्थाय जीवानांगतिहेतवे ॥ देहयोगेनसंसृज्य तेषुचाप्यविशत्स्वयं ॥ २६ ॥
ब्रह्माणंचतथाप्राणं तथान्यास्तत्वदेवताः ॥ देहेनियोजयांचक्रे तथाकल्यादिकासुरान् ॥ २७ ॥ स्वातंत्र्यंव्यभजत्तेषु तथाजीवेषु--
भागशः ॥ यथाराजानिजामात्यान् दत्वास्वातंत्र्यमात्मनः ॥ २८ ॥ कार्येनियोज्यतत्रत्यान् गुणदोषांश्चपृच्छति ॥ तत्तत्कार्यकृतौ-
शक्तिः स्वातंत्र्यंहिपरंस्मृतं ॥ २९ ॥ शक्त्यास्वदत्तयामात्यैः कृतेकार्येसतुष्यति ॥ सत्यांशक्तौकार्यनाशे स्वाज्ञामुल्लंघ्यवर्तते ॥ ३० ॥
कुपित्वादंडयेदेवं यथाक्रीडत्ययंहरिः ॥ नियंतृत्वेनसर्वत्र तिष्ठंजीवेषुसर्वदा ॥ ३१ ॥ स्वस्मिन्नर्धस्वतंत्रत्वं समाधायतदर्धकं ॥ वि--
भज्यशतधाभूयोऽष्टा चत्वारिंशदंशकान् ॥ ३२ ॥ प्राणेस्वातंत्र्यमाधाय द्विपंचाशत्तुवेधसि ॥ पादंचतुर्थंशतधा विभज्यदशभाग--

36

कान् ॥ ३३ ॥ जीवेस्वातंत्र्यमाधाय ततोविंशतिभागकान् ॥ अहंकारात्मकेरुद्रे तथाबुद्धौनिधायच ॥ ३४ ॥ मनोदेवेततःशक्रे
भागान्पंचदशैवतु ॥ तत्वदेवेदशांशांश्च स्वातंत्र्यंनिदधेहरिः ॥ ३५ ॥ पंचचत्वारिंशदंशान् कलिमुख्येष्वधात्स्वयं ॥ विष्णोःपरो
नचान्योस्ति स्वतंत्रःकोपिचेतनः ॥ ३६ ॥ सएवाह्वंतदुत्कर्ष ज्ञापकंतत्प्रमाणकं ॥ तस्यनिंदातदीयस्य भक्तस्यापिविनिंदनं ॥
॥ ३७ ॥ शंखचक्रादितल्लिंग धारिणांद्वेषणंतथा ॥ एवमादिर्हरेर्द्वेष स्तत्कारीदैत्यउच्यते ॥ ३८ ॥ दैत्येष्वपिकलिर्मुख्य स्ततोन्ये
तद्गणाःपरे ॥ कामक्रोधादिकान्दोषा न्नाक्रम्यात्रसमासते ॥ ३९ ॥ दंभोमानोमदोहिंसा पारुष्यंकपटानृते ॥ जायंतेतमसोवृद्धै
कलिस्तत्राधिदेवता ॥ ४० ॥ तामसान्नस्यभोगेन तामसानांचसंगतेः ॥ तामसेनस्वभावेन तमोवृद्धिःप्रजायते ॥ ४१ ॥ एवं-
सात्विकयोगेन सत्ववृद्धिःप्रजायते ॥ तदाद्वेषिप्रतीपत्वं भक्तिश्चापिहरौभवेत् ॥ ४२ ॥ वैराग्यंचक्षमासत्य मानृशंस्यंदयादयः ॥
जायंतेहिगुणाःसम्यक् श्रीपतिर्यैःप्रसीदति ॥ ४३ ॥ स्वातंत्र्यलेशदानेन जीवन्श्वसतिजृंभते ॥ भुङ्क्तेगिलतिपानादि करोत्यपि
चगच्छति ॥ ४४ ॥ हिनास्तिपातिचब्रूते तिष्ठत्युपविशत्यपि ॥ अहंकारसमाविष्टः सर्वकर्तेतिमन्यते ॥ ४५ ॥ अज्ञानेनविमूढा-
त्मा नजानातिपरात्मतां ॥ विधीनांचनिषेधानां पात्रंतस्मादयंस्मृतः ॥ ४६ ॥ पुण्यंकर्माथवापापं यज्जीवोविदधात्ययं ॥ स्वा निषेधानां
तंत्र्यमनुसृत्यैव तत्फलभागकल्पनं ॥ ४७ ॥ दैत्यानांतत्रनैवास्ति पुण्यकर्मविभागकः ॥ पुण्यभागंहरत्येषां स्वयमेवजनार्दनः ॥

37

वि० र० ॥ ४८ ॥ ब्रह्मादिकेषुपुण्यस्य यथाभागंभवेत्फलं ॥ प्रत्येकंतुततोप्यर्धं स्वयंहरातिकेशवः ॥ ४९ ॥ नीचनीचेषुदेवेषु भवत्युच्चस्व अ० २१
३७ तंत्रता ॥ तेनतद्देहतत्त्व स्वातंत्र्यमधिकंभवेत् ॥ ५० ॥ स्वोच्चेनोचस्यनास्त्येव स्वातंत्र्यंतेनकर्मणः ॥ तत्रदैवीयतत्वस्य फल-
भागुच्चएवहि ॥ ५१ ॥ प्राणेप्राणोहरिःसाक्षा द्ब्रह्मणिद्रुहिणेहरिः ॥ तेनतद्भागभोक्तास हारिरेवनसंशयः ॥ ५२ ॥ ब्रह्मणिप्राणश-
क्तिस्तु प्राणेपिब्रह्मशक्तिता ॥ जीवेष्विवयथाभागं विज्ञेयाहरिशासनात् ॥ ५३ ॥ ईशस्वातंत्र्यभागेषु मायाभागस्तृतीयकः ॥
साहिसर्वजगन्माता मूलप्रकृतिदेवता ॥ ५४ ॥ पुण्यकर्मफलंज्ञेयं सुखंतच्चहरौभवेत् ॥ क्षीराब्धौपतितंतोयं यथाक्षीरत्वमश्नुते ॥
॥ ५५ ॥ जीवकर्मसुखंतद्व त्धरावानंदतांभजेत् ॥ सुखमूर्तिरयंविष्णु रितिश्रुतिषुगीयते ॥ ५६ ॥ प्रियमस्यशिरोमोदो दक्षिणःपक्ष हरौ
उच्यते ॥ प्रमोदउत्तरःपक्ष आत्मानंदइतीरितः ॥ ५७ ॥ वस्तुविज्ञानजंसौख्य मानंदइतिकीर्तितः ॥ मोदोविषयजंसौख्यं तत्रव
स्तुविशेषतः ॥ ५८ ॥ यत्स्याद्विशेषतःसौख्यं प्रमोदःसप्रकीर्तितः ॥ उपकारेकृतेयस्त्या त्सुखंतत्प्रियमुच्यते ॥ ५९ ॥ भूमिस्थितं-
जलंनेतु मब्धिंप्रतिनयत्यते ॥ स्वभावेनगतेतस्मि न्समुद्रोनैववर्धते ॥ ६० ॥ न्यूनतातदभावेच तद्वद्विष्णोःसुखस्यच ॥ स्वानंदानं- ३७
तपूर्णाब्धेः स्वभावादागतेसुखे ॥ ६१ ॥ नाधिक्यंतदभावाद्वा सुखन्यूनत्वमिष्यते ॥ देहवृक्षेसमासीनौ सखायौपक्षिणौचिरं ॥ ६२ ॥
तयोर्मध्येतुयोज्यायां स्तस्यस्वाद्वपिप्पलं ॥ इतिप्राहश्रुतिःसाक्षा त्सारभोक्ताहरिस्ततः ॥ ६३ ॥ पापंकर्मतुयत्किंचि ज्जीवतोजा

37

यतेद्विजाः ॥ यथाभागंतत्रदैत्या जीवाश्चापिविभागतः ॥ ६४ ॥ तमःसूर्ययथानैव पश्येत्तद्वत्धरिंनहि ॥ पापंकर्मानिरीक्षेत दूरादेव
विनश्यति ॥ ब्रह्मादिदेवभागांस्तु तूलवद्दहतेहरिः ॥ ६५ ॥ तदाज्ञयाप्रवृत्तत्वा न्नतेषामपराधनं ॥ चतुःशतेषुभागेषु दशांशाजीव-
शक्तता ॥ ६६ ॥ पुण्यपापफलंताव दस्यस्यादितिनिश्चितं ॥ तावदेवालमतस्य क्षुद्रत्वादल्पशक्तितः ॥ ६७ ॥ यथाहिदृश्यतेलोके-
पिपीलमशकादयः ॥ अल्पेनैवहितुष्यंति व्यथंतेचाल्पदुःखतः ॥ ६८ ॥ पुंण्यकर्मसहायाये पुंण्यात्मानस्तुयेनराः ॥ दैत्यभागगता
त्पुंण्या त्तेभ्योंशंददतेहरिः ॥ ६९ ॥ पापकर्मसहायाये पापात्मानस्तुयेनराः ॥ देवभागगतात्पापा त्तेभ्योंशंददतेहरिः॥ ७० ॥ य
थायोगंयथायत्नं सहायेषुविधीयते ॥ पुण्यपापफलंविप्राः विष्णुनाप्रभविष्णुना ॥ ७१ ॥ मतिरुत्पद्यतेताहृक व्यवसायोहितादृ
शः ॥ सहायास्तादृशाएव यादृशीभवितव्यता ॥ ७२ ॥ पंचचत्वारिंशतोये दैत्यानांपरिकीर्तिताः ॥ स्वातंत्र्यांशास्तेचलोके ज्ञे-
यामानुषदेहिषु ॥ ७३ ॥ तदारभ्ययथानंद वृत्धिस्तत्ध्रासउच्यते ॥ तेभागास्तत्वदेवेषु विज्ञेयास्युर्यथाक्रमं ॥ ७४ ॥ दैत्यस्वातं-
त्र्यभागाना मेवंज्ञेयःपरःक्षयः ॥ शतानंदथतेभागा विज्ञेयाःपरमात्मनि ॥ ७५ ॥ महत्तत्वेतमोलेश योगाद्ब्रह्मणिकर्हिचित् ॥
अज्ञानभयलेशस्य संभूतिरवलोक्यते ॥ ७६ ॥ मुख्योहिसर्वदेवानां ब्रह्मैवपरिकीर्तितः ॥ तेनैवसहगच्छंति मुक्ताविष्णुपदंहि
तत् ॥ ७७ ॥ दैत्येषुतत्वदेवानां स्वातंत्र्यंभागशोस्तिहि ॥ ब्रह्मणश्चाथवायोश्च विष्णोरपितथैवहि ॥ ७८ ॥ पुण्यकर्मविभागस्तु

देवानांभागशोभवेत् ॥ पापकर्मविभागस्तु तत्वदैत्येषुभागशः ॥ ७९ ॥ तत्वदैत्येषुयत्पापं तद्भागीकलिरेवहि ॥ कलौनास्तिहिदे-
वानां स्वातंत्र्यंब्रह्मणाविना ॥ ८० ॥ तथाप्राणंविनाविष्णो रपिस्वातंत्र्यमीक्ष्यते ॥ तत्वदैत्यविभागास्तु कलावेवभवंतिहि ॥
॥ ८१ ॥ तेनातिपापीदुष्टात्मास्वीयैः परिवृतोखिलैः ॥ गत्वानित्यतमोद्वारि विष्णुद्वेष्टावतिष्ठते ॥ ८२ ॥ वायोर्गदाप्रहारेण ते-
हिकल्यादयोखिलाः ॥ भिन्नालिंगाःपतत्यंधे पुनरावर्तिवार्जिते ॥ ८३ ॥ अनाद्यनंतेवव्रेस्मि न्पंचकेष्टेतिदारुणे ॥ यथाब्रह्माव्रजत्ये
कः परांतमुक्तसज्जनैः ॥ ८४ ॥ तथैवदुर्जनैःसाकं परांतकलिरेकलः ॥ तमोंधयातिनैकोपि कदापिबहिराव्रजेत् ॥ ८५ ॥ येस्यु-
र्विधिनिषेधभ्यो बहिर्भूताऽगदादयः ॥ तषांसुखस्यभोक्तारो विष्णवाद्याभागशोखिलाः ॥ ८६ ॥ दुःखस्यतत्वदैत्यास्यु र्जीवस्तूभ- उभय
यभाग्भवेत् ॥ एवंविधिनिषेधानां पात्रंजीवंप्रकल्पयसः ॥ ८७ ॥ उपादिशन्निजाज्ञेति हरिःसाक्षाछ्रुतिस्मृती ॥ स्वामात्येषुयथारा
जा यथास्वातंत्र्यमीक्ष्यते ॥ ८८ ॥ कार्यसित्धिंकार्यहानिं तथायंपुरुषोत्तमः ॥ यस्यस्याद्यावतीशक्तिः शारीरीधनजापिवा ॥
॥ ८९ ॥ पुण्यपापनिवृत्तिंच तावत्कुर्यात्धरिंस्मरन् ॥ अज्ञानादथवाधाष्ट्यी त्सत्यांशक्तावपिस्फुटं ॥ ९० ॥ पुण्यकर्मनकुर्याद्यः ३८
पापंपरिहरेन्नवा ॥ सदंड्योजायतेविष्णो र्नरकान्प्रतिपद्यते ॥ ९१ ॥ तस्माद्यद्विहितंकर्म कृत्वातत्केशवेर्पयेत् ॥ तास्मिन्ननार्पितं
यत्तु तद्विलुंठंतिराक्षसाः ॥ ९२ ॥ यथात्द्यनाथोवृक्षादिः पीड्यतेनिखिलैरपि ॥ राज्ञापरिगृहीतोय स्तंनपश्यंतिकेचन ॥ ९३ ॥

38

हरेराज्ञेतिमन्वानो निषिद्धंदूरतस्त्यजेत् ॥ प्रमादात्संकटाद्धा ष्टर्ध्या द्यदिकुर्वीतपातकं ॥ ९४ ॥ प्रायश्चित्तंचरेत्तस्य नानिष्टंजायते
ततः ॥ संकीर्णनानाविधपातकानां निवृत्तिमीप्सुःशरणंव्रजेद्धरिं ॥ दयालुरेतानिनिवर्त्यशीघ्रं गुरूणिपापानिलघूकरोति ॥
॥ ९५ ॥ श्रुतिस्मृतिपुराणोक्ति ष्वायुर्वेदोनिदर्शनं ॥ अपथ्याज्जायतेरोगः पथ्यादौषधसेवनात् ॥ ९६ ॥ रोगनाशःस्फुटंदृष्टो
रसायननिषेवणात् ॥ जायतेवपुषोदाढर्थं यथादेहंयथावयः ॥ ९७ ॥ तथायथाप्रकृतिकं जीवानांजायतेफलं ॥ ब्रह्माहिसृष्टिदेवो-
त्र विष्णुःपालनदेवता ॥ ९८ ॥ सर्वेषांपालनंस्नेहा त्स्नेहोमायाहिवैष्णवी ॥ अतःसर्वेषुभूतेषु मात्रादिस्नेहतोखिला ॥ ९९ ॥ जंतू
नांदृश्यतेवृध्धि स्ततोनैनंपरित्यजेत् ॥ आश्रमाणांचसर्वेषां वरिष्ठोयंगृहाश्रमः ॥ १०० ॥ मातापितृसुतस्त्र्यादौ पोष्यवर्गेखिलेपि
च ॥ यथावयोयथायोग्यं यथाकालंयथाकृति ॥ १०१ ॥ यथाशक्तिभजेत्सर्वा स्तेनैवशुभमश्नुते ॥ नैवंकुर्याद्द्रव्यलोभा द्यदिद्वेषा
दिनाथवा ॥ १०२ ॥ तदातत्स्थितिहानेन नरकेपततिध्रुवं ॥ अनासक्तःसक्तइव स्नेहंसर्वत्रदर्शयेत् ॥ १०३ ॥ विष्णोर्मायेतिम-
न्वान स्तमेवशरणंव्रजेत् ॥ उदासीनतयातिष्ठन् गृहेषुगृहमेधिनः ॥ १०४ ॥ कुर्वाणोविधिवत्कर्म निषिद्धानिपरित्यजेत् ॥ अनि-
षिद्धान्भजेद्भोगान् यदृच्छालब्धजीवनः ॥ १०५ ॥ अकृत्वापरसंताप मगत्वाखलमंदिरं ॥ अक्लेशयित्वाचात्मानं यत्स्वल्पमपि-
तद्बहु ॥ १०६ ॥ इदानींतनयत्नेन नेदानींलभ्यतेफलं ॥ पूर्वकर्मफलस्यात्र यत्नोभिव्यंजकःस्मृतः ॥ १०७ ॥ नातियत्नंप्रकु-

वींत द्रव्यादेरार्जनेनरः ॥ येनस्याद्बुद्धिवैकल्यं परितापोमनस्यपि ॥ १०८ ॥ इहजन्मनितत्कुर्यात्कर्मप्राज्ञःसदैवहि ॥ येनाग्रे-
लभ्यतेसौख्यं यथाविष्णुःप्रसीदाते ॥ १०९ ॥ किमलभ्यंभगवति प्रसन्नेश्रीनिकेतने ॥ ब्रह्माद्यायत्प्रसादेन सदालब्धमनोरथाः
॥ ११० ॥ तस्मात्सर्वप्रयत्नेन चिंतयेत्सततंहरिं ॥ मत्वासर्वेश्वरत्वेन स्नेहःसर्वाधिकोहियः ॥ १११ ॥ भक्तिरित्युच्यतेसाचे द्विष्णौ
मोक्षफलप्रदा ॥ प्रकरोतिहारिर्यद्य दुःखमप्युत्तमंमम ॥ ११२ ॥ महाविपत्तिमग्नस्य यस्यनिश्चयईदृशः ॥ सएवदृढभक्तःस्यात्तेनां
तेसुखमश्नुते ॥ ११३ ॥ यच्चदुःखमयंकाले प्राप्नुवीततदैवहि ॥ भावयेद्भक्तिमान्विष्णौ एतस्मादधिकंमम ॥ ११४ ॥ भाव्यंदुः
खंदयालुर्मे भोजयत्यल्पमेवहि ॥ अपराधसहस्राणां कर्तारंदययाहरिः ॥ ११५ ॥ अल्पीकृत्यैवदुःखानि भोजयत्यैवनान्यथा ॥
इत्थंमहाविपन्मग्नो नचलेत्धरिभक्तितः ॥ ११६ ॥ सएवदृढभक्तःस्यात्पात्रंमुक्तेःसएवहि ॥ दुःखीदुःखाधिकान्पश्येत्सुखीपश्ये-
त्सुखाधिकान् ॥ ११७॥ आत्मानंमानशोकाभ्यां सततंविनिवर्तयेत् ॥ अवजानातिमूढात्मा मानेनायंगुरूनपि ॥ ११८ ॥ प्रवर्त-
तेदुष्टभोगे मदांधोविस्मरेत्धरिं ॥ तस्मात्सुखाधिकान्पश्यं स्वस्मिन्गर्वंपरित्यजेत् ॥ ११९ ॥ आत्मानंदुःखिनंमत्वा यदिपश्येत्सु
खाधिकं ॥ तदासूयांकरोत्येष ईर्षांचापिकरोत्ययं ॥ १२० ॥ परसौख्यासहिष्णुत्व मसूयेतिनिगद्यते ॥ परदुःखंसुखंयस्य साहीं-
र्ष्येतिनिगद्यते ॥ १२१ ॥ सुखाधिकंविलोक्यैव शोकाकुलमनामयं ॥ नकुर्यात्स्मरणंविष्णोः प्राप्नुयान्निरयंततः ॥ १२२ ॥ स्म-

39

र्तव्यःसततंविष्णु र्विस्मर्तव्योनजातुचित् ॥ सर्वेविधिनिषेधास्यु रेतयोरेवकिंकराः ॥ १२३ ॥ सर्वदायःस्मरेद्विष्णुं सर्वत्रापितमी-
क्षयंत् ॥ विधीनामपिसर्वेषां सकर्तेतिनिबोधत ॥ १२४ ॥ यस्त्वहंकारदुष्टात्मा मत्सरीहरिविस्मृतिः ॥ निषेधानांससर्वेषां कर्ता-
परमउच्यते ॥ १२५ ॥ यस्तुपूर्वोक्तभक्तिःस्या द्वेष्टाचहरिविद्विषां ॥ सएवोत्तमतांयाति विष्णुभक्तेषुनान्यथा ॥ १२६ ॥ एतन्म- भक्तः
ध्यतयामध्यो नीचत्वान्नीचइत्यपि ॥ विष्णुद्वेषाधिकत्वेन तामसाधिक्यनिर्णयः ॥ १२७ ॥ औदासीन्येनमध्यत्व मेवंजीवपरीक्ष-
णं ॥ श्रुतिस्मृतिपुराणाना मित्थंवःपरिकीर्तितः ॥ १२८ ॥ शुश्रूषुभ्योमयाभक्त्या निर्णयोव्यासस्संमतः ॥ संवादमिदमस्माकं
श्रुणयात्कथयेतवा ॥ १२९ ॥ सयातिपरमंविष्णो र्भक्तिमुक्तिंव्रजत्ततः ॥ १३० ॥ इति श्रीविष्णुरहस्ये एकविंशोध्यायः ॥ २१ ॥

॥ श्रीवेदव्यासायनमः ॥ शौनकउवाच ॥ अथप्रस्तुतमाचक्ष्व यथासब्रह्मणेहरिः ॥ उक्तवान्प्रथमांसृष्टिं सूतशुश्रुषवोवयं ॥ १ ॥
॥ सूतउवाच ॥ वासुदेवात्तुयासृष्टि स्तथासंकर्षणादपि ॥ यापूर्वमभवत्सूक्ष्मा ततोग्रेकथयत्धरिः ॥ २ ॥ श्रीभगवानुवाच ॥ त-
तएकादशेवर्षे प्रारब्धब्रह्मणोह्ययं ॥ प्रगृह्यसर्वदेवांशान् जीवांश्चाप्यखिलानपि ॥ ३ ॥ प्रद्युम्नरूपःस्वांगेषु बीजत्वेनासृजत्ततः ॥
तस्यवामांगमभव त्प्रकृतिर्देवतातःस्वयं ॥ ४ ॥ अर्धनारीकदेहोसा वर्धनारायणोभवत् ॥ तस्यदक्षिणभागेभ्यः पुरुषाज्जज्ञिरेखिलाः पुरुषाः जज्ञिरे

॥ ५ ॥ चतुर्वर्णविभेदेन नार्योवामांगतोभवन् ॥ मुखदक्षिणभागेभ्यो ब्रह्माग्निवरुणादयः ॥ ६ ॥ ऋषयोपिमरीच्याद्या येचविप्राः
स्वरूपतः ॥ जीवाःस्तेपिविनिर्जग्मु स्तेविप्रामुखजन्मतः ॥ ७ ॥ ब्रह्माब्राह्मणवर्णस्य मुख्योदेवःप्रकीर्तितः ॥ ब्रह्मादीनांतुयाःप-
त्न्यः स्त्रीजीवाब्रह्मजातयः ॥ ८ ॥ ताजातावामभागेभ्यो मुखस्यास्यार्धरूपिणः ॥ भुजाद्दक्षिणतोवायु रुद्रशेषगरुत्मतः ॥ ९ ॥
इंद्रप्रद्युम्नचंद्रार्क वसुरुद्रादयोपरे ॥ मरुतक्षत्रवर्णत्वा ज्जज्ञिरेक्षत्रजीवकाः ॥१०॥ सर्वाश्चतत्स्त्रियोवामा द्भुजाद्विष्णोर्विनिःसृताः॥
क्षत्रदेवःपरोवायुः प्रायेणक्षत्रियाःसुराः ॥ ११ ॥ कुबेरोदेवगंधर्वा दस्राद्यावैश्यवर्णकाः ॥ वैश्यजीवाःपरेविष्णो रूरोर्दक्षिणतोभव
न् ॥ १२ ॥ नार्यश्चताद्दशावामा दूरोर्जाताःप्रजापतेः ॥ कुबेरोवैश्यवर्णस्य देवतापरमोच्यते ॥ १३ ॥ यमोमानुषगंधर्वा स्तथैवा-
जानदेवताः ॥ शनिपुष्करयक्षाद्या यमदूताश्चसर्वशः ॥ १४ ॥ चित्रश्चचित्रगुप्तश्च बंदिवेतालकिंनराः ॥ विद्याधरादयोयेन्ये शूद्रव-
र्णाःसमस्तशः ॥ १५ ॥ शूद्राजीवास्तथासर्वे जातास्तद्दक्षिणांघ्रितः ॥ स्त्रियस्ताद्दशरूपास्तु तथैवाप्सरसांगणाः ॥ १६ ॥ जज्ञिरे-
वामतःपादा द्यमःशूद्राधिदेवता ॥ यमस्यान्यद्द्वियद्रूपं धर्मःसब्राह्मणःस्मृतः ॥ १७ ॥ पितरोब्राह्मणाएव क्षत्रियामनवःस्मृताः ॥
कर्मदेवास्तथाचान्ये निखिलाश्चक्रवर्तिनः ॥ १८ ॥ क्षत्रियाएवतेप्रोक्ता राक्षसाअपिशौर्यतः ॥ क्षत्रियेष्वेवगण्यंते ततस्तेभुजतो-
भवन् ॥ १९ ॥ पशुतिर्यक्पक्षिवृक्ष तृणगुल्मादयोखिलाः ॥ जीवाःपुंस्त्रीविभेदेन रोमभ्योनिःसृताइमे ॥ २० ॥ सत्वादीनांगुणा

40

नांय त्पूर्वराशित्रयंमया ॥ प्रोक्तंतस्योक्तरीत्यैव कालेनोपचितस्यहि ॥ २१ ॥ प्रवृध्यामहदादीनां सृष्टिःसर्वैतिबुध्यतां ॥ प्राकृते-
नैवदेहेन व्यतिरिक्तेनलिंगतः ॥ २२ ॥ योगःसृष्टिरितिप्रोक्ता सूक्ष्मस्थूलादिभेदतः ॥ यथायंथाघनंवस्तु तत्स्थूलमितिकीर्त्यते ॥ तत् स्थूल
॥ २३ ॥ सूक्ष्मत्वंतदभावेन परिमाणंनकारणं ॥ अर्धनारीरूपधरा देवप्रद्युम्नतोमया ॥ २४ ॥ ब्रह्मविंशतिवर्षेतु सृष्टिर्जातानि-
रूपिता ॥ एवंनानाविधैर्जीवै र्नानारूपधरैर्हरिः ॥ २५ ॥ चिक्रीडेस्वेच्छयाकाले स्वानंदपरिपूरितः ॥ उक्तोयोवर्णनिर्देशो देवा-
नांविस्तरान्मया ॥ २६ ॥ नियामकःसनैतेषा माचारस्यकथंचन ॥ सर्ववर्णाश्रमाचाराः प्रत्यवायसमुझ्झिताः॥ २७ ॥ अपरोक्ष-
विदोविष्णो र्भक्ताएकांतिनोमम ॥ अपरोक्षंविनाविष्णो र्नहिदेवत्वमाप्यते ॥ २८ ॥ तस्माद्देवपदारूढाः निश्चयादपरोक्षिणः ॥
स्वाराधकानामिष्टानि पूरयंतिममाज्ञया ॥ २९ ॥ तद्देवान्नावजानीया न्मद्भक्तस्तान्कथंचन ॥ सोपानभूतामत्प्राप्तौ मत्परीवार-
तोखिलाः ॥ ३० ॥ अंतरायोहिमद्भक्तौ भवेदुत्तमकोपतः ॥ तस्माद्यथागुणंसेव्याः रमाब्रह्मादयोखिलाः ॥ तेननिर्विघ्नमाप्नोति
मत्पदंनेदमन्यथा ॥ ३२ ॥ इति श्रीविष्णुरहस्ये प्रद्युम्नतःसृष्टिकथनंनाम द्वाविंशोध्यायः ॥ ॥ २२ ॥ ॥ छ ॥

॥ श्रीवेदव्यासायनमः ॥ सूतउवाच ॥ यथाशाल्यादिधान्यानां गृहीत्वाबीजजांकुरान् ॥ वपंतिकर्षकास्तद्व दनिरुद्धोसृजज्जगत्

वि० र० ॥ १ ॥ अथाचचक्षेभगवान् जातांसृष्टिमतःपरं ॥ यानिरुत्धादभूछांतेः स्थूलाब्रह्मांडतोबहिः ॥ २ ॥ श्रीभगवानुवाच ॥ पुरुषस्यै- अ० २३
४१ कविंशेब्दे प्रारब्धेसोनिरुत्धकः ॥ जातान्प्रद्युम्नतःसर्वान् जीवानादायलीलया ॥ ३ ॥ निधायस्वोदरेपश्चा च्छांत्यामाधत्तसर्वशः ॥
मूलप्रकृतिरूपासा गुणत्रयनियामिका ॥ ४ ॥ उपचित्यमहत्तत्वं भागैःपूर्ववदेवहि ॥ ब्रह्माणमसृजत्प्राणं सावित्रींभारतींतथा ॥
॥ ५ ॥ ततोब्रह्मासृजद्वीर्य महंकारात्मकंस्त्रियां ॥ द्विधाभूताततस्तस्मा दनंतश्चतथाशिवः ॥ ६ ॥ अनंतादप्यभूद्रुद्र स्तामसःसप्र-
कीर्तितः ॥ तैजसाहंकृतेर्भागैः प्राप्तोपिनिजयोषिति ॥ ७ ॥ उत्सृज्यवीर्यमसृज त्सरुद्रंतैजसाभिधं ॥ एवंत्रिरूपःसशिवो योग--
मायामुपाश्रितः ॥ ८ ॥ एकत्वमभजत्सोथ वामांगंस्त्रीमकल्पयत् ॥ सोनृत्यच्चिरमानंदा दर्धनारीनरेश्वरः ॥ ९ ॥ वैकारिकादिभे-
देन त्रिरूपःसोभवत्पृथक् ॥ बुत्धिरूपामुमांभार्यां तथैवविदधेत्रिधा ॥ १० ॥ वैकारिकःसत्वगुणा द्विष्णुरित्यभिधीयते ॥ तैजसो-
राजसत्वेन ब्रह्मेतिपरिकीर्तितः ॥ ११ ॥ तामसस्तुतमोयोगा द्रुद्रइत्यभिधीयते ॥ सपत्नीकैश्चतुरूपै ब्रह्मणोवर्षमेककं ॥ १२ ॥
समाधिस्थोभजद्विष्णुं महद्वैराग्यमाश्रितः ॥ ततःप्रसन्नोभगवान् प्रत्यक्षीभूयभूरिशः ॥ १३ ॥ तस्मैवरान्ददौप्रीत्या सर्वेषांजनि-- ४१
ताभवान् ॥ अहंत्वत्तोभविष्यामि किमुतान्येसुरादयः ॥ १४ ॥ तवपूजापरानित्यं तवचादेशकारिणः ॥ त्वयोपदिष्टमार्गेण मामु-
पेष्यंतिसर्वशः ॥ १५ ॥ इत्थंनानाप्रीतिवाग्भि स्तोषयित्वामहेश्वरं ॥ प्रविश्याथतमेवाशु सृष्टवानखिलंजगत् ॥ १६ ॥ इंद्रोवि-

ष्णूरविर्धाता पूषात्वष्टार्यमाभगः ॥ मित्रोवरुणपर्जन्यौ सवितााद्वादशोमतः ॥ १७ ॥ अजैकपादहिर्बुध्नी रुद्रोवामोवृषाकपिः ॥
महेशोरैवतोभीमो घोरस्तत्पुरुषोभवः ॥ १८ ॥ एवमेकादशप्रोक्ता रुद्राःप्रलयकारिणः ॥ ध्रुवःप्राणोद्युनामार्को वन्हिर्दोषोवसुर्धरः
॥१९॥ वसवोष्टाविमेप्रोक्ताः सहायाजातवेदसः ॥ सत्योवसुःक्रतुदक्षः कामःकालोधनुर्धरः ॥ २० ॥ पुरूरवाआर्द्रवश्च विश्वेदेवाद-
शस्मृताः ॥ प्राणोपानस्तथाव्यान उदानश्चसमानकः ॥ २१ ॥ नागश्चकृकलःकूर्मो देवदत्तोधनंजयः ॥ प्रवहोविवहःशंयु. संव-
हश्चपरावहः ॥ २२ ॥ उद्वहश्चावहःशंकुः कालःश्वासोनलोनिलः ॥ प्रतिभःकुमुदःकांतः शुचिःश्वेतोजितागुरुः ॥ २३ ॥ झंझाप्रवर्त-
कःकीलो दितिःसौम्यःकपिर्जडः ॥ मंडूकःसंततःसिध्दो रक्तःकृष्णःपिकःशुकः ॥ २४ ॥ यतिर्भीमोहनुःपिंगो हंप्राणकंपनःस्तथा ॥
सप्तसप्तकसंख्याका मरुतोमीप्रकीर्तिताः ॥ २५ ॥ नासत्यद्स्त्रौक्रभवः स्त्रयःपितृपतित्रयं ॥ द्यावाभूमीगुरुश्चैते सोमपाअखिला-
अपि ॥ २६ ॥ कुबेरोविघ्नपःकामो निर्ऋतिश्चंद्रमायमः ॥ गंधर्वाऋषयोयक्षाः सिध्दाद्याःनिखिलाअपि ॥ २७ ॥ अन्येपिपुरुषाये-
षां देववर्गाश्चसर्वशः ॥ जज्ञिरेक्रमशःस्तस्मा दर्धनारीनरेश्वरात् ॥ २८ ॥ कर्णाभ्यांजज्ञिरेतस्य वासुक्याद्यखिलोरगाः ॥ तेषुश्रे-
ष्ठतरायेतु तेतद्भूषणतांगताः ॥ २९ ॥ मुखाद्विनिःसृतास्तस्य वृषागावोऽश्वहस्तिनः ॥ आरण्याःपशवोग्राम्याः सर्वेनाभेर्विनिर्गताः
॥ ३० ॥ अन्येक्षुद्राश्चतिर्यंचो गुह्यादस्याविनिसृताः ॥ मनुष्यावसवोजाताः दैत्यायेराक्षसास्तथा ॥ ३१ ॥ मढ्रात्प्रजज्ञिरेतस्य वृ-

क्षगुल्मलतादयः ॥ अधोंगेभ्योखिलाजाता एवंसृष्ट्वामहेश्वरः ॥ ३२ ॥ साक्षात्परंपराभेदा न्नारीपुरुषभेदतः ॥ वामदक्षिणभा-
गेभ्यो मुमुदेबहुवत्सरं ॥ ३३ ॥ दशपंचचवर्षाणि सासृष्टिरभवत्तदा ॥ तदानीमभवत्सूत्रा द्गरुडःपक्षिरूपधृक् ॥ ३४ ॥ स्वयमेवा-
भवच्छेषो नंतनामोरगाकृतिः ॥ अंतेचरमकल्पस्य राक्षसास्तेमदाकुलाः ॥ ३५ ॥ बभक्षुर्मानुषान्सर्वान् पशुपक्षिमृगादिकान् ॥
जलस्छलचरान्क्षुद्रान् महावातेनचद्रुमाः ॥ ३६ ॥ एकीभूतास्ततोवन्हि र्ददाहाथाऽखिलाःसुराः ॥ राक्षसान्जघ्निरेतेथ दै-
त्यान्शरणमाययुः ॥ ३७॥ दैत्याश्चराक्षसाःसर्वे युध्यंतोदैवतैःसह ॥ हतानिपतितास्तेषां वायुर्देहानशोषयत् ॥ ३८ ॥ ददाहा-
थाऽग्निरुन्नद्धो निःशेषमभवत्ततः ॥ षट्त्रिंशेथततोवर्षे ब्रह्मणःसमुपस्थिते ॥ ३९ ॥ स्त्रक्ष्यन्ब्रह्मांडमवद त्सशांतिंत्रिगुणात्मिकां ॥
अंडाकृतिंसुसत्वेन प्रथमांबहिरावृतिं ॥ ४० ॥ तन्मध्येरजसाचक्रे द्वितीयामावृतिंतुसा ॥ तदंतस्तमसास्त्राक्षी तृतीयावरणंतुसा
॥ ४१ ॥ ततोनिरुद्धनामासौ ब्रह्माणंविन्ययोजयत् ॥ महत्तत्वेनावरणं कुरुष्वेत्यथसोकरोत् ॥ ४२ ॥ अहंकारावृत्तिंरुद्र श्चकारा-
थतदाज्ञया ॥ आकाशेनावृतिंशक्रः कारयामासविघ्नपात् ॥ ४३ ॥ मरुताप्रवहेणाथ वातावरणमातनोत् ॥ तैजसावरणंचक्रे जा-
तवेदास्तदाज्ञया ॥ ४४ ॥ तदंतर्वरुणोदेवो वितेनेसलिलोच्चयं ॥ तत्रैकदेशेविदधे धरादेवीभुवंततः ॥ ४५ ॥ असंसृष्टानितत्वा-
नि क्रमादेवंप्रजज्ञिरे ॥ ब्रह्मणोदशवर्षेतु पश्चाद्ब्रह्मांडनिर्मितिः ॥ ४६ ॥ इति श्रीविष्णुरहस्ये त्रयोविंशोध्यायः ॥ २३ ॥ ॥ छ ॥

४२

॥ श्रीवेदव्यासायनमः ॥ भगवानुवाच ॥ तत्वैरुपचितैरेवं स्थूलैरावरणानिसः ॥ विधायसलिलेतास्मि न्नविशन्मायायासह ॥
॥ १ ॥ चिक्रीडेथजलेतत्र भूभागेसलिलावृते ॥ वासुदेवोखिलैर्जीवै र्देवांशैरखिलैर्युतः ॥ २ ॥ वर्षद्वयेव्यतीतेथ सामायात्रिवि-
धाभवत् ॥ सत्वादिगुणभेदेन श्रीभूदुर्गेतिनामिका ॥ ३ ॥ वर्षमेकंतयासम्यगा राधितपदांबुजः ॥ वासुदेवःसभगवान् त्रिधा-
जज्ञेस्वयंततः ॥ ४ ॥ श्रियांविष्णुर्भुविब्रह्मा दुर्गायांब्रह्मसंभवः ॥ कर्तुंसृष्टिमतिस्थूलां तत्वसंसर्गमातनोत् ॥५॥ सविष्णुःकमला
कांतो लीलयैवतदाक्रमात् ॥ आकाशेयोजयामास शतांशेनसमीरणं ॥ ६ ॥ तादृशाकाशतोवायौ शतांशंसमयोजयत् ॥ एवं-
हितेजसोवायौ वायोस्तेजसिचार्पयत् ॥ ७ ॥ अपांतेजसितोयेच तेजसोंशमयोजयत् ॥ भुवस्तोयेजलस्यापि शतांशंभुव्ययो-
जयत् ॥ ८ ॥ एवंपंचापिसंसृज्य भूतानिसमहेश्वरः ॥ आप्यतैजसभौमानां पदार्थानांचसृष्टये ॥ ९ ॥ त्रिवृतंत्रिवृतंचक्रे पृथ्वी-
सलिलतेजसां ॥ चत्वारःपृथिवीभागाः एकस्तेजसएवहि ॥ १० ॥ त्रयोंशाःसलिलस्यैवं पार्थिवंराशिमातनोत् ॥ अपांभागस्तुच
त्वारः पार्थिवांशास्त्रयस्तथा ॥ ११ ॥ एकस्तुतेजसोभागो राशिमाप्यंचकारसः ॥ चतुर्भिस्तैजसैर्भागैस्त्रिभिस्तोयस्यभागकैः ॥
॥ १२ ॥ भुवएकेनभागेन तेजोराशिंससृष्टवान् ॥ भूतप्रेतादिदेहानां सृष्ट्यर्थमथचातनोत् ॥ १३ ॥ पंचभिर्मारुतैर्भागै रस्तेजस-
भुवांत्रिभिः ॥ वायवीयंपृथक्राशि मेवंराशिचतुष्टयं ॥ १४ ॥ किंचिन्यूनद्वयुगले सृष्ट्वैवक्रमशोहरिः ॥ ब्रह्मांडस्त्रष्टुकामोथ विष्णु-

लक्ष्मीमसेवत ॥ १५ ॥ निर्ममेतैजसाद्राशे रंडंतदुदरेहरिः ॥ सौवर्णतदभूत्तस्य उदरेसमवृत्तकं ॥ १६ ॥ ततोब्रह्माखिलान्जी-
वा न्देवांशानपिसर्वशः ॥ निर्गीर्यप्रविवेशापि महत्तत्वतनुंविधिं ॥ १७ ॥ अहंकारात्मनिशिवे सरुद्रोविशदीश्वरं ॥ विवेशोथाज्ञ
याविष्णो रहमात्मामहत्तनुं ॥ १८ ॥ तमशेनाग्रसद्विष्णुः सर्वजीवगणैर्युतं ॥ संसृष्टानिचभूतानि राशीभूतानियानिच ॥ १९ ॥
तान्यपिस्वोदरेचक्रे लक्ष्मीःप्रकृतिदेवता ॥ अथोविवेशब्रह्मांडं लक्ष्म्यासहमहेश्वरः ॥ २० ॥ वैकुंठमाविशल्लोकं तत्रापश्यन्निजा-
कृतीः ॥ उपास्यमानाःसंसारा न्मुक्तैर्देवगणैःसदा ॥ २१ ॥ सुदर्शनपरीवृता न्प्रलयाग्निपयांस्यपि ॥ नैवस्पृशंतियांल्लोकां च्छा-
श्वतास्तेहिवैष्णवाः ॥ २२ ॥ ब्रह्मांडेजलपूर्णेपि जललेशोपियत्रन ॥ तादृशंरमणीयंतद्वै वैकुंठाख्यंपरंपदं ॥ २३ ॥ अतीत्या-
धःसमागत्य शिश्येश्रांतइवांभसि ॥ चतुर्युगशतंपश्चा दुन्निद्रइवचाभवत् ॥ २४ ॥ ससर्जमारुतंवक्त्रा त्सोशोषयदपोखिलाः ॥
सहिसत्वात्मकोवायु र्लक्ष्म्यारूपंनचापरः ॥ २५ ॥ श्वेतद्वीपमथागत्य चिरंचिक्रीडतत्रसः ॥ ततोंधतमआगत्य ददृशेपापिनोखि
लान् ॥ २६ ॥ सदासर्वेंद्रियैःकष्टं भुंजानान्द्वेषतत्परान् ॥ तमोनारंभणंतत्तु बहुभेदमनंतकं ॥ २७ ॥ यत्रयाताबहिर्नैव निःस-
रंतिकदाचन ॥ ततोनंतासनंगत्वा विचचारनिजेच्छया ॥ २८ ॥ रममाणःकियत्कालं पुनर्वैकुंठमागमत् ॥ तावद्ब्रह्मांडकल्पांतो
भवत्प्रववृधेजलं ॥ २९ ॥ यावद्वैकुंठमभवत् ब्रह्मांडंजलपूरितं ॥ सुष्वापसलिलेतत्र यावत्कल्पनिशाभवेत् ॥ ३० ॥ संह्लाल-

४३

यंतीतत्रासी त्तत्पादौकमलासती ॥ पुनर्मारुतमुत्पाद्य शोषयित्वाखिलंजलं ॥ ३१ ॥ प्रकृत्योत्पादयामास त्रीन्गुणांश्चततोमह-
त् ॥ महतोहंकृतिंतस्या मनोबुध्यादिकांस्ततः ॥ ३२ ॥ प्रादुश्चक्रेथसंसृष्टं यदाकाशंबहिःकृतं ॥ ततोवायुंततोवन्हिं ततआपोभु-
वंततः ॥ ३३ ॥ त्रिवृद्राशित्रयंवायो रपिराशिंव्यसर्जयत् ॥ अथतन्नाभितोजज्ञे कल्पादौपद्ममद्भुतं ॥ ३४ ॥ पाद्मनामाभवत्कल्पः
परार्धांतेविधेस्तुसः ॥ उत्पद्यतेयत्प्रथमं तन्नामाकल्पउच्यते ॥ ३५ ॥ सविष्णुःपद्मनाभाख्यः तन्नाभिकमलादभूत् ॥ हिरण्यगर्भ-
नामासौ सजातोददृशेदिशः ॥ ३६ ॥ चतुर्दिक्षुचचत्वारि मुखान्यासन्महात्मनः ॥ ऊर्ध्वंप्रपश्यतस्तस्य हयाकारमभून्मुखं ॥ ३७ ॥
दंडंकमंडलुंचाक्ष मालांमुद्रांप्रबोधिनीं ॥ दधानश्चतुरोहस्तान् गलेयज्ञोपवीतकं ॥ ३८ ॥ पद्मस्यकर्णिकामध्ये निषण्णस्वस्तिकास-
ने ॥ शुद्धवासोद्वयधरं वीक्षांचक्रेंगमात्मनः ॥ ३९ ॥ तदाविष्णवाज्ञयादुर्गा जलंबिंदुभिरन्वितं ॥ विससर्जमहावातं तेनाभूत्पीडि-
तोविधिः ॥ ४० ॥ तदागाढांधकारेस्व मसहायंविलोकयसः ॥ पीड्यमानोवर्षवातैः क्षणंभीतोस्मरद्धरिं ॥ ४१ ॥ ततःस्तपतपेत्या-
सी दशरीरैवभारती ॥ समाधियोगमास्थाय निरुछ्वासोभवत्ततः ॥ ४२ ॥ दध्यावांतरमात्मानं ब्रह्मारूपंसदाशिवं ॥ दिव्यवर्षा-
युतंपश्चा दुःत्थितःससमाधितः ॥ ४३ ॥ प्रीतोथतपसातेन पद्मनाभोहरिःस्वयं ॥ कौमारंरूपमास्थाय निजरूपमदर्शयत् ॥ ४४ ॥
तदाहिरण्यगर्भोसौ वीक्ष्यतंसहसोत्थितः ॥ प्रणतःपादयोस्तस्य तेनचोत्थापितःपुरः ॥ ४५ ॥ बद्धांजलिःस्थितोभूत्वा वीक्षंस्तन्मु

निषण्णः

खपंकजं ॥ उपादिशत्ततोवेदान् सांगांत्सूत्राणिचागमान् ॥ ४६ ॥ पंचरात्रमुखांस्तस्मै ततोंतर्धानमाप्तवान् ॥ आधीताध्ययनं-
कुर्व स्तस्थौवर्षसहस्रकं ॥ ४७ ॥ मत्वाथशक्तमात्मानं विश्वसृष्टौमनोदधे ॥ अवर्धयत्ततःपद्म मधोमूलंसुविस्तृतं ॥ ४८ ॥ अंडख
र्परमारभ्य यावद्वैकुंठमूलकं ॥ ववृधेककुभोव्याप्य विश्वस्थित्यैचतुर्दश ॥ ४९ ॥ भुवनान्यसृजत्तत्र भूमेस्तुविलसप्तकं ॥ भुर्भुवस्वर्म-
हर्लोकाः जनर्लोकस्तपस्तथा ॥ ५० ॥ सत्यलोकइतिप्राहु र्भुवनानिचतुर्दश ॥ तदाधारार्थमसृज द्वैराजंदेहमात्मनः ॥ ५१ ॥ म-
हदाद्यखिलैस्तत्वै र्निर्मितंविश्वतोमुखं ॥ तत्रैवनिदधेसर्वान् जीवान्देवांशकानपि ॥ ५२ ॥ विधायपौरुषंरूपं भगवांस्तत्रचाविश-
त् ॥ तेनाभूद्दीप्यमानंत द्दिशःसर्वाश्चकाशिरे ॥ ५३ ॥ सोसृजत्प्रथमंप्राणा द्वायुंवाचःसरस्वतीं ॥ त्रिविधाहंकृतेरुद्रं त्रिरूपमसृजत्त-
तः ॥ ५४ ॥ देवीमुमांव्यधाद्रुद्रे रिंद्रंचमनसासृजत् ॥ प्रद्युम्नंचानिरुद्धंच गुरुंशुक्रंशचींमनुं ॥ ५५ ॥ दक्षंचंद्रमसंचान्या न्वासिष्ठप्र-
मुखान्मुनीन् ॥ देवर्षीन्नारदादींश्च मानसादेवसृष्टवान् ॥ ५६ ॥ दिग्देवाःश्रोत्रतोनेत्रा द्रविरग्निर्मुखादभूत् ॥ वर्णश्रेष्ठोभवद्ब्रह्मा मु-
खादेवास्यवेधसः ॥ ५७ ॥ क्षत्रदेवोभवद्बाव्हो रूर्वोर्वैश्याधिदैवता ॥ शूद्रवर्णोभवत्पभ्यां धर्मआसीत्स्तनांतरात् ॥ ५८ ॥ जिव्हा
ग्राद्वरुणोजज्ञे नासिकाभ्यांतथाश्विनौ ॥ गणपोधनदोरुद्र आदित्यावसवोखिलाः ॥ ५९ ॥ मरुतोदेवगंधर्वा मानुषाःपितरस्तथा ॥
नैर्ऋतोनिर्ऋतिर्यक्षा विद्याधरमहोरगाः ॥ ६० ॥ सर्वांगेभ्योथरोमभ्यो नखेभ्योजज्ञिरेखिलाः ॥ एवंदेवगणाःसृष्टा तात्विकाश्चाप्य

सर्वाः चकाशिरे

44

तात्विकाः ॥ ६१ ॥ तेषुयेतात्विकादेवा तेपस्पर्धुर्मिथोखिलाः ॥ अहंश्रेष्ठस्त्वहंश्रेष्ट इतितानवदद्विधिः ॥ ६२ ॥ यस्मिन्गतेप्ययंदे-
हो पतेद्यस्यप्रवेशतः ॥ उत्तिष्ठेत्स्यात्सहिश्रेष्टः किंवृथाजल्पनेनवः ॥ ६३ ॥ अथप्राणोवदत्तेषां यूयंसर्वेपिगच्छथ ॥ क्रमेणयुगपद्वा-
पि कस्ययानेपतत्ययं ॥ ६४ ॥ पश्यामइतितेजग्मु र्देहोनैवापतत्ततः ॥ अथप्राणेबहिर्याते सर्वेतेपिबहिर्गताः ॥ ६५ ॥ तत्क्षणा-
दपतद्देहो व्यशीर्यतततोपिहि ॥ ततःप्रभृतिदेहस्य शरीराख्याबभूवह ॥ ६६ ॥ दृढनिर्णयकामास्ते पुनरेवाप्यवीवदन् ॥ यत्प्र-
वेशादयंदेह उत्तिष्टेत्सवरोभवेत् ॥ ६७ ॥ इत्यादिशन्पुनस्तत्र क्रमेणयुगपद्व्रते ॥ नोत्तस्थावथतत्रैव प्राणेविष्टेसउत्थितः ॥ ६८ ॥
ततःक्षमापयित्वाते प्राणंश्रेष्ठमचीक्लृपंन् ॥ मरुद्भिःसहसप्राणः स्थितःसर्वेषुदेहिषु ॥ ६९ ॥ धत्तेव्यापारयत्येता न्मारयत्यपिनिर्ग-
मात् उत्थितोब्रह्मणोदेहो दधारभुवनान्यसौ ॥ ७० ॥ हयवत्क्रसमंयत्तु पंचमंवेधसोमुखं ॥ दुःशब्दमकरोत्तेन लक्ष्मीरुद्वेगमाप्य-
तु ॥ ७१ ॥ धनुर्दत्वाथबाणंच रुद्रमाज्ञापयत्तदा ॥ छिंधिशीर्षमिदंधातुः सतथैवतदाकरोत् ॥७२॥ ज्वलत्कालानलसमं तन्मुखं-
रुद्रमाद्रवत् ॥ भीतोथशरणंप्राप लक्ष्मींरुद्रोथविव्हलः ॥ ७३ ॥ सातत्करेकपालंत दत्वाविष्णुपदांबुभिः ॥ शमयामासतत्पापं
धौतपाप्माततोभवत ॥ ७४ ॥ अथपादतलेनाधः स्पृष्ट्वाब्रंह्मांडखर्परं ॥ आक्रमच्छिरसासत्य लोकप्रांतंचतुर्मुखः ॥ ७५ ॥ पाद-
योर्भूर्मिलोकस्तु नाभौतुभुवराश्रितः ॥ स्वर्लोकोत्हृदयेवास्य महर्लोकोस्यजत्रुणि ॥ ७६ ॥ जनलोकोस्यकंठे भूत्सत्यांशिरसिसंस्थि

तं ॥ एवंतंपौरुषंदेहं सृष्ट्वाब्रह्मासुरैःसह ॥ ७७ ॥ अदृष्ट्वान्यांस्तुसंभारा न्पुरुषावयवैर्हरिं ॥ कालस्यावयवैर्यष्टुं भक्त्यासंभार--
मातनोत् ॥ ७८ ॥ तस्मिंस्तुप्रथमेयज्ञे वसंतःसमभूद्घृतं ॥ समिधोग्रीष्मएवासी द्धेमंतश्चाभवंस्तिलाः ॥ ७९ ॥ वर्षादेवोभवद्दर्भाः
शरच्चरुरजायत ॥ शिशिरोयवतांयात इतिस्वस्वस्वभावतः ॥ ८० ॥ आसन्परिधयस्तस्य गायत्र्यादीनिसप्तवै ॥ छंदांस्येथैकविं--
शत्या दारुभिश्चेध्मआबभौ ॥ ८१ ॥ पुरुषंबर्हिषिप्रोक्ष न्साध्याश्चऋषिभिःसह ॥ तेनेजिरेखिलाविष्णुं ददृशेतैस्तदाहरिः ॥ ८२ ॥
तमस्तुवन्परप्रेम्णा ब्रह्माद्याःपौरुषैर्गुणैः ॥ देवाऊचुः ॥ अनंतशीर्षास्यकरोरुपादः सर्वत्रदर्शीपुरुषस्त्वमेकः॥ सर्वानभिव्याप्यजग-
न्निदान माद्यांपरांत्वंप्रकृतिंस्थितोसि ॥ ८३ ॥ ततोपिदूरादमितस्त्वमेको भासिस्वधाम्नादशदिक्षुभूमन् ॥ भूतंभविष्यच्चविवर्त--
मानं स्थूलंचसूक्ष्मंप्रविशन्सदैव ॥ ८४ ॥ तदात्मभूतोभ्रमतांचभुक्तिं यातामपीशोसिनहीद्रर्थैव ॥ नहित्वदीयांत्वमतोसिवृद्धो नं--
तैर्गुणैर्जेष्ठइतिस्मरंति ॥ ८५ ॥ यस्यैकदेशोंडमिदंचविश्वं चिदात्मकंचाप्यचिदात्मकंच ॥ यत्स्थानमेतत्सकलंततोपि धामत्रयं--
शाश्वतमाहुरार्याः ॥ ८६ ॥ यस्मादयंसावरणोंडकोशो विराडिदंब्रह्ममुखंचजज्ञे ॥ ८७ ॥ वयंयेनसनाथास्मः संसृतावपिमोचने ॥
सोस्तुप्रीतोलमित्येव नहीष्टंत्वमृतेस्तिनः ॥ ८८ ॥ श्रीभगवानुवाच ॥ अथोसभगवान्विष्णु र्वरान्दत्वातदीप्सितान् ॥ अंतर्दधेनिजं-
रूपं देवास्तेनैवकर्मणा ॥ ८९ ॥ यातामुक्तिंसदानंदं भुंजानाःसर्वदासते ॥ यत्रस्थानेषुसर्वेपि साध्यादेवाह्यनंतशः ॥ ९० ॥ मो--

गायत्र्यादीनि छंदांसि सप्तवै

न्हीयते व

४५

45

दंतेयेपियास्यंति तथाकृत्वाचतत्पदं ॥ अथतद्यज्ञतोजज्ञे पृषदाज्यंमलौकिकं ॥ ९१ ॥ ग्राम्यारण्याश्चवायव्याः पशवश्चापिजज्ञि-
रे ॥ तैस्तेसाध्याश्चमुनय ईजिरेविष्णुमव्ययं ॥ ९२ ॥ ऋचोयजूंषिसामानि ददृशुर्मुनयस्ततः ॥ जज्ञिरेछंदसांदेवा गावोजाविवि--
हगादयः ॥ ९३ ॥ अन्येचोभयतोदंता तथापंचनखाःपरे ॥ शफद्वयाएकशफाः शृंगिणःशृंगवर्जिताः ॥ ९४ ॥ ग्राम्यारण्याश्चवा-
यव्याः पक्षिणोंबुचरास्तथा ॥ चतुःपादाद्विपादाश्च बहुपादास्तथापदः ॥ ९५ ॥ क्षुद्रजंतुलतावृक्ष गुल्मौषधितृणादिकाः ॥ जाता-
स्तेत्रिवृदाकाराः संयोगाद्योमवातयोः ॥ ९६ ॥ वायुभागातिरेकश्च निक्षिप्तःपक्षिवृंदके ॥ तेनोत्प्लवनशक्तास्ते प्रदृश्यंतेवियच्चराः
॥ ९७ ॥ अखिलेष्वेवसृष्टेषु नैवातृप्यन्मनोविधेः ॥ ततोहिपुरुषाकाराः नरानार्यश्चनिर्मिताः ॥ ९८ ॥ तेषांज्ञानाधिकत्वेन सर्वेत--
द्दशतांगताः ॥ पौरुषेणाहिदेहेन चातुर्वर्ण्यानुलोमिना ॥ ९९ ॥ तथाविलोमिनाचापि स्वस्वयोग्यतयाखिलाः ॥ यथामतिविचि--
न्वंति ब्रह्मणस्तत्परंपदं ॥ १०० ॥ इतितेनिखिलाःश्रेष्टा नराःस्थावरजंगमे ॥ भूतप्रेतपिशाचादीन् वायवीयेनराशिना ॥ १०१ ॥
निर्ममेंतर्हितायाम संकोचाद्यास्तुशक्तयः ॥ परकायप्रवेशश्च नानारूपधृतिस्तथा ॥ १०२ ॥ तेषांस्वभावदुःखानि क्षुत्तृषापरिपीड-
नात् ॥ कादाचित्कंसुखंतेषां स्वभावाद्दुःखभोगिनः ॥ १०३ ॥ अन्येतुप्राणिनःसृष्टा स्त्रिवृद्राशिभिरेवहि ॥ विधातातैजसाद्देवा
न्पार्थिवेनतुमानवान् ॥ १०४ ॥ तथान्यानखिलान्जंतून् वारुणान्जलराशितः ॥ विदधेथापिसंस्हृत्य पुनस्तैस्तैस्तथातथा ॥

वि० र० ४६

॥ १०५ ॥ सर्जनंसर्वजीवानां ब्रह्मांतानामियंस्थितिः ॥ एवंसृष्टिरभूत्तस्मिन् पाद्मेकल्पेस्वयंभुवः ॥ १०६ ॥ दिनांतेसंजिहीर्षुःस वन्हिवातादिवर्षणैः ॥ आप्लाव्यपृथिवींसर्वां मज्जयामासचाखिलान् ॥ १०७ ॥ देवादीन्निखिलान्पीत्वा सत्यलोकेस्वपद्विधिः ॥ चराचरस्यसर्वस्य प्रलयोऽव्युत्क्रमात्स्मृतः ॥ १०८ ॥ हरिस्तदंतरालिल्ये प्रकृत्यासंयुतःस्वया ॥ तत्वान्यपिनिलीनानि विधेरंगेषुस-र्वशः ॥ १०९ ॥ इतिश्री विष्णुरहस्ये पाद्मकल्पसृष्टिवर्णनंनाम चतुर्विंशोध्यायः ॥ २४ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीवेदव्यासायनमः ॥ श्रीभगवानुवाच ॥ एवमाद्यविधेर्याते परार्धेपाद्मकल्पतः ॥ द्वितीयस्यपरार्धस्य प्रथमःकल्पउच्यते ॥ १ ॥ अयंहिसर्वकल्पानां श्वेतवाराहकल्पकः ॥ प्रोक्तःप्रकृतिभूतोतः संक्षेपाद्वर्ण्यतेधुना ॥ २ ॥ अविशिष्टेष्टमेभागे निशायामुत्थितोवि-धिः ॥ सस्मारपद्मनाभंतं त्दृदिस्थंभक्तिसंयुतः ॥ ३ ॥ तुष्टावालौकिकैःस्तोत्रैः सप्रसन्नोनिजंवपुः ॥ तस्मैसंदर्शयामास तत्रावि-द्ययासृजत्स्वयं ॥ ४ ॥ ग्रहान्सूर्यादिकानादा वश्विन्याद्याश्चतारकाः ॥ मेषादींश्चतथाराशी न्योगान्विष्कंभकादिकान् ॥ ५ ॥ स-र्वरूपस्वयंभूत्वा खेचरादिष्वथाभ्रमत् ॥ यथातद्विदितंब्रह्मन् ज्योतिःशास्त्रेतथैवहि ॥ ६ ॥ तावत्प्रकृतिरूपेण वायुनाशोषितंज-लं ॥ ब्रह्मांडार्धभवेद्याव छयकालेगतस्ततः ॥ ७ ॥ आदौहिवासरोभानोः कल्पस्याभूत्परेक्रमात् ॥ अश्विन्यादौस्थिताःसर्वे ग्र-

अ० २५ ४६

अविशिष्टे

76

हाःपश्चाद्यथागति ॥ ८ ॥ भ्रमंत्यद्यापियावत्स्या द्दिनांतोहिस्वयंभुवः ॥ सूर्यचंद्रादयोन्येये भविष्यंतःसुरांशकाः ॥ ९ ॥ तांस्तां-
स्तत्तत्पदेविष्णु र्निधायाथस्वयंपुनः ॥ तेषुतेषुस्थितोलीला स्तत्तद्वद्वितनोत्यजः ॥ १० ॥ अथकल्पादिमेकाले मग्नांवीक्ष्यजलेभुवं॥
कुत्रस्त्रक्ष्यामिभूतानि त्येवंचिंतासमाकुलः ॥ ११ ॥ सस्मारपरमंविष्णु मनादिनिधनंविभुं ॥ ततोहिमानीधवलः सूर्यकोटिसम-
प्रभः ॥ १२ ॥ पूरयन्गुर्गुरारावै र्ब्रह्मांडमचलोयथा ॥ नददर्शविधिस्तस्य तेजःप्रतिहतेक्षणः ॥ १३ ॥ सम्यग्रूपंमीलिताक्षो ध्या-
त्वादेवंतमव्ययं ॥ तत्प्रसादाल्लब्धचक्षु र्वाराहंरूपमैक्षत ॥ १४ ॥ भक्त्याप्रणम्यसाष्टांग मस्तौषीद्गद्गदस्वनः ॥ ब्रह्मोवाच ॥ जया-
द्भुतवराहत्वं जयविश्वविभावन ॥ यज्ञमूर्तेवेदमूर्ते जयदुष्टांतकप्रभो ॥ १५ ॥ जयब्रह्मांडकोटीनां स्त्रष्टःसज्जनवत्सल ॥ जया-
र्तार्तिहरक्षिप्रं जयसर्वस्वदायक ॥ १६ ॥ अनपायाखिलापाय निखिलेशान्निरीश्वर ॥ उद्धरस्वभुवंमग्नां गांपंकादिवभूतये ॥ १७ ॥
सृष्टयेसर्वभूतानां धृतयेजीवनायच ॥ श्रीवराहउवाच ॥ प्रीतोस्मिदेवदेवेश ब्रह्मन्त्वत्प्रियकाम्यया ॥ स्थापयिष्येभुवंमग्नां यथा-
स्थानंमहाजलात् ॥ १९ ॥ अनयात्वत्कृतस्तुत्या येभक्त्यामांस्तुवंतिहि ॥ तानुद्धरामिनचिरा न्महापदिनिमज्जतः ॥ २० ॥ श्री-
भगवानुवाच ॥ ततोयज्ञवराहोसौ निमज्यात्रमहाजले ॥ क्रोडरूपधराताव द्भूत्वादेवीतदैवहि ॥ २१ ॥ विवेशतत्रतेनासौ स्वा-
रामेणरमाचिरं ॥ तावद्धिरण्यगर्भस्य नासाश्वासाद्विनिर्ययौ ॥ २२ ॥ हिरण्याक्षोमहारौद्र स्तत्क्षणात्समहानभूत् ॥ महाबलोम-

हावीर्यः सोपितस्मिन्महाजले ॥ २३ ॥ चिक्रीडकतिचित्कालं ततोलीलावपुर्हरिः ॥ मग्नांभुवंस्वदशने निधायोद्धर्तुमैच्छत॥२४॥
दंतस्थितमहीपंको यावदुन्मज्जतिस्मसः ॥ तावदेवाहनन्मूर्ध्नि वराहस्यमहासुरः ॥ २५ ॥ बालःक्रीडनकेनेव क्रीडित्वासहतेनसः॥
जघ्नेदंष्ट्रैकदेशेन मृतःशिश्येजलेथसः ॥ २६ ॥ ततोब्रह्मासमभ्येत्य स्तुत्वाचविविधैःस्तवैः ॥ प्रणनामाथदेवोपि तत्रैवांतरधीयत ॥
॥ २७ ॥ ब्रह्माथससृजेपूर्वं मनसासनकादिकान् ॥ आज्ञापितास्तुतेसृष्टौ नैच्छन्ब्रह्मपरायणाः ॥ २८ ॥ सृष्टौहिपुत्रपौत्रादे र्जन--
नान्मरणादितः ॥ धारणाधारणाच्चापि चित्तंव्याकुलतामियात् ॥ २९ ॥ चित्तव्याकुलितेपुंसां स्त्रीणांवापिकुतःसुखं ॥ कुत्रवाचिं-
तनंविष्णो र्मोक्षाशापिकुतस्तरां ॥ ३० ॥ दुःखात्पापंप्रकुर्वंति पापाद्दुःखमितिक्रमात् ॥ निमग्नोदुःखवाराशौ संसारेसततंवसेत्
॥ ३१ ॥ इत्याद्यनेकदुःखेभ्यो भीताभक्तास्तथाहरौ ॥ उत्पन्नयोगिनःशांता ब्रह्मण्येवमनोदधुः ॥ ३२ ॥ नियोगाकरणात्स्वस्य ज--
ज्वालकुपितोविधिः ॥ नानौचित्याच्छशापैतां स्ततोभ्रूमध्यतःसृतः ॥ ३३ ॥ कालानलसमःप्रोद्य न्बालःपरमकोपनः ॥ आरोदी-
त्क्रोधतोयस्मा त्ततोरुद्रइतीरितः ॥३४॥ नाशांम्यत्सांत्व्यमानोपि सयदाद्रुहिणस्तदा ॥ कोपाग्निमेकधाकृत्वा ललाटेनयनंव्यधात्
॥ ३५ ॥ पंचबालसमोरोदी रितिपंचास्यमाप्नुहि ॥ इतिधात्रोदितेतस्य पंचासन्वदनान्यथा ॥ ३६ ॥ तथैववरतस्तस्य दशबाहुर--
जायत ॥ अथासृजदृषीन्सप्त मरीचिर्भृगुरंगिराः ॥ ३७ ॥ क्रतुःपुलस्त्यःपुलहो वसिष्ठस्तेषुसप्तमः ॥ दक्षिणांगुष्ठतोदक्षं नारदंचा--

47

पिमानसं ॥ ३८ ॥ कृतेप्येवंयदानासी त्सृष्टिःप्राचुर्यमेवयत् ॥ तत्तद्दक्षिणभागेन सृष्टःस्वायंभुवोमनुः ॥३९॥ वामेनशतरूपाच ना-
रीपरमसुंदरी ॥ तांयदामनवेप्रादाद्ब्र ह्मासारुददार्तवत् ॥ ४० ॥ वयंनार्यौऽबलास्तात सर्वदापरतंत्रकाः ॥ नपारतंत्र्यसदृशं दुः-
खमन्यद्धिविद्यते ॥ ४१ ॥ बालानांधारणंगर्भे वर्धनंचदिनेदिने ॥ शकृन्मूत्रमलश्लेष्म शोधनंरोदनादिच ॥ ४२ ॥ सोढव्यंकथम-
स्माभि र्बालानांसंसृतौसदा ॥ कदास्वोद्धरणेयत्न प्रमुखानिदिनेदिने ॥ ४३ ॥ सक्ताश्चित्तासमाधाने कदाविष्णुंस्मरेमहि ॥ इत्या-
द्यनेकधाक्लेशाः संसारासक्तचेतसां ॥ ४४ ॥ नारीणांचविशेषेण प्रोच्यचक्रेमहत्तपः ॥ दिव्यवर्षसहस्रंतां तपस्यासक्तमानसां॥४५॥
द्रष्टुंजगामकृपया विष्टचेताःपितामहः ॥ दृष्ट्वातंप्रणनामैषा छंदितातेनसावरैः ॥ ४६ ॥ वव्रेमुक्तिंदेहबंधा त्छतरूपाधृतव्रता ॥
विधातातामथोवाच देहबंधोनतेभवेत् ॥ ४७ ॥ अद्यप्रभृतिनारीणां सक्तानांगेहकर्मसु ॥ शौचेनाल्पेनशुद्धिःस्या त्पतिशुश्रूषणंहि-
यत् ॥ ४८ ॥ बालादिपरिचर्याच गृहकर्मतथेतरत् ॥ विष्णुपूजेतिसंकल्प्य स्मरंत्यःकेशवंयदि ॥ ४९ ॥ प्राप्नुयुर्महतींसिद्धिं यथा-
हितपसाद्विजाः ॥ तासांतुपारतंत्र्येपि पत्याद्यास्तन्मनोनुगाः ॥५०॥ लीलावलोकनैःस्मेरै र्वदनैर्हृतचेतसः ॥ स्वभावादेवमुग्धा-
स्यु र्विद्वांसोबलिनोपिवा ॥ ५१ ॥ योगारूढाविरक्ताये त्यक्तसर्वपरिगृहाः ॥ तेपिनारींविलोक्यैव मुह्यंतुकिमुतापरे ॥ ५२ ॥ पर-
तंत्राःस्वतंत्रास्ता सबलाअबलाअपि ॥ यासांमनोनुवर्तेरन् ज्ञानिनोपिमहाबलाः ॥ ५३ ॥ नैववत्सेत्वयाकार्या भावियोषित्सुगो-

चरा ॥ चिंताणुरपिकिंब्रूयां तवस्वात्मविमोक्षणे ॥ ५४ ॥ उत्तिष्ठोत्तिष्टभद्रंते मोदस्वमनूनाचिरं ॥ अनुभूयमहत्सौख्यं मोक्षंव्रजस--
हामुना ॥ ५५ ॥ इत्युक्त्वापाणिनातेन दययास्पर्शितासती ॥ उत्थायनत्वातंदेवं सिषेवेपतिमात्मनः ॥ ५६ ॥ अथतस्यांमनुःपु--
त्रौ द्वावेवसमजीजनत् ॥ प्रियव्रतस्तथोत्तान पादःकंन्याःत्रयंतथा ॥ ५७ ॥ आकूतिर्देवहूतिश्च प्रसूतिरितिविश्रुताः ॥ तावत्प्रज--
ज्ञतुर्धातु र्मानसौरुचिकर्दमौ ॥ ५८ ॥ आकूतिंरुचयेप्रादा द्दक्षायापिप्रसूतिकां ॥ देवहूतिंकर्दमाय कृतकृत्योभवन्मनुः ॥ ५९ ॥ म-
रीचेःकश्यपोजज्ञे चराचरमभूत्ततः ॥ आकूत्यांरुचितोजज्ञे युग्मंयज्ञश्चदक्षिणा ॥ ६० ॥ नारायणश्चलक्ष्मीश्च ताउभौदंपतीतदा ॥
स्वायंभुवेंतरेतस्मि न्यज्ञऐंद्रमगात्पदं ॥ ६१ ॥ यामानाम्नातदादेवा उपासांचक्रिरेचतं ॥ देवहूत्यांकर्दमेन जज्ञेसकपिलोमुनिः ॥
॥ ६२ ॥ प्रणेतासांख्ययोगस्य योशिक्षन्मातरंनिजां ॥ सोपिनारायणःसाक्षा दपरामामकीतनुः ॥ ६३ ॥ ततःसृष्टिरभूल्लोके इत--
रेतरसंभवा ॥ व्याप्ताभूदखिलाभूमिः स्यंदितुंकोपिनाशकत् ॥ ६४ ॥ आर्तस्वरोमहानासी न्निघ्नतामितरेतरं ॥ नकोपिस्वप्तुंशेके--
त्र विश्रांतिंनापिलब्धवान् ॥ ६५ ॥ इत्थंसंमर्दमालोक्य कुपितोद्रुहिणोसृजत् ॥ नारींवीणाकरींश्यामां पिंगाक्षींकृष्णवाससं ॥ ४८
॥ ६६ ॥ परशुंदक्षिणेहस्ते दधानामतिदारुणां ॥ जहिसर्वामितिप्राह सावधीद्दूषिताजनान् ॥ ६७ ॥ तदाप्यार्तस्वनोभूया नभूद्दै--
रुदतांमहत् ॥ ततःसामृत्युरगम द्ब्रह्माणंशरणंतदा ॥ ६८ ॥ नाहंसमुत्सहेद्रष्टुं दुःखितान्रुदतोजनान् ॥ प्रियेजनेमृतेतात क्रोश--

48

तस्तस्यबांधवान् ॥ ६९ ॥ अतोधिकारमेनंमे नसमादेष्टुमर्हसि ॥ पितामहउवाच ॥ एतदेवविधातुंत्वां सृष्टवानस्मिशोभने ॥
नोद्वेगस्तुत्वयाकार्यो मारणेजगतःसदा ॥ ७० ॥ तत्तत्कर्मवशात्काले निर्दिष्टाकालरूपिणा ॥ हरिणैवततोजंतू न्हत्वापापंन्नतेभ-
वेत् ॥ ७१ ॥ अंतेतवापिहंतास हंतास्माकमपीश्वरः ॥ क्रीडतेनटवल्लोके विलुंपेद्दर्शयेज्जगत् ॥ ७२ ॥ त्वदीयकर्मणातेन तुष्टः-
सभगवान्हरिः ॥ मुक्तिंदास्यतिविश्वात्मा व्येतुतेभयकश्मलं ॥ ७३ ॥ इत्युक्तासातदाब्रह्मन् मृत्युःसारुरुदुच्चकैः ॥ रुदंत्याअश्रुणो
स्व जाता रोगाःसर्वेज्वरादयः ॥ ७४ ॥ तस्याआर्तध्वनिंश्रुत्वा सांत्वयत्तांपितामहः ॥ नैवभद्रेत्वयाकार्या शोकोयंदेहशोषणः ॥ ७५ ॥
इमेरोगास्त्वदुत्पन्नाः करिष्यंतिसहायतां ॥ इत्युक्त्वाक्षयनामानं ज्वरंराज्येभ्यषेचयत् ॥ ७६ ॥ तदाप्रभृतितेरोगाः स्थावरेजंगमे
पिच ॥ व्याप्यतस्थुरथोतत्त त्कर्मपाकेनकालतः ॥ ७७ ॥ उपचायकयोगेन घ्नंतिवापीडयंत्यपि ॥ उपचायकवत्तेषां परिहारार्थम-
प्यसौ ॥ ७८ ॥ तत्तद्द्रव्यंविनिर्माय तज्ज्ञानार्थउपादिशत् ॥ आयुर्वेदमृषिभ्यःसः मरीच्यादिभ्यएवहि ॥ ७९ ॥ तेभ्यःपरंपराप्राप्तं
चिकित्साशास्त्रमुत्तमं ॥ तदाप्रभृतिलोकेवै जननंमरणंमुहुः ॥ रोगास्तेषांपरिहाराः प्रवृत्तादैवयोगतः ॥ ८० ॥ ॥ इतिश्री
विष्णुरहस्ये स्वायंभुवमन्वंतरवर्णनंनाम पंचविंशोध्यायः ॥ २५ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

वि० ९० ॥ श्रीवेदव्यासायनमः ॥ श्रीभगवानुवाच ॥ यदारभ्यसृजद्ब्रह्मा मृत्युंलोकवधायहि ॥ तदारभ्यव्यधाल्लोके धर्माधर्मानुशासनं ॥ अ० २६
४९ ॥ १ ॥ स्वैराचाराजनास्ताव त्स्वैरमैथुनभोजनाः ॥ नियम्याहिनिजाचारे येननस्यादुपप्लवः ॥ २ ॥ कल्पभेदांस्ततश्चक्रे शाखाभे-
दानुसारतः ॥ हिंसामैथुनभक्ष्यादि नानाचारप्रदर्शनं ॥ ३ ॥ कर्तव्यंचनकर्तव्यं मुदासीनमितित्रिधा ॥ उपादिशज्जनान्कर्म त-
दादौमनवेवदत् ॥ ४ ॥ सर्वान्मुनीनथोवाच मनूक्तंहिहितंमहत् ॥ इत्युक्त्वांतर्दधेब्रह्मा ततःस्वायंभुवोमनुः ॥ ५ ॥ प्रियव्रतेखिलं-
राज्यं दत्वागात्तपसेवनं ॥ तत्रवर्षशतंतेपे तपःपरमदुष्करं ॥ ६ ॥ जातानुरागोगोविंदे तुष्टावोपनिषद्गणैः ॥ स्तुवंतंशाश्वतंब्रह्म
दृष्ट्वातेदैत्यराक्षसाः ॥ ७ ॥ जग्धुमभ्यद्रवंस्ताव द्यज्ञनामायुतःसुरैः ॥ तत्राविर्भूयसपदि हत्वातान्दैत्यराक्षसान् ॥ ८ ॥ ररक्षानिज
भक्तंतं मनुंस्वायंभुवंप्रभुः ॥ स्तुतस्तेनाथबहुधा धामस्वमगमत्ततः ॥ ९ ॥ सुनंदायास्तटेतत्र मनुर्भार्यासमन्वितः ॥ तस्थौध्याय-
न्परंब्रह्म तपसेबद्धमानसः ॥ १० ॥ एकदासुखमासीनं मनुंसर्वेमुनीश्वराः ॥ उपगम्याब्रुवन्वाक्यं तास्मिन्सुस्निग्धचेतसः ॥ ११ ॥
ऋषयऊचुः ॥ पितामहोब्रवीदस्मा न्मनूक्तंहितामित्युत ॥ अतोब्रूत्यखिलान्धर्मा न्येनाविघ्नोखिलंवयं ॥ १२ ॥ श्रीभगवानुवाच ॥ ४९
अथश्रुत्वावचस्तेषां मुनीनांस्निग्धचेतसां ॥ अवर्णयन्महातेजा धर्मान्नानाविधान्हितान् ॥ १३ ॥ यथोपदिष्टवान्पूर्वं ब्रह्मासर्ववि-
दांपतिः ॥ अथसंजातहर्षास्ते सर्वज्ञात्वातदीरितं ॥ १४ ॥ स्मर्तारोपिस्वयंचक्रु र्निबंधान्वेदमूलकान् ॥ तत्रतत्रश्रुतानर्था न्विक्षि-

49

स्तानेकतःकृतान् ॥ १५ ॥ जगदुःस्वनिबंधेषु स्मृतयस्ताइतीरिताः ॥ वर्णानामाश्रमाणांच तत्तद्युगगतानपि ॥ १६ ॥ धर्मान्येभ्यो
वगत्यैव चरंत्यात्महितार्थिनः ॥ आद्यंमन्वंतरंब्रह्म न्नित्थमासीत्धरातले ॥ १७ ॥ ॥ इति श्रीविष्णुरहस्ये मन्वंतरानुवर्ण
ने षड्विंशोध्यायः ॥ २६ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीवेदव्यासायनमः ॥ श्रीभगवानुवाच ॥ स्वारोचिषोमनुर्नाम द्वितीयोग्नेःसुतोमहान् ॥ ऋषिर्वेदशिरानाम तुषितातस्यपत्न्य-
भूत् ॥ १ ॥ तस्यांरोचननामासीज्ज्येष्ठइंद्रश्चसोभवत् ॥ यःपुरासूत्रनामासी त्सएवायमिहाभवत् ॥ २ ॥ तस्मादनंतरंचाह मव-
तीर्णोविभुःस्वयं ॥ उपेंद्रइतितेनाहं विश्रुतोविदुषांमुखे ॥ ३ ॥ ममपश्चात्तुयेजाता स्तुषितानामदेवताः ॥ तृतीयेत्वंतरेब्रह्म न्नुत्त-
मोनामवैमनुः ॥ ४ ॥ यस्तनादभवद्विष्णोः सधर्मस्त्विद्रतांगतः ॥ सत्यजिन्नामविख्यातो धर्मादजनियःस्वयं ॥ ५ ॥ यस्यानुजज्ञि
रेदेवा मुनेःसुतपसःसुताः ॥ भद्रावेदश्रुताःसत्या धर्माश्चाप्यभवन्नतः ॥ ६ ॥ सूनृतायांसधर्मोवै सत्यसेनमजीजनत् ॥ ममैवांशं-
वदत्येनं पार्ष्णिग्राहंमरुत्वतः ॥ ७ ॥ शुंभद्रारुणविंदाख्यौ राक्षसैर्यक्षसंगतैः ॥ पराभूतंवज्रभृतं येरक्षत्तांनिहत्यच ॥ ८ ॥ प्रमोदो-
विमदःशक्ति रित्याद्याःसप्तवैद्विजाः ॥ वसिष्ठतनयाब्रह्मं स्तत्रासन्धर्मदेशकाः ॥ ९ ॥ तेसप्तभ्रातरस्तातं वसिष्ठंमुनिपुंगवं ॥ एक-

वि० र०
५०

दासुखमासीनं धर्मान्पपृच्छुरादृताः ॥ १० ॥ अवर्णयत्पुरस्तेषां सधर्मानखिलान्मुनिः ॥ वसिष्ठस्मृतिरित्युक्ता प्रथिताप्यथसाभव-
त् ॥ ११ ॥ भूयस्तेमुनयस्तंवै पप्रच्छुःश्रेष्ठधर्मकान् ॥ कृतैर्यैर्लभ्यतेमोक्षो नातियत्नेनमानवैः ॥ १२ ॥ वासिष्ठउवाच ॥ सर्वेष्वपि
चधर्मेषु श्रेष्ठाधर्माहिवैष्णवाः ॥ यदनुष्ठितमात्रेण नरोविष्णुप्रियोभवेत् ॥ १३ ॥ किमलभ्यंसुतास्तास्मि न्प्रसन्नेश्रीनिकेतने ॥ न-
वांछंतितथाप्यस्मा द्भक्ताएकांतिनस्तुये ॥ १४ ॥ एषांनित्यसुखान्मोक्षा त्प्रेष्ठश्रीगरुडध्वजः ॥ तानहंभवतोवक्ष्ये श्रुणुध्वंसुसमा-
हिताः ॥ १५ ॥ स्वस्वशाखोक्तमार्गेण संस्कृतोद्विजतांगतः ॥ गृण्हीयाद्वैष्णवींदीक्षां पंचरात्रोक्तमार्गतः ॥ १६ ॥ यथाहिभगवान्वि-
ष्णु र्हयग्रीवसमाकृतिः ॥ जगादवधसंवत्सा स्तथाकुर्याद्विधानतः ॥ १७ ॥ उषःकालेसमुत्थाय स्मरेल्लक्ष्मीपतिंहरिं ॥ शौचादिपू-
र्वंकंकुर्या त्स्नानंविधिवदादृतः ॥ १८ ॥ आदायमृत्स्नांवामेन मूलमंत्रादिमंत्रितां ॥ कुर्याद्द्वादशपुंड्राणि विप्रश्चत्वारिबाहुजः ॥
॥ १९ ॥ वैश्यःपुंड्रद्वयंकुर्या च्छूद्राद्याअपरेखिलाः ॥ वेदानधिकृतायेतु सर्वेषामपियोषितः ॥ २० ॥ एकमेवप्रकुर्वीरन् ललाटतूर्ध्व-
पुंड्रकं ॥ ललाटेत्हृदयेवैश्यो बाव्होरपिचबाहुजः ॥ २१ ॥ ललाटेत्हृदयेनाभे रूर्ध्वेकुक्षिद्वयेगले ॥ कर्णमूलद्वयेबाव्होः पृष्ठदेशेच- ५०
मूर्धनि ॥ २२ ॥ एवंस्थानद्वादशके विप्रःपुंड्राणिधारयेत् ॥ दंडाकारंललाटेतु पद्माकारंतुवक्षसि ॥ २३ ॥ अन्येप्रदीपकलिका
सदृशाविष्णुतत्परैः ॥ विप्रक्षत्रियविट्शूद्रा विष्णुभक्तिपरायणाः ॥ २४ ॥ ललाटेन्येपिकुर्वीरन् पुंड्रंहरिपदाकृति ॥ नासाग्रात्केश

अ० २७

पर्यंतं तन्मध्येहरिमंदिरं ॥ २५ ॥ अतोन्यतिलकंन्नृणां विष्णुविद्वेषकारणं ॥ ऊर्ध्वपुंड्रंतुनिच्छिद्रं ललाटेयस्यकस्यचित् ॥ २६ ॥
दृश्यतेतद्विजानीया च्छुनःपादंनसंशयः ॥ ऊर्ध्वपुंड्रविहीनंतु श्मशानसदृशंमुखं ॥ २७॥ तदृष्ट्वैवनरस्तूर्ण मादित्यमवलोकये-
त् ॥ कुर्यादहरहःपश्चा त्तिलकोपरिमुद्रिकाः ॥ २८ ॥ कपोलेदक्षिणेचक्र मुद्रेपंचचक्रकं ॥ त्दृदित्रीणिद्वयंपार्श्वे स्तनेत्रीणिभुजेद्व-
यं ॥ २९ ॥ कर्णमूलेद्वयंकंठे वामेबाहुतथैककं ॥ अथवामेकपोलेतु शंखमेकंतुपार्श्वके ॥ ३० ॥ द्वयंस्तनेत्रयंबाहौ द्वयंकर्णेधरेद्व-
यं ॥ एकंदक्षिणबाहौस्या दथकौमोदकींश्रुणु ॥ ३१ ॥ एकाललाटेवामेतु पार्श्वेचस्तनदेशके ॥ एकैकासव्यबाहौतु द्वयंकार्यंचभ-
क्तितः ॥ ३२ ॥ अथपद्मद्वयंवक्ष स्तिलकेदक्षपार्श्वके ॥ स्तनेचैकंद्वयंबाहौ नामसर्वत्रविन्यसेत् ॥ ३३ ॥ दक्षिणेतुभुजेबाहुं स्तनेख
ड्गंचनंदकं ॥ त्दृदयेचर्मबिभृया द्वामेशार्ङ्गमथालिखेत् ॥ ३४ ॥ श्रीवत्सांकंश्रियोवासं भावयेद्वक्षसव्ययोः ॥ एवंक्षत्रियविट्शूद्रा
धारयेयुश्चमुद्रिकाः ॥ ३५ ॥ क्षत्रजाःक्षत्रियाचारा वैश्यजावैश्यवत्तथा ॥ अनुलोमाश्चकुंडाद्या विप्रजाश्चतथैवहि ॥ ३६ ॥ प्रतिलो-
माःस्त्रियाःसर्वा शूद्रवत्तिलकादिषु ॥ एवंवैष्णवचिन्हानि भावयित्वानिजात्मनि ॥ ३७ ॥ यःकुर्यान्नित्यकर्माणि कृत्वाविष्णौत-
थार्पयेत् ॥ तस्यैवसफलंजन्म मृतोविष्णुत्वमाप्नुयात् ॥ ३८ ॥ योयथाभावयेद्विष्णुं सर्वप्राणेश्वरंप्रभुं ॥ तथारूपमवाप्नोति की-
टःपेशस्कृतोयथा ॥ ३९ ॥ सालोक्यंचैवसारूप्यं सायुज्यंचसमीपतां ॥ लब्ध्वाविष्णुप्रसादेन मुक्तोनावर्ततेपुनः ॥ ४० ॥ परेषांम

वि० र० रणंजन्म कालेकालेसवीक्ष्यते ॥ मोदमानोनिशंलोके वैकुंठादौनिजेच्छया ॥ ४१ ॥ सामगायन्निजानंद पूर्णानंदोहमित्यपि ॥ अ० २७
५१ हावुहाव्वमृतस्याहं नाभिरित्युच्चकैर्गृणन् ॥ ४२ ॥ आस्तेशाश्वतलोकेषुवैष्णवेषुसदैवहि ॥ नार्योयाःपतिपत्न्यस्यु स्ताअपिस्वपतिं ना भी
सदा ॥ ४३ ॥ विष्णुभावनयार्चित्वा स्वीयंशीलमुपाश्रितः ॥ यथायोगंतथान्येषां चित्तसाधनतत्परा ॥ ४४ ॥ सापिस्वपतिना--
साकं लभतेमुक्तिमुत्तमां ॥ पत्यौमृतेस्वयंगच्छे त्तेनसाकंतुपंचतां ॥४५॥ धर्मएषापरोनार्या स्तदभावेजितेंद्रिया ॥ कृच्छ्रोपवासनि
यम प्रदक्षिणनमस्कृतैः ॥ ४६ ॥ तपोभिरन्यैरात्मानं शोषयित्वार्चयेद्धरिं ॥ कंचुकीकंठसूत्राभ्यां कबर्यभ्यंगभूषणैः ॥ ४७ ॥ तांबू-
लांजनगंधाद्यै रन्यैःशृंगारभूषणैः॥ उझ्झितानिखिलैर्भोगैः शौचाचाररताःसदा ॥ ४८ ॥ देवसेवापरानित्यं सतीब्राह्मणपूजका ॥
दीक्षितावैष्णवान्मंत्रा न्स्वयोग्यान्ध्यानपूर्वकं ॥ ४९ ॥ जपंतीलभतेपुण्यं यतिनोवैष्णवायथा ॥ स्वस्ववर्णाश्रमाचारै र्नरैर्योषिद्भि
रेववा ॥ ५० ॥ ब्राह्मणादिश्वपाकांतैः प्रतिलोमानुलोमभिः ॥ कुंडाद्यैर्गोलकैर्वापि वैदिकैस्तांत्रिकैरपि ॥ ५१ ॥ नामकीर्तनमुख्यै-
श्च यज्ञैर्दानैश्चशक्तितः ॥ यथाधिकारमन्यैश्च वान्हिशुश्रूषणादिभिः ॥ ५२ ॥ सत्कर्मभिस्तथाचान्यै स्तोषणीयोरमापतिः ॥ एषए- ५१
वपरोधर्मो वैष्णवानामनुत्तमः ॥ ५३ ॥ सांगंवाप्यंगहीनंवा विष्णुमुद्दिश्यकर्मयत् ॥ तदनंतफलंप्रोक्तं तस्यापायोनाविद्यते ॥
॥ ५४ ॥ शनैर्वैराग्यमापन्नो धनपुत्रगृहादिषु ॥ अपिकर्माणिसंकोच्य विष्णोःश्रवणमाचरेत् ॥ ५५ ॥ श्रुतार्थंभावयेच्चित्तेभक्त्या

ध्यानपरायणः ॥ अतिपक्ककषायोसौ क्षीणपापःशनैःशनैः ॥ ५६ ॥ अनेकजन्मसंसिद्धो लभतेब्रह्मदर्शनं ॥ पुण्यपापेविधूयाथ
क्रियमाणैर्नलेपभाक् ॥ ५७ ॥ भोगैःप्रारब्धनाशेच त्यक्तलिंगोव्रजेत्धरिं ॥ तादृशंतत्फलंलब्ध्वा म्रियतेजायतेनसः ॥ ५८ ॥
॥ स्वानंदतृप्तोलोकेषु वैष्णवेषुसमोदते ॥ योद्वेष्टिकेशवंमूढो भक्तंवातस्यकर्हिचित् ॥ ५९ ॥ सचिरंनरकेघोरे पचतेनात्रसंशयः ॥
यःसदैवाचरेद्वेषं विष्णोःसर्वेश्वरस्यहि ॥ ६० ॥ सपतत्यंधतामिस्त्रे ततोनावर्ततेपुनः ॥ इतिप्राधान्यतोविप्राः धर्मावैष्णवसंम--
ताः ॥ ६१ ॥ संक्षेपतोमयाख्याता यैर्मुक्तोजायतेनरः ॥ श्रुतिस्मृतिपुराणेभ्यो नानाधर्माःपृथक्पृथक् ॥ ६२ ॥ विज्ञेयानहिते·-
वक्तुं शक्यंतेह्यल्पकालतः ॥ ॥ श्रीभगवानुवाच ॥ ॥ ज्ञात्वातस्यमतंसर्वं वसिष्ठस्यमहात्मनः ॥ बत्धभावामयिदृढं नत्वातंजग्मु
राश्रमान् ॥ ६४ ॥ ॥ इति श्रीविष्णुरहस्ये मन्वंतरानुवर्णनंनाम सप्तविंशोध्यायः ॥ २७ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीभगवानुवाच ॥ ॥ चतुर्थस्तापसोनाम्ना ह्युत्तमस्यानुजोमनुः॥ स्वयमेवहियोविष्णु र्लीलयामनुतांगतः ॥ १ ॥ तस्येमेतन
याजाता वृषाख्यात्यादयोदश ॥ [नासत्योविशिखोनाम्ना प्राप्तऐंद्रपदं]सुराः ॥ २ ॥ हरिवीरादयस्तत्र विधृतेस्तनयास्तुते ॥ तए-
ववैधृतानाम धृतावेदास्तुयैस्तदा ॥ ३ ॥ हरिमेधाऋषिर्नाम तस्यस्त्रीहारिणीसति ॥ तस्यांजज्ञेहरिःसाक्षा दहमेवसुरेश्वरः ॥ ४ ॥

हूहूहाहाभिधोदेव गंधर्वोदेवलंमुनिं ॥ ध्यानस्स्थितंविलोक्यैतं गंगातीरेयतेंद्रियं ॥ ५ ॥ तत्रहाहागजोभूत्वा भीषयामासतंमुनिं ॥
हूहूनाक्रंवपुःकृत्वा जलस्थोभीषयच्चतं ॥ ६ ॥ एतच्चोभयतस्तौतु क्रूरशब्दैश्चफूत्कृतैः ॥ असिंचतांजलश्चापि मुनिध्यानच्युतोभ--
वत् ॥ ७ ॥ गजंदृष्ट्वाविशत्तोये तत्रनक्रेणभीषितः ॥ जीवसंशयमापन्नो मुनिःस्थलमुपागतः ॥ ८ ॥ दुद्राववेगतोयाव त्ततोदध्रे
गजश्चतं ॥ धृत्वाब्रंह्मवधाद्भीतो लालयामासशुंडया ॥ ९ ॥ उपर्यधस्ताद्बहुशो नीत्वानीत्वाव्यलोडयत् ॥ तावद्दध्यौमुनिस्तौतु
ज्ञात्वानक्रंशशापसः ॥ १० ॥ ॥ देवलउवाच ॥ ॥ यतस्त्वंनक्ररूपेण हूहूर्भीषितवानसि ॥ नक्रएवनसंदेह श्चिरंभुविभविष्य--
सि ॥ ११ ॥ अरेहाहास्त्वयायस्मा च्चालितोगजरूपिणा ॥ भीषितश्चापितेनत्वं राजेंद्रद्युम्ननामकः ॥ १२ ॥ भूत्वाद्रविडदेशीयो
विष्णुभक्तिपरायणः ॥ तत्राप्यवज्ञायमुनिं गजत्वेशापमाप्स्यसि ॥ १३ ॥ भविष्यसिगजेंद्रस्त्वं महावनसमाश्रयः ॥ श्रीभगवानु
वाच ॥ एवंतौशापमाकर्ण्य प्रसादायमुनिंमुहुः ॥ १४ ॥ प्रार्थयामासतुर्भूयः प्रणामशतपूर्वकं ॥ ततःप्रसादमापन्नो मुनिस्ताव--
भ्यभाषत ॥ १५ ॥ ॥ देवलउवाच ॥ ॥ यदास्याद्युवयोर्योगो दैवात्सरासिकुत्रचित् ॥ तदैवभगवच्चक्र दारणात्तस्यदर्शनात् ॥
॥ १६ ॥ स्वस्वकर्मक्षयाच्चापि शापान्मोक्षमवाप्स्यथः ॥ ॥ श्रीभगवानुवाच ॥ ॥ ततोभिवाद्यतौविप्रं जग्मतुर्वासवंप्रति ॥ १७ ॥
हाहानिवेदयामास तद्वृत्तमखिलंस्वकं ॥ इंद्रोव्यगर्द्धयद्भूयो विप्रावज्ञानहेतुतः ॥ १८ ॥ जातस्तदैवहूहूसःत्रिकूटगिरिमध्यतः ॥

स्थ
५२

52

सरसिक्कापिनक्रोभू त्वथोंहंद्रद्युम्नतांगतः ॥ १९ ॥ सतुमद्भक्तिमानास सदाविप्रार्चनेरतः ॥ मन्मुखंभावयित्वाता स्तोषयदहर्नि-
शं ॥ २० ॥ सदातेभ्योमत्कथानां श्रवणंकृतवान्नृपः ॥ एकदातद्गृहंजग्मु र्लीलयामुनिपुंगवाः ॥ २१ ॥ भृग्वाद्याश्चीरवसना दी-
प्ताग्नयइवापरे ॥ पूजयामासतान्भक्त्या तान्मुनीन्सनृपोत्तमः ॥ २२ ॥ वरासनास्थितांस्तांस्तू पूजासंतुष्टमानसान् ॥ पप्रच्छवि-
विधानर्थान् यान्ज्ञात्वासर्वविद्भवेत् ॥ २३ ॥ ब्रह्मोवाच ॥ ॥ तेकेर्थास्तेनयेपृष्टा भृग्वादींस्तान्वदस्वमे ॥ एषांश्रवणतोयाति न-
रःसर्वज्ञतांक्षणात् ॥ २४ ॥ श्रीभगवानुवाच ॥ हंततेकथयिष्यामि संवादंपरमाद्भुतं ॥ परावराखिलंज्ञान हेतुमज्ञाननाशनं ॥
॥ २५ ॥ नानाविधेष्विहार्थेषु श्रुतेषुद्विजमुख्यतः ॥ संशयंप्राप्यनृपतिः भृग्वादीनन्वपृच्छत ॥ २६ ॥ ॥ इति श्रीविष्णुरहस्ये
इंद्रद्युम्नोपाख्यानंनाम अष्टाविंशोध्यायः ॥ २८ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीवेदव्यासायनमः ॥ राजोवाच ॥ उत्पत्तिस्थितिसंहारा न्नियतिंज्ञानमावृतिं ॥ बंधमोक्षंचविश्वस्य करोत्येवसदाहरिः ॥
॥ १ ॥ इतिश्रुतंमयाविप्रा बहुशोबहुधाबहु ॥ नतृप्यतितथाप्यत्र मनःसंशयितंहिनः ॥ २ ॥ भवंतोहिमहाप्राज्ञाः सदातत्वविवे
किनः ॥ अटंतिभगवत्तत्व प्रकाशायैवकेवलं ॥ ३ ॥ सदासंतुष्टमनसां निरीहाणांसतामिह ॥ अनुग्रहायैवभवेत् प्रवृत्तिर्मग्रचे-

तान् अतो... यत्

स्थ

तसां ॥ ४ ॥ सदैवखादनेपाने व्यवायेव्यसनेषुच ॥ नानाविधेषुचार्थेषु धनसंप्राप्तिहेतुषु ॥ ५ ॥ प्रायोनिराशाःसाशाश्च कदाचि-
त्कचिदेवहि ॥ विक्षिप्तचित्तानोकुर्यु रात्मतत्वविवेचनं ॥ ६ ॥ कथंतेत्यक्तसद्वृत्ताः सुखंरात्रिषुशेरते ॥ मरणांतरितायेषां भावि-
न्योहिमहापदः ॥ ७ ॥ प्रायेणमैथुनादेव जीवसृष्टिर्विलोक्यते ॥ जलभूबीजसंयोगा त्स्थावरोत्पत्तिरीक्ष्यते ॥ ८ ॥ स्थितिसंहा-
रनियति ज्ञानाद्यखिलमेवयत् ॥ लोकस्यलोकतोलोके मुक्तःकोपिनदृश्यते ॥ ९ ॥ निश्चेतुंतत्कथंशक्यं जन्माद्यस्यततोहरेः ॥
नहरिर्दृश्यतेक्कापि तस्मान्नानाविधंकथं ॥ १० ॥ सृष्ट्यादिलोक्यतेलोके नत्वेकस्मादनेकधा ॥ नानाव्यापारसंसक्ताः कथंनाने-
हजातयः ॥ ११ ॥ एषांव्यापारतोलोके जगत्सृष्ट्यादिवीक्ष्यते ॥ हलकालयुगादीनां तुरीव्योमादिनामपि ॥ १२ ॥ कुलालच-
क्रदंडादे रभावेहिकथंनृणां ॥ अन्नाच्छादनलाभस्या दन्यन्नानाविधंकथं ॥ १३ ॥ भोगार्थजातंलभ्येत नानाशिल्पकरैर्विना ॥
शिल्पान्यपिकथंलोके प्रथितानिगुरुंविना ॥ १४ ॥ कथंबंधःकथंमोक्षः कथंजीवःकथंगतिः ॥ कथंकर्मेतिविद्वांसः कृपयावक्तुमर्ह-
थ ॥ १५ ॥ ॥ भृगुरुवाच ॥ ॥ अटतामिहलोकेनो नदृष्टस्त्वादृशोनरः ॥ यःपृच्छेदपितत्वार्था न्किमुतत्वविवेचकः ॥ १६ ॥ ५३
वासुदेवकथाप्रश्नः पुरुषांस्त्रीन्पुनातिहि ॥ वक्तारंपृच्छकंश्रोतॄं स्तत्पादसलिलंयथा ॥ १७ ॥ मनुष्याणांसहस्त्रेषु कश्चिद्यततिसि-
द्धये ॥ यततामपिसिद्धानां कश्चित्त्वंवेत्तितत्वतः ॥ १८ ॥ सत्यमेवत्वयाप्रोक्तं दृश्यतेलोकतोमिथः ॥ चराचरस्यसृष्ट्यादि कर्म-

५३

क्वकहरिःप्रभुः ॥ १९ ॥ तथापिफलवैचित्र्या दस्वातंत्र्याच्चदेहिनां ॥ सदागमाच्चविज्ञेयं कर्मजीवेश्वरादिकं ॥ २० ॥ पदंतत्परमं
विष्णोः सदापश्यंतिसूरयः ॥ हेतुभिःपारतंत्र्याद्यै र्दिविचक्षुरिवाततं ॥ २१ ॥ नहीदंप्रसरच्चक्षु र्दिविसूर्यादिदर्शने ॥ विलोक्य--
तेनसंसृष्ट मर्थज्ञानक्षमंभवेत् ॥ २२ ॥ अतःसूर्यादिवस्तूनां ज्ञानात्स्याच्चक्षुषोदिवि ॥ प्रसारइतितद्वच्च पारतंत्र्यादिहेतुभिः ॥
॥ २३ ॥ विज्ञेयःपरमोविष्णु स्तस्यैवश्रवणेनच ॥ मननाध्यानतश्चापि तुष्टःसाक्षाद्भवेत्क्रमात् ॥ २४ ॥ यैःसाक्षात्सकृतोविष्णु
र्जागृवांसोहितेस्मृताः ॥ यत्रसुप्तंजगत्सर्वं तत्रजागरिताहिते ॥ २५ ॥ विशेषेणप्रकृष्टत्वा द्विप्रास्तेहिदयालवः ॥ शुश्रूषुश्रद्दधाने--
भ्यो ब्रह्मदीपंप्रकुर्वते ॥ २६ ॥ शुश्रूषबोधनादीनां व्यवहारात्धरिस्तुतेः ॥ मन्युदोषादिराहित्या त्ज्ञेयास्तेचविमन्यवः ॥ २७ ॥
॥ अचेतनानांभूतानां नराशिश्चित्वमाप्नुयात् ॥ राशीकरणमप्येषां दृश्यतेचेतनेच्छया ॥ २८ ॥ नहितंतुमृदादीनां चेतनेच्छांवि-
नाक्कचित् ॥ पटादिनिर्मितिर्दृष्टा देहेन्यश्चेतनस्ततः ॥ २९ ॥ अतएवहिदेहेस्मि न्यथावच्चाप्यवस्थिते ॥ सहसाजायतेचेष्टा हा-
निस्तस्मान्मृतस्त्विति ॥ ३० ॥ ज्ञायतेव्यवहारोत्र तस्मादन्योस्तिचेतनः ॥ येनास्थितेनदेहेस्मिन् जीवतीतिचकथ्यते ॥ ३१ ॥
योजानातिसुखंदुःखं तत्धेतुज्ञानतश्चयः ॥ प्रवृत्तिंचनिवृत्तिंच त्याद्याचरतिसर्वदा ॥ ३२ ॥ मृदादिजडवस्तूनां नैतत्संभवमर्ह--
ति ॥ पटादैदर्शनाभावा त्तस्माज्जीवोन्यउच्यते ॥ ३३ ॥ सोपिनस्वेच्छयादेहं नाप्नुतेनात्रतिष्टति ॥ स्वयंमुंचतिनैवामुं किंतु--

सर्वंपरेच्छया ॥ ३४ ॥ यःपरःसहरिःसर्व कर्तातदनुमीयते ॥ नहिरेतोरजोयोग मात्राज्जायंतिजंतवः ॥ ३५ ॥ योगएवाप्यसं-
भाव्य ईश्वरेच्छांविनासदा ॥ क्वचिदुत्पद्यतेकिंचि द्गोमयादेर्यथाक्रिमिः ॥ ३६ ॥ तत्रापिवृश्चिकादीनां प्रभवोनैकधेक्ष्यते ॥ उप्त-
मप्यत्रयत्किंचि न्नप्ररोहतिचांकुरं ॥ ३७ ॥ अनुप्तंजायतेक्वापि तच्चनानाविधंपुनः ॥ नहिस्वश्वासमोक्षेपि, जीवस्वातंत्र्यमीक्ष्य-
ते ॥ ३८ ॥ तस्मादस्तीश्वरःकोपि यतःसृष्ट्यादिचास्यहि ॥ प्रत्यक्षेणानुमानेन शब्देनापिप्रजायते ॥ ३९ ॥ निर्दोषेणार्थवि-
ज्ञानं सदोषेणविपर्ययः ॥ संशयोनापिजार्यते प्रवृत्तिश्चनिवर्तते ॥ ४० ॥ ज्ञानादेवभवेन्नॄणां ज्ञानेतद्यत्नमाचरेत् ॥ मितंप्रत्यक्ष- वा
तोवेत्ति मितंवेत्यनुमानतः ॥ ४१ ॥ सदागमेनसर्वज्ञो जायतेमानवोध्रुवं ॥ वेदाश्चपंचरात्राणि प्रमाणंमुख्यमीरितं ॥ ४२ ॥
अविरुद्धानियान्येषां पुराणानिचकानिचित् ॥ भारतादीनिचान्यानि प्रमाणानीतिवैविदुः ॥ ४३ ॥ यदुक्तमत्रकर्तव्यं तत्कृत्वा-
पुण्यवान्भवेत् ॥ निषिद्धंचेत्कृतंतेन पापवान्जायतेध्रुवं ॥ ४४ ॥ यत्सम्यगितिलोकेस्मिन् तद्धिपुण्यफलंस्मृतं ॥ यद्वसम्यक्च
पापस्य फलंतदवधार्यतां ॥ ४५ ॥ तद्वैचित्र्यात्फलेपिस्या द्वैचित्र्यंलोकदृष्टितः ॥ परंसम्यक्सुखंलोके ततोऽनिष्टस्यकारणं ॥ ५४
॥ ४६ ॥ असम्यक्परमंदुःखं तत्साधनवशादिह ॥ इष्टतानिष्टतालोके तस्मात्पुण्यंसदाचरेत् ॥ ४७ ॥ केवलंनहिकर्मैव जडत्वा-
त्फलदंभवेत् ॥ स्वतंत्रश्चेतनस्तस्मा दीश्वरस्याप्यपेक्ष्यते ॥ ४८ ॥ सोपिवैषम्यनैर्घृण्य परिहारायकेवलं ॥ स्वतंत्रोपिसमर्थोपि

कर्मादिकमपेक्ष्यते ॥ ४९ ॥ अनादिकालतस्त्वेवं संकल्पात्तस्यचोदनात् ॥ नहिस्वातंत्र्यभंगोत्र शंकनीयःकदाचन ॥ ५० ॥ अ-
न्यथातत्रनिर्दोषे दोषास्युर्नैर्घृणादयः ॥ नहिधावन्गृहेस्वीयो जायतेचार्थलाभवान् ॥ ५१ ॥ धनिनोग्रेयदाधावे त्तदैवफलभाग्भ-
वेत् ॥ नहिचौर्यंपारदार्यं कर्मचान्यच्चपातकं ॥ ५२ ॥ जडत्वाद्दंडनेशक्तं कुरुतेदंडमीश्वरः ॥ लोकेपिभृतकंस्वीयं धनिकःकार्यका
रकं ॥ ५३ ॥ धनेनतोषयेन्नान्यं निहंतिचरिपुंनिजं ॥ कर्मानुसारीफलदो लोकेसमइतीर्यते ॥ ५४ ॥ तत्रैवरज्यतेलोको विषमेच
विरज्यते ॥ सर्वस्वामीहरिस्तेन कथंवैषम्यमर्हति ॥ ५५ ॥ श्रुतिस्मृतीतुतस्याज्ञे तत्रोक्तंपुण्यमाचरेत् ॥ अर्पयेतत्धरौभक्त्या सं-
तुष्टःफलदोभवेत् ॥ ५६ ॥ अनर्पितंवृथायाति यथोप्तंबीजमूषरे ॥ एवंतेकथितंराजन् देहजीवेशनिर्णयः ॥ संक्षेपात्कर्मनिर्णीति
रन्यदाख्यामितच्छृणु ॥ ५८ ॥ इति श्रीविष्णुरहस्ये इंद्रद्युम्नभृगुसंवादे एकोनत्रिंशोध्यायः ॥ २९ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीवेदव्यासायनमः ॥ भृगुरुवाच ॥ स्वतंत्रःपरमोविष्णु र्मायातस्यांगसंगिनी ॥ ब्रह्माप्राणश्वसाचिवौ सर्वकर्मसुतत्प्रियौ ॥
॥ १ ॥ त्रिविधाहंकृतिःसाक्षा द्रुद्रोपिसचिवःस्मृतः ॥ मनसोधिपतिःशक्रो र्काद्याःइंद्रियदेवताः ॥ २ ॥ एवमेवहिकल्याद्याः सर्व
देहिषुसंस्थिताः ॥ ब्रह्मवच्चकलिस्तेषां बंधकोहंकृतिःस्मृतः ॥ ३ ॥ मधुकैटभमुख्याश्व शंबराद्यामनोधिगाः ॥ अन्येपिदेवदैत्या-

स्तु तत्तदिंद्रियमानिनः ॥ ४ ॥ स्वतंत्रोपिहरिःसृष्टौ स्वस्वातंत्र्यमनेकधा ॥ विभज्यादान्नृपइव सर्वकार्येषुलीलया ॥ ५ ॥ तत्त-
त्स्वातंत्र्ययोगेन फलभाक्सप्रजायते ॥ स्वस्वातंत्र्यचतुर्थांशं दशधाव्यभजत्धरिः ॥ ६ ॥ पादोनपंचकंप्राणे सपादंब्रह्मणेददौ ॥
द्वितीयेतुचतुर्थांशे दशधैवविभाजिते ॥ ७ ॥ द्वावेवांशावहंकारे सार्धैकंचित्तदैवते ॥ भगवान्प्रददाविंद्रे एकमेवत्विंद्रियाधिपे ॥ ८ ॥
एवमेवददौजीवे दैत्येभ्यःसार्धचातुरान् ॥ अथद्वौतुतुरीयांशौ स्वातंत्र्यस्यावशेषितौ ॥ ९ ॥ तौविधायत्रिधात्र्यंशं मायायैप्रददौ--
स्वयं ॥ शेषंभागद्वयंस्वस्मिन् स्थापयेत्सनिजेच्छया ॥ १० ॥ यदिंद्रियेनयत्कुर्व न्पुण्यंपापंचदृश्यते ॥ तस्यतत्तत्स्वतंत्रत्वा त्फल-
भाजोखिलाहिते ॥ ११ ॥ गृण्हातिहिहरिःपुण्यं पापंभस्मीकरोतिच ॥ स्वस्यचद्रोहिणःकिंचि त्पापांशंप्रददातिसः ॥ १२ ॥ तथै
वनिजभक्तानां ब्रह्मादीनांचयेद्रुहः ॥ तेभ्यएवहितत्पाप विभागंप्रददात्यजः ॥ १३ ॥ पापकर्मणियेपिस्युः सहायाःपापरूपि-
णः ॥ यथापराधंतेभ्योपि पापानांविभजत्यसौ ॥ १४ ॥ दैत्यभागगतंपुण्यं तथाभागंददातिच ॥ पुण्यकर्मसहायाये तेषामथच-
येनराः ॥ १५ ॥ दैत्यनिंदांनकुर्वंति तेपितत्पापभागिनः ॥ एवंपुण्यस्यपापस्य चत्वारिंशत्तमंलवं ॥ १६ ॥ प्राप्नोतिजीवस्तेनैव
पूर्णोयंभवतिध्रुवं ॥ अल्पशक्तित्वतोल्पंच पुण्यंपापंप्रजायते ॥ १७ ॥ स्वयोग्यंजलमादत्ते समुद्रादुत्धृतोघटः ॥ तावतैवभवेत्पूर्णः
एवमत्रनिदर्शनं ॥ १८ ॥ इति श्रीविष्णुरहस्ये त्रिंशोध्यायः ॥ ३० ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

एकमेवतु इंद्रियाधिपे

55

५५

॥ श्रीवेदव्यासायनमः ॥ भृगुरुवाच ॥ ससर्जभगवानादौ वैराजोनिजदेहतः ॥ मुखतःब्राह्मणंबाव्होः क्षत्रियंवैश्यमूरतः ॥ १ ॥
पादाच्छूद्रांस्त्रियस्तेषां वामभागान्मुखादितः ॥ शुक्लवर्णोभवेद्विप्रः शूद्रोभूत्कृष्णवर्णकः ॥ २ ॥ क्षत्रियःप्रायशःशुक्लः कृष्णःप्रायेण
विट्स्मृतः ॥ ब्राह्मणःसर्वतःश्रेष्ठः स्तुर्यांशस्तस्यबाहुजः ॥ ३ ॥ वैश्यस्तत्पंचमांशश्च शूद्रस्तत्षष्ठकांशकः ॥ ब्राह्मणोमुखजात-
त्वात् मुखकर्माणितस्यतु ॥ ४ ॥ तत्रदृष्टफलान्यस्य जीविकान्यानियानितु ॥ स्युःपुण्यजनकान्येव बाहुकर्माचबाहुजः ॥ ५ ॥
जघन्यकर्मावैश्यस्या त्सेवाकर्माचपादजः ॥ एतेषामानुलोम्येन प्रातिलोम्येनसृष्टिषु ॥ ६ ॥ बहवोजातयोजाताः नानाशिल्पेषु-
नैपुणाः ॥ नानाविद्याधराश्चान्या विश्ववृत्तिप्रवर्तकाः ॥ ७ ॥ प्रतिलोमेनतेन्यूनाः तदाधिक्येनुलोमकः ॥ ब्राह्मणस्यत्रयः पुत्रा--
स्त्रिवर्णेष्वनुलोमजाः ॥ ८ ॥ शूद्रस्यचत्रयः पुत्रास्त्रैवर्ण्येप्रतिलोमजाः ॥ त्रयस्त्रयःक्षत्रविशो प्रतिलोमानुलोमजाः ॥ ९ ॥ एवंद्वा
दशवर्णानां पुत्राएकैकशस्तुते ॥ चातुर्वर्ण्येप्रसूयंते चतुरश्चतुरःसुतान् ॥ १० ॥ तेचत्वारिंशदष्टौच पूर्वैर्द्वादशभिःसह ॥ चातुर्व--
र्ण्येनसंयुक्ता चतुःषष्टिर्हिजातयः ॥ ११ ॥ तत्राद्यास्तुचतुर्वर्णा द्वादशस्युर्द्वितीयकाः ॥ अन्येतृतीयास्तेभ्योन्ये चतुर्थाद्यास्तदुद्भ--
वाः ॥ १२ ॥ अमृतेजारजःकुंडो मृतेभर्तरिगोलकः ॥ षोडशाद्याद्वितीयाश्च कुंडगोलकसंयुताः ॥ १३ ॥ जातयोऽष्टादशप्राहु र-
न्याःसंकरजातयः ॥ जातीनांतुपुनःषष्ठे मिथःकन्यासुसंगताः ॥ १४ ॥ प्रतिकन्याप्रजनना ज्जातयस्युःपुनस्ततः ॥ तत्तज्जाति-

कर्कन्यासु तत्तज्जातीयपूरुषैः ॥ १५ ॥ चतुर्थाःपंचमाःषष्ठा इत्यनंताहिजातयः ॥ ब्राह्मणाःक्षत्रियावैश्या वैदिकेष्वधिकारिणः ॥
॥ १६ ॥ शूद्रास्तत्रानधिकृता स्तथैवप्रतिलोमिनः ॥ अनुलोमिषुयत्रस्या च्छूद्रवर्णस्यसंक्रमः ॥ १७ ॥ मातृतःपितृतोवापि सा-
क्षाद्वांतरतोपिवा ॥ तेषामपिभवेन्नैव वैदिकेष्वधिकारिता ॥ १८ ॥ अन्येषामनुलोमानां पितृवद्वैदिकाःक्रियाः ॥ वेदाधिकारिपि-
तृतो येजाताःप्रतिलोमिनः ॥ १९ ॥ अवैदिकैस्तुमंत्रैस्ते संस्कार्याःपितृजातिवत् ॥ व्यात्हतिप्रणवैर्हीना गायत्रीवैष्णवैर्द्विजैः ॥ वैष्णवैः
॥ २० ॥ तेषांसमुपदेष्टव्या तदन्येनामजापकाः ॥ यावदंशैर्भवेन्यूना जननीपितृजातितः ॥ २१ ॥ चतुर्थांशास्तुतेभक्ता स्तत्रां-
शैस्त्रिभिरूनितः ॥ पितृजातेर्भवेन्मातु रेकांशेनाधिकःसुतः ॥ २२ ॥ यावद्गुणैर्भवेन्मातृ जातिर्जनकतोधिका ॥ तावद्भिरंशैर्जनक
जातितोन्यूनतःसुतः ॥ २३ ॥ कर्णस्पृष्टेशेदशन्यूने विंशन्यूनेजलंस्पृशेत् ॥ पृष्टेषष्टिलवन्यूने द्विराचम्यविशुध्यति ॥ २४ ॥ श-
ताधिकोनेस्नात्वैव सहस्रन्यूनकेमृदा ॥ स्नानंकुर्यात्तदधिके पंचगव्याशनंस्मृतं ॥ २५ ॥ एषांनज्ञायतेमातुः पितृजातिर्विनिर्ण-
यः ॥ संकीर्णास्तेहिविज्ञेया स्तदालापमपित्यजेत् ॥ २६ ॥ तद्दृष्टौकर्णसंस्पर्शः आलापेजलमाचमेत् ॥ स्पर्शेसवाससस्नानं पंच ५६
गव्याशनाच्छुचिः ॥ २७ ॥ राजोवाच ॥ पूर्वोक्तविधिनाकेचि ज्जायंतेवैश्यतोधिकाः ॥ प्रतिलोमाअपिकथं वैदिकेनधिकारि-
णः ॥ २८ ॥ भृगुरुवाच ॥ द्विजस्त्रीणामिवैतेषां वैश्याधिक्येपिसर्वथा ॥ वचनादधिकारोनो जातोदोषोत्रशंक्यते ॥ २९ ॥ वै-

दिकेभ्यस्तुयेजाताः कुंडावागोलकाअपि ॥ आनुलोम्येनतेपिस्युः पितृजातिक्रियाकराः ॥ ३० ॥ संस्कार्यावैदिकैर्मंत्रै र्वेदाध्ययन वर्जिताः ॥ अवैदिकेषुशास्त्रेषु ज्ञेयास्तदधिकारिता ॥ ३१ ॥ ब्राह्मणेभ्योपिजातीनां कुंडादीनांप्रतिग्रहे ॥ अध्यापनेयाजनेच नाधिकारःप्रकीर्तितः ॥ ३२ ॥ ज्योतिषेवैदिकेगाने शिवादीनांचपूजने ॥ अधिकारस्तयावृत्त्या तेषांजीवनमीरितं ॥ ३३ ॥ प्रतिलोमिषुसर्वेषु वैश्यान्यूनेषुकुंडता ॥ नैवगोलकतावापि तदाधिक्येनुलोमिवत् ॥ ३४ ॥ यथानुलोमिकुंडादौ संस्कृतिःपितृजातिवत् ॥ वैश्याधिकेभ्यःकुंडादि जन्मिनांपितृवत्क्रियाः ॥ ३५ ॥ वेदाध्ययनहीनानां जातीनामुपनायने ॥ नकालनियमावस्था नैवार्तिनियमाअपि ॥ ३६ ॥ स्वस्ववृत्तिकरीविद्या ध्ययनाध्यापनानितु ॥ कर्तव्यानिनदोषोत्र तथावैदिककर्मसु ॥ ३७ ॥ ब्रह्मचर्यंच गार्हस्थ्यं वानप्रस्थ्यंपरिव्रजिः ॥ चत्वारआश्रमात्स्येते प्रोक्तावेदाधिकारिणां ॥ ३८ ॥ सपादाधिकताज्ञेया गृहस्थाब्रह्मचारिणी ॥ तथाततोधिकोवन्य स्तथातस्माच्चनैष्ठिकः ॥ ३९ ॥ यतिःसार्धाधिकस्तस्मा न्नैष्ठिकब्रह्मचारिणः ॥ येतूपनीत्यधिकृता नवेदेष्वधिकारिणः ॥ ४० ॥ आश्रमद्वितयंतेषा माद्यमेवप्रकीर्तितं ॥ नैष्ठिक्यंचापिवानस्थ्यं तेषांपाक्षिकमिष्यते ॥ ४१ ॥ पारिव्रज्यंतुनैतेषां प्रणवानधिकारिता ॥ येनोपनीत्यधिकृता तथासंकरजातयः ॥ ४२ ॥ गार्हस्थ्यमेवतेषांस्या न्नामजाप्येधिकारिता ॥ वैदिकाउपनीतास्युः द्विजाइतिहिकीर्तिताः ॥ ४३ ॥ मातृतःप्रथमंजन्म गायत्र्याश्चद्वितीयकं ॥ अतोद्विजत्वमेतेषां तेहिवेदाधिकारि-

णः ॥ ४४ ॥ येतूपनीतिहीनास्ते विज्ञेयाएकजातयः ॥ येतुपौराणिकैर्मंत्रै रुपनीताःकथंचन ॥ ४५ ॥ तेमिश्राइतिविज्ञेया पुरा-
णागमवेदिनः ॥ एकजातिषुशूद्रोनः सहस्रंयावदंशकः ॥ ४६ ॥ इतिहासपुराणेषु स्मृतिष्वागमैर्स्त्रेषुच ॥ विप्राच्छ्रवणमात्रस्या द-
धिकारोनचान्यथा ॥ ४७ ॥ अथयेस्युस्ततोन्यूना स्तेषांमानुषनिर्मिते ॥ कथागाथापद्यकादौ भगवन्महिमांकिते ॥ ४८ ॥ ज्ञेया-
अधिकृतास्तेषां सुकृतंततएवहि ॥ वेदस्याध्ययनंयागो द्विजानांधर्मईरितः ॥ ४९ ॥ दानंह्रिसर्वजातीनां हरेर्नाम्नांचकीर्तनं ॥
स्नानंनमस्कृतिर्यात्रा दयास्तेयंप्रदक्षिणाः ॥ ५० ॥ स्वभर्तृनियतिस्त्रीणां स्वदारनियतिर्नृणां ॥ एतेप्रायेणसंप्रोक्ता धर्माःसाधारणा-
इति ॥ ५१ ॥ प्रतिग्रहोध्यापनंच याजनंदूत्यमेवच ॥ विप्राणांजीविकातत्र दूत्यंपाक्षिकमिष्यते ॥ ५२ ॥ प्रतिगृहादीनान्येषा
मधिकारस्त्रिकेक्वचित् ॥ विप्रक्षत्रियमध्यस्थाः कथंचिदधिकारिणः ॥ ५३ ॥ युत्धंह्रिक्षत्रियेसुख्यं रथमातंगवाजिनां ॥ रक्षणानि-
क्रियानाना सारथ्याद्यापदिस्मृतं ॥ ५४ ॥ कृषिगोरक्षवाणिज्यं नानाकर्मसुकौशलं ॥ विट्शूद्रजीविकाप्रोक्ता शूद्रेतुद्विजसेवनं ॥
॥ ५५ ॥ स्ववृत्यासेवनंक्षत्रे क्षत्रस्यननिषिध्यते ॥ नीचसेवातुसर्वेषां निंदितापरिकीर्तिता ॥ ५६ ॥ आपद्यपिचकष्टायां सन्निकृष्ट
स्यवृत्तिभिः ॥ सर्वेपिजीवनंकुर्यु र्नापकृष्टस्यसेवनं ॥ ५७ ॥ अनुलोमविलोमानां मातुर्वाजनकस्यवा ॥ जातेर्वृत्तिर्भवेद्वृत्ति र्य-
थासंभवमेवहि ॥ ५८ ॥ अतःसर्वप्रपंचस्य जायतेजीवनंमिथः ॥ तत्तद्वृत्तेरनुष्ठाना दंधपंगुसमाजवत् ॥ ५९ ॥ तेननानाविध-

द्रव्य समुत्पत्तेर्नरादिनां ॥ जायतेभोगसंपत्तिः जीविकाप्यखिलस्यच ॥ ६० ॥ स्वस्ववृत्यानापदिस्या त्सन्निकृष्टस्यचापदि ॥ तद-
नंतरवृत्याच महापदिचजीविका ॥ ६१ ॥ आद्यद्वितीयजातीयान् जीवानेवस्वरूपतः ॥ सृष्ट्वातानेवसृष्ट्यादौ विश्वकर्मापिच-
स्वयं ॥ ६२ ॥ नानाशिल्पानिजीवानां जीवनार्थमशिक्षयत् ॥ जीविकाःकल्पयामास पूर्वोक्तविधिनाततः ॥ ६३ ॥ तृतीयाश्वच-
तुर्थाश्व पंचम्याद्याश्वजातयः ॥ सृष्टावेवंविमिश्रत्वा द्वृत्तिसांकर्यमापिरे ॥ ६४ ॥ (तंतुवायकुलालाद्याः कर्माराहेमकारकाः ॥ प-
शोर्विशसकायेच वैणुवास्नायुशोधकाः ॥ ६५ ॥ विण्मूत्रहारकाव्याधा श्वपाकाश्वर्मशोधकाः ॥ ग्राम्यारण्यविभेदेन किराताःश-
बरादयः ॥ ६६ ॥ पुल्कसाश्वपुलिंदाश्व पुष्कलाम्लेंछजातयः ॥ किरातेषुनिषादाश्व मत्स्यादामांसजीविनः ॥ ६७ ॥ केचिद्वन्यफ
लाहारा ग्राम्याअपितुकेचन ॥ स्तेयैर्नानाविधैरेतैःप्रायोजीवनकारिणः ॥ ६८ ॥ शांताःस्युःप्रबलेराज्ञि प्रबलाःनिर्बलेनृपे ॥ इ-
तितेकथितोराजन् लोकेजीवनहेतवः ॥ ६९ ॥ तथोपद्रावकाश्वापि नानाजातिविभेदतः ॥ शुत्धतातारतम्यंचा प्याश्रमाणांप्रसंग
तः ॥ ७० ॥ इति श्रीविष्णुरहस्ये इंद्रद्युम्नभृगुसंवादे जातिविवेकोनाम एकत्रिंशोध्यायः ॥ ३१ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीवेदव्यासायनमः ॥ राजोवाच ॥ नानासंसारहेतूनां लिंगानांभेदनेनृणां ॥ जायतेमोक्षसंपत्ति रित्यहंश्रुतवान्मुने ॥ १ ॥

आद्यद्वितीयजातीय जीवाएवस्वरूपतः ॥ मुक्ताःकिंनुप्रकुर्वंति पूर्णकामाःसदाहिते ॥ २ ॥ भृगुरुवाच ॥ ब्राह्मणाद्याश्चतुर्वर्णा आ
द्यायेपरिकीर्तिताः ॥ मूर्धावसिक्तसूताद्या अनुलोमविलोमिनः ॥ ३ ॥ द्वितीयाद्वादशैवंस्यु नृपषोडशजातयः ॥ एतज्जातीययो-
षाभिः स्वीयाभिःसर्वदैवतु ॥ ४ ॥ स्वरूपानंदमापन्ना मोदंतेविष्णुसद्मसु ॥ वेदाधिकारिणस्तत्र वेदाद्यागमनिष्ठिताः ॥ ५ ॥ स्व-
भावादेवतेविष्णुं नानायागैर्यजंतिते ॥ अन्याधिकारिणोयेच स्वोचितैस्तमुपासते ॥ ६ ॥ निपुणाउत्तमेशिल्पे हैमिकाद्याः कुविं-
दकाः ॥ नानावाणिज्यकार्येच रथ्यालंकारहेतवः ॥ ७ ॥ हरिप्रीत्यर्थमेवैते वैकुंठादौस्वभावतः ॥ व्यवहारंप्रकुर्वंति स्वोचितैःपण्य
कादिभिः ॥ ८ ॥ वृक्षादयःस्वरूपेण तेपिस्वेच्छादिचारिणः ॥ स्थानेस्थानेविमुंचंति फलपुष्पादिसंचयं ॥ ९ ॥ सात्विकान्येवता-
न्येते जीवाभुंजंतिलीलया ॥ नानोद्यानगताःकेचि द्रथ्याट्टालकवर्तिनः ॥ १० ॥ रथैरश्वैर्गजाद्यैश्च यानैःक्रीडंतिजातुचित् ॥ अ-
श्वाद्याअपिमुक्तास्ते सर्वेमोदिनएवहि ॥ ११ ॥ निंद्यास्तुवृत्तयस्तत्र नप्रवर्ततिकर्हिचित् ॥ तत्राधिकारिजात्यास्तु स्वोचितैर्नाममं
त्रकैः ॥ १२ ॥ उपासतेहरिंनित्यं दूरात्परिचरंतिच ॥ स्वानंदमात्रपूर्णास्ते विज्ञेयामानुषोत्तमाः ॥ १३ ॥ जंबूद्वीपपतेराज्ञो दक्ष-
स्यसततंस्वतः ॥ स्वश्वस्त्रीपुत्रभृत्याद्यैः संभृतोवैरिवर्जितः ॥ १४ ॥ यस्तस्ययत्सुखंलोके मुक्तविप्रस्यतादृशं ॥ तदन्यजातौविज्ञेयं
पूर्वोक्तेनक्रमेणतु ॥ १५ ॥ दीर्घवंशःषण्णवत्याऽशीतिवंशसुविस्तृतं ॥ क्षेत्रमित्युच्यतेराजन् वंशस्यादशहस्तकः ॥ १६ ॥ यस्य-

58

स्यात्सुभुविक्षेत्रं स्वायत्तंनिरुपद्रवं ॥ तृणानांतादृशानंदा स्तस्मात्तुद्विगुणोमतः ॥ १७ ॥ ॐषधीनांचवल्लीनां गुल्मानांद्विगुणस्त-
तः ॥ वृक्षास्तद्विगुणानंदा स्तथैवक्षुद्रजंतवः ॥ १८ ॥ ततोद्विगुणितानंदाः पक्षिणोजलजाअपि ॥ ततोपिद्विगुणाग्राम्याः पशव-
श्चमृगाअपि ॥ १९ ॥ ततोद्विगुणिताअश्वा स्ततोद्विगुणितागजाः ॥ प्रतिलोमिषुहीनोयः सतच्छतगुणाधिकः ॥ २० ॥ ततोय-
थाक्रमानंदा विज्ञेयामानुषोत्तमाः ॥ किंचित्किंचिन्मिथोप्येषां न्यूनताधिकतासुखे ॥ २१ ॥ मानुषानंदमारभ्य नृपगंधर्वदेव-
ताः ॥ पितरोदेवताभृत्या कर्मदेवाश्चतात्विकाः ॥ २२ ॥ वन्ह्यादयश्चसूर्याद्या इंद्रोमाशिववेधसः ॥ क्रमात्स्युरधिकानंदा दशशः
शतशस्तथा ॥ २३ ॥ सहस्रशोप्ययुतशो मुक्तिगाब्रह्मणासह ॥ तत्स्वामिकास्तदनुगाः स्वानंदपरिपूरिताः ॥ २४ ॥ वैकुंठादि-
षुमोदंते सदाहरिपरायणाः ॥ एवंतामसजीवानां क्रमोदुःखप्रकीर्तितः ॥ २५ ॥ एकरात्रनिराहारो निर्जलश्चापियल्लभेत् ॥ दुःखं-
तुतादृशंदुष्टे तृणजीवेप्रकीर्तितं ॥ २६ ॥ ततःक्रमेणविज्ञेया कल्यंतादुःखरूपिणः ॥ सर्वसंधिषुयस्यस्या लोहकंटकवेधनं ॥
॥ २७ ॥ त्हृदयेशल्यवेधोपि पीड्यमानःक्षुधातृषा ॥ महांधकारेनिक्षिप्त स्तप्यमानोमहोष्मणा ॥ २८ ॥ स्वेष्टस्त्रीपुत्रनाशोत्थ
दुःखवांश्चशिलाहतः ॥ मुहुर्मुहुर्भवेदीदृक् कलिर्दुःखायुतांशभुक् ॥ २९ ॥ भवेन्नेवेत्तिनोजाने राजन्विष्णुद्रुहःफलं ॥ यत्रपंचेंद्रि-
यैःकष्टं मनसासहितैरपि ॥ ३० ॥ दुःखंदुर्विषयैर्लभ्यं तादृशंतत्तमःस्मृतं ॥ विष्णुद्रोहैकलभ्यंत दूर्ध्वमध्यंतथाधरं ॥ ३१ ॥ स-

कर्षणमुखज्वाला दग्धंभूमंडलंयदा ॥ वायोर्गदाप्रहारेण तदाताल्लिंगभंजनं ॥ ३२ ॥ वायुदूतैःपुरोनीता यथास्थानंनिवेशिताः॥
भुंजानाःपरमंदुःखं तेष्वेकोपिकदाचन ॥ ३३ ॥ नैवायातिबहिस्तस्मा देवंतामसदुर्गतिः ॥ अथसात्विकजीवानां मुक्तिंशृणुमही-
पते ॥ ३४ ॥ सत्येचभगवान्ब्रह्मा सर्वलोकाधिकोमतः ॥ विरजाचनदीतत्र गंगैवापरनामिका ॥ ३५ ॥ ऊर्ध्ववैकुंठलोकस्तु य-
द्गत्वाननिवर्तते ॥ अंतिमावरणव्योम्नो रंतरेविरजानदि ॥ ३६ ॥ विधेर्देहापगमने लिंगमात्रशरीरिणः ॥ पूर्णसाधनसंपन्ना अप-
रोक्षदृशश्चये ॥ ३७ ॥ निर्गत्यचोर्ध्ववैकुंठा दतीत्यावरणानिच ॥ विरजायांकृतस्नाना ब्रह्मणासहसर्वशः ॥ ३८ ॥ त्यक्तलिंगा-
स्ततःसर्वे स्वरूपेणव्यवस्थिताः ॥ ततोदृष्ट्वाशिंशुमारं श्वेतद्वीपंनिरीक्ष्यच ॥ ३९ ॥ विंशतिवासुदेवाख्यं हरेरूपंचतुर्थकं ॥ सृ-
ष्टिकालेपितेसर्वे वैकुंठादिषुधामसु ॥ ४० ॥ कुर्वाणाहरिसेवांते स्वरूपानंदभोजनाः ॥ समास्तेसदातेषां नहिसंसारदर्शनं ॥
॥ ४१ ॥ अतोराजन्प्रकुर्वीत हरिभक्तिंसदानरः ॥ दुर्लभंमानुषंप्राप्य नैवायुर्व्यर्थतांनयेत् ॥ ४२ ॥ कादाचित्केनयोगेन स्नेहंब-
ध्नातिमूढधीः ॥ गृहस्त्रीपुत्रदासेषु स्वस्यैवानिष्टकारिषु ॥ ४३ ॥ मनोनुकूलताचेत्स्या द्गृहस्त्रीपुत्रबंधुषु ॥ तदाभाविवियोगेन ५९
नृपात्मापरितप्यते ॥ ४४ ॥ एष्वेवप्रातिकूल्येन नृणांदुःखमितिस्फुटं ॥ त्यक्त्वात्मानंतुतेयांति स्वयंत्यक्त्वाथवाम्रियेत् ॥ ४५ ॥
तस्मात्सर्वात्मनानास्ति सुखलेशोपिसंसृतौ ॥ बुद्धिमांस्तुविचार्यैवं तंहरिंशरणंव्रजेत् ॥ ४६ ॥ अनाद्यनंतकालंयो जीवस्य-

माभीनरं वस्त्रपते

६९ परमःसखा ॥ तस्यसख्येसुसंपन्ने माभेमशवसुस्पते ॥ ४७ ॥ तमेवनोनुमोभक्त्या जेतारमपराजितं ॥ दुष्कृताद्वेषिणोयस्य पा-
त्यंतेभृशपीडिताः ॥ ४८ ॥ वव्रेतमस्यनारंभे तमीशंशरणंव्रजेत् ॥ नान्यःपंथानचास्त्यन्या पंथापंथानहीतरः ॥ ४९ ॥ राजन्पु-
नःपुनस्तस्मा त्तंहरिंशरणंव्रजेत् ॥ मनसाकर्मणावाचा योद्विष्यात्धरिमीश्वरं ॥ ५० ॥ मज्जंतिपितरस्तस्य नरकेशाश्वतीःस-
माः ॥ त्रिसप्तभिस्तुपूयेत पितृभिस्वैर्हरिप्रियः ॥ यत्संगात्कीकटस्थानं नैमिषारण्यसंनिभं ॥ ५१ ॥ इति श्रीविष्णुरहस्ये मुक्ता-
नंदनिरूपणंनाम द्वात्रिंशोध्यायः ॥ ३२ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीवेदव्यासायनमः ॥ भृगुरुवाच ॥ अनादिकर्मणाबध्दा जीवाएवहिसर्वशः ॥ प्रारब्धंकर्मभुंजानाः पुनःकर्माणिकुर्वते ॥ १ ॥
तान्येवक्रियमाणानि जायंतेसंचितान्यपि ॥ तान्येवकालतोयांति प्रारब्धत्वंफलोन्मुखात् ॥ २ ॥ कोनामकर्मणांपाक कालंजा-
नातिमानवः ॥ फलेनैवविनिश्चेयः पाककालोयमित्यपि ॥ ३ ॥ अयमेवहिजीवस्य कर्मबंधःप्रकीर्तितः ॥ अनादिनातुलिंगेन सू-
क्ष्ममात्रेंद्रियात्मना ॥ ४ ॥ शुभाशुभादृष्टयुतो नानायोनिषुनीयते ॥ यदेश्वरःप्राणयुतः पितरिस्थापयत्यसुं ॥ ५ ॥ तदाप्रभृति
तद्देहे स्थितोमासद्वयावधि ॥ रेतोरूपोमातरिस कालेयोनिंविशत्यपि ॥ ६ ॥ योनिंशोधयतेतत्र वासुदेवाभिधोहरिः ॥ रेतःसिंच-

तितत्रैष प्रद्युम्नोहिप्रजापतिः ॥ ७ ॥ त्वष्टासंकर्षणस्तत्र धत्तेरूपविभागकान् ॥ धृत्वापुष्णातितंगर्भं स्वयंधातानिरुत्धकः ॥ ८ ॥
ग्रहास्तुनेजमेषाद्या स्तत्रोपद्रवकारिणः ॥ अतोराजन्स्वेच्छयानो जायतेगर्भसंभवः ॥ ९ ॥ तत्ररुछस्यापिपूर्वेण कर्मणापतनंभवे-
त् ॥ कश्चित्स्त्रवतितत्रैव केचिज्जीवंतिकर्मतः ॥ १० ॥ क्काथ्यमानोजाठरेण सर्वदाधोमुखोनृप ॥ मातुरन्नरसेनैव नाभिद्वाराभि-
वर्धते ॥ ११ ॥ गर्भेपूर्णेतुकालेन तत्तद्योनिस्वभावतः ॥ प्रद्युम्नप्रेरितःशीघ्रं निर्यापयतिमारुतः ॥ १२ ॥ मातुःसमानकोनाम्ना
बहिर्यातिस्त्वपस्मृतिः ॥ पीडितोयोनियंत्रेण आहारैःकर्मनिर्मितैः ॥ १३ ॥ वर्धतेचदिवारात्रौ म्रियतेकालभोगतः ॥ स्थावरेष्वे-
वमेवास्ति चतुर्मूर्तिनियामनं ॥ १४ ॥ योनिभूमिर्जलंरक्तं रेतोबीजंबहिःसृतिः ॥ उत्पत्तिःस्थाणुजीवस्य गोमयादेःक्रिमेर्ज-
निः ॥ १५ ॥ केवलंतुचतुर्मूर्ते रिच्छयैवप्रजायते ॥ घुणाःकाष्ठेषुजायंते जलसंपर्कतोविना ॥ १६ ॥ स्वातंत्र्यंस्वस्यसृष्ट्यादौ तथै-
वनिरपेक्षतां ॥ प्रदर्शयितुमेवायं हरिरित्थंसृजत्यपि ॥ १७ ॥ उपादानाद्यभावेपि भूतप्रेतपिशाचकान् ॥ वायवीयान्सृजत्येष क्क-
रेतःकुत्रलोहितं ॥ १८ ॥ स्वेच्छयैवयथानादि कालंसंकल्पितंतथा ॥ सृष्ट्यादिविदधात्येष लीलानज्ञायतेक्कचित् ॥ १९ ॥ द्रष्ट- ६०
व्यंजायतेयद्य द्वोक्तव्यंयद्यदद्यते ॥ गंतव्यंनयतेयत्त त्स्थातव्यंस्थापयेद्यतः ॥ २० ॥ सर्वदैवानुसंधेयं स्वातंत्र्यंपरमात्मनः ॥
तद्यंतृत्वंचसर्वत्र शक्त्याचश्रवणादिकं ॥ २१ ॥ कर्तव्यमिदमेवास्ति संसारविदुषामिह ॥ एकस्मात्तुकुलालादे र्नानाभांडजनिर्य-

था ॥ २२ ॥ तथानानाविधान्देहान् हरिःसृजतिलीलया ॥ इच्छामात्रंप्रभोःसृष्टि स्तथैवप्रलयादिकं ॥ २३ ॥ अकर्त्तेतितितोवे-
दे गीयतेपुरुशेत्तमः ॥ जीवास्तुत्रिविधाराजन् नानाकाराःस्वभावतः ॥ २४ ॥ नराःषोडशजात्यास्तु तदन्येलोकदृश्यवत् ॥ सा
त्विकामुक्तिभाजस्यु स्तामसास्तुतमोनुगाः ॥ २५ ॥ मध्यमाःसंसृतौनित्य मूर्धाधःपरिवर्तिनः ॥ नानाकर्मवशाजीवाः संसृतौ-
स्युर्विजातयः ॥ २६ ॥ नानाजात्यास्तथैवात्र मुक्ताःस्युःप्रकृतिंगताः ॥ स्वानंदंवास्वदुःखंवा भुंजानास्तुयथातथा ॥ २७ ॥ नाव-
र्ततितत्रसंसारे तत्रस्छाएवसर्वदा एवंतेकथितंराजन् यद्यत्वंप्रष्टवानसि ॥ स्वास्तितेस्तुगमिष्यामि स्वाश्रमंयदिमन्यसे ॥ २९ ॥ श्री
भगवानुवाच ॥ इंद्रद्युम्नइतिश्रुत्वा भृगोरुक्तंयथाश्रुतं ॥ जग्राहमनसाभक्त्या महाभागवतोनृपः ॥ ३० ॥ साष्टांगंप्रणिपत्याथ
विससर्जभृगुंमुनिं ॥ येचानुयायिनस्तस्य तेपितेनसहागमन् ॥ ३१ ॥ इति श्रीविष्णुरहस्ये कर्मनिरूपणंनाम त्रयत्रिंशोध्यायः ॥

॥ श्रीवेदव्यासायनमः ॥ श्रीभगवानुवाच ॥ ततःकदाचिदागस्त्य स्तत्रागात्शिष्यसंवृतः ॥ जपध्यानपरोराजा नचकारतदर्ह-
णं ॥ १ ॥ शशापकुपितोविप्रो गजस्त्वंभवितेतिच ॥ पुनःसंप्रार्थितोराज्ञा प्रोवाचमुनिसत्तमः ॥ २ ॥ गजयोनौहरेर्दृष्ट्या प्राप्नो-
षिपरमंपदं ॥ इत्युक्त्वातुगतेविप्रे राजाराज्यंसुतेन्यसत् ॥ ३ ॥ ययौसभार्योविपिनं कंदमूलफलाशनः ॥ भृगूपदिष्टमाखिलं स्म-

रन्हरिविचेष्टितं ॥ ४ ॥ तपस्तेपेनिराशीःसो नन्यसाधारणंमहत् ॥ कालधर्मंनृपोयात स्तत्पत्नीतत्सहागमत् ॥ ५ ॥ क्षीराब्धि-
द्वीपेउत्पन्नः सराजागजयोनिगः ॥ अचिराद्यूथपःसोभूत् क्रीडन्स(करिशावकैः)॥ ६ ॥ करेणुसंवृतस्तत्रो ग्रीष्मातपसुतापितः ॥
विचरन्विपिनेतस्मि न्नानाद्रुमलताकुले ॥ ७ ॥ ददर्शसरसींसीतां पद्मकिंजल्कभूषितां ॥ तत्रप्रविष्टःसहसा स्वयूथेनसयूथपः ॥
॥ ८ ॥ जग्राहग्राहःपादेतं चुक्रोशोच्चैर्महागजः ॥ वोढुंनशक्ताःसर्वेते कारिणश्चकरेणवः ॥ ९ ॥ दुद्रुवुःस्वस्यभीत्यैव त्यक्त्वायूथप-
तिंजले ॥ स्वशक्त्यायुध्यतस्तस्य शक्योभून्नजलेचरः ॥ १० ॥ प्राणसंशयमापन्नो गजोदीनोस्मरत्धरिं ॥ तदेवाविरभूत्साक्षा
च्छंखचक्रगदाधरः ॥ ११ ॥ दारयित्वारिणावक्त्रं ग्राहस्यामोचयद्गजं ॥ ग्राहंचामोचयत्तस्मा द्ग्राहदेहात्धरिस्तदा ॥१२॥ ततो-
दिव्यैःसगंधर्वै र्देवैर्ब्रह्मादिभिःसह ॥ तथादेवर्षिभिःसाध्यै र्मुनिभिःसहपन्नगैः ॥ १३ ॥ स्तूयमानयशागच्छ द्गरुडारूढईश्वरः ॥
हाहाहूहूश्चतौयातौ शक्रस्यनगरींप्रति ॥ १४ ॥ पुनःस्वदेहमापन्नौ गायंतौतत्धरेर्यशः ॥ श्रुणुयादेतदाख्यान मिंद्रद्युम्नभृगूक्तिम-
त् ॥ १५ ॥ सर्वैःकामैःप्रपूर्णस्या त्धरौभक्तिंदृढांलभेत् ॥ गच्छेच्चपरमंस्थानं यद्गत्वाननिवर्तते ॥ पदंतद्वैष्णवंब्रह्म न्नान्यथासंश-
योत्रन ॥ १७ ॥ इति श्रीविष्णुरहस्ये इंद्रद्युम्नाख्यानंनाम चतुस्त्रिंशोध्यायः ॥ ३४ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

61

॥ श्रीवेदव्यासायनमः ॥ शौनकउवाच ॥ भृग्विंद्रद्युम्नसंवादा यदुक्तंहरिचेष्टितं ॥ तदेवविस्तराद्ब्रूहि तत्रकौतूहलंहिनः ॥ १ ॥
सृष्ट्यादौभगवान्भूत्वा वैराजःपुरुषोमहान् ॥ ससर्जविश्वमखिलं नानारूपमिदंस्वतः ॥ २ ॥ वैजात्यंतत्कथंसूत देवेषुसमभूत्तथा॥
विद्याप्रवृत्तिंलोकेषु प्रवृत्तिंशिल्पिनांतथा ॥ ३ ॥ केनरूपेणभगवान् कथंचेदमिहातनोत् ॥ सूतउवाच ॥ जातिभेदस्तुदेवेषु ईश्व-
रेच्छानिबंधनः ॥ ब्रह्मवर्णपतिर्ब्रह्मा नारदोदेवलोसितः ॥ ४ ॥ बृहस्पतिर्भृगुर्वन्हि मरीच्याद्याःसनादयः ॥ ऋषयःपितरःसर्वे ब्र-
ह्मवर्णाःप्रकीर्तिताः ॥ ५ ॥ क्षत्रवर्णपतिर्वायुः प्राणःसूत्रंयईरितः ॥ रुद्राद्याःप्रायशोदेवाः क्षत्रवर्णाउदीरिताः ॥ ६ ॥ अश्विनौधन-
दोविश्व कर्मविद्याधरादयः ॥ वैश्यवर्णपतिंतेषां धनदंव्यदधाद्धरिः ॥ ७ ॥ एवमेवयमोदेवो धर्मःकालइतिद्विधा ॥ धर्मोविप्रःका-
लशूद्र वर्णाध्यक्षोथदूतकाः ॥ ८ ॥ यक्षाश्चगुह्यकाश्चापि शूद्रवर्णाःप्रकीर्तिताः ॥ विश्वावसुश्चित्ररथ स्तथाचित्रांगदादयः ॥ ९ ॥
अष्टौगंधर्वपतयः प्रोक्तामूर्धावसिक्तकाः ॥ तथाकेचिद्देवगणा युत्धकर्मविशारदाः ॥ १० ॥ क्षत्रियादित्रिवर्णेषु ब्राह्मणादनुलोमि-
नः ॥ मूर्धावसिक्तकांबष्ठौ तथापाराशवस्त्विति ॥ ११ ॥ ब्रह्मविट्शूद्रयोषित्सु सूतोमाहिष्यउग्रकः ॥ त्रयःक्षत्रियतोजातौ प्रति-
लोमानुलोमिनौ ॥ १२ ॥ ब्रह्मक्षत्रियशूद्रस्त्री गर्भजावैश्यतस्त्रयः ॥ वैदेहोमागधश्चैव करणश्चानुलोमजाः ॥ १३ ॥ शूद्राच्चांडाल
क्षत्तारा वयोगवइतित्रयः ॥ ब्राह्मणादिषुनारीषु प्रोच्यंतेप्रतिलोमिनः ॥ १४ ॥ क्षत्ताराविितिविज्ञेया उग्रपारशवावपि ॥ एवंद्वा-

दशपूर्वैस्तु चतुर्भिःसंयुतास्त्वमी ॥ १५ ॥ देवाःषोडशजातीयाः स्वभावादेवजज्ञिरे ॥ मातल्याद्याःसूतजात्या उग्राऐरावताद्दि-
पाः ॥ १६ ॥ कर्णाश्विचित्रगुप्ताद्याः मागधश्चारणेषुतु ॥ केचित्सूताश्चतत्रापि यक्षाःपारशवोग्रकाः ॥ १७ ॥ पुष्पदंतश्चारणेशो
यक्षेशोनलकूबरः ॥ क्षत्तारोगुह्यकेष्वेव प्रोक्ताःशूद्रानुयायिनः ॥ १८ ॥ पिशाचभूतकूष्मांडाः प्रेताश्चांडालजातयः ॥ घंटाकर्णः-
पिशाचेशो भूतेशोभैरवःस्मृतः ॥ १९ ॥ कुष्मांडेशोभृंगिरुक्मि प्रेताधीशस्तथोल्मुकः ॥ तुंबर्वाद्याश्चगंधर्वा अंबष्ठाअखिलाअ-
पि ॥ २० ॥ आयोगवाश्चमाहिष्या नानाशिल्पविशारदाः ॥ विद्याधरेषुकेचित्तु चित्रकेत्वादयोविशः ॥ २१ ॥ सर्वरक्षःपतिःप्रो-
क्तः क्षत्रवर्णोथतद्गणाः ॥ ब्रह्मराक्षसवेतालाः नानाजात्याःप्रकीर्तिताः ॥ २२ ॥ क्रव्यादाःशोणिताहाराः यातुधानास्तथापरे ॥
उर्वश्याद्याअप्सरसो नानाजात्यास्तथोदिताः ॥ २३ ॥ मृदंगिनस्तालधराः शूद्राद्यास्तुयथायथं ॥ नटागंधर्वजातीया श्चारणाः-
परिहासकाः ॥ २४ ॥ वीणादिसहगातारो गंधर्वाःपरिकीर्तिताः ॥ केवलंकंठमाधुर्या द्गायंतोविविधैःस्वरैः ॥ २५ ॥ किंनरास्तेन-
रास्याहि हयाकारकबंधकाः ॥ केचित्किंपुरुषास्त्वन्ये हयास्याःनृकबंधकाः ॥ २६ ॥ गंधर्वपतयस्तेपि सेवंतेदेवतागणान् ॥ मा-
तरःपूतनाद्याश्च शाकिन्योडाकिनीगणाः ॥ २७ ॥ मलरक्तसुरापाश्च नानाजात्याःप्रकीर्तिताः ॥ सर्ववर्णाःश्रमाचारा देवायद्यपि-
सर्वशः ॥ २८ ॥ तथापिप्रायःस्वाभाव्या देतज्जातयईरिताः ॥ सर्वस्त्रष्टायतोविष्णु र्नास्यजातिर्नियम्यते ॥ स्वस्वयोग्यतया-

परमात्म
62

सर्वै ब्रह्माद्यैःसउपास्यते ॥ ३० ॥ एवंषोडशजातीया नरजीवाःप्रकीर्तिताः ॥ चराचरस्यसर्वस्य व्यवहारप्रसित्धये ॥ ३१ ॥ जी
वनार्थंचसर्वेषां विश्वकर्माभवत्स्वयं ॥ देवानुपादिशाच्छिल्पा न्यथायोग्यतयाखिलान् ॥ ३२ ॥ ब्रह्माणंनारदादींश्च मुखविद्याउ--
पादिशत् ॥ भुवनोनामयोदेवो विश्वकर्माथतत्सुतः ॥ ३३ ॥ प्रसिद्धोयश्चशास्त्रेषु भौवनःसुरवार्धकिः ॥ विश्वकर्मास्वयंतत्र स्थि-
त्वालोकान्विनिर्ममे ॥ ३४ ॥ प्रासादांश्चविमानानि वाप्युद्यानान्यलंकृतीः ॥ वस्त्रवाद्यादिवस्तूनि विचित्राणिपृथक्पृथक् ॥
॥ ३५ ॥ ततःसृष्टान्मर्त्यलोके नानाजीवानुपादिशत् ॥ नानाऋषिगतोविष्णु र्वेदान्सांगान्द्विजातिषु ॥ ३६ ॥ सर्वेषांगुरवोवि--
प्रा विप्राणांतुमिथोधिकाः ॥ आयुर्वेदंधनुर्वेदं गांधर्वंचार्थशास्त्रकं ॥ ३७ ॥ सत्यायुषिशरीरस्य नानारोगनिवृत्तये ॥ आयुर्वेदंवि-
तेनेस त्वग्निवेश्यादिभिर्भुवि ॥ ३८ ॥ नानाशास्त्रैर्युत्धसित्ध्यै धनुर्वेदमवातनोत् ॥ राज्ञांचधनिकानांच मनोरंजनसित्धये ॥
॥ ३९ ॥ गांधर्वंव्यतनोद्यत्र गीतंवाद्यंचनर्तनं ॥ पाकक्रियागजाश्वादि नानाकर्मप्रसित्धये ॥ ४० ॥ लोकानांव्यवहाराय नाना--
शिल्पप्रसित्धये ॥ राजनीत्यैदंडनीत्यै अर्थशास्त्रमिहातनोत् ॥ ४१ ॥ ब्राह्मणाद्यामुखादिभ्यः सृष्टासत्कर्मकारिणः ॥ मध्यंस--
न्निधिकर्मैषां मध्यमंव्यावधानिकं ॥ ४२ ॥ अनापदिस्वकर्मैव मध्यंकर्मतथापदि ॥ महापद्यधर्मंप्रोक्तं जातिजीवनहेतवे ॥ ४३ ॥
मुख्यवर्णोभवेद्विप्र श्चतुर्थांशोनृपस्ततः ॥ वैश्यःपंचांशकोभूपा द्वैश्याच्छूद्रःषडंशकः ॥ ४४ ॥ पुमाधिक्यादानुलोम्यं पुन्नीचत्वा-
१/४ १/५

वि० र० द्विलोमता ॥ अनुलोमात्रिपादोन विप्रान्मूर्धावसिक्तकः ॥ ४५ ॥ तस्मान्मातार्धपादोना पितापादद्वयाधिकः ॥ मातृजात्यनुसा-- अ० ३५
६३ रेण नीचोच्चत्वंततःपरं ॥ ४६ ॥ एतंन्यायेनसर्वत्र द्रष्टव्यमनुलोमिषु ॥ प्रातिलोम्येपितुर्याव द्गुणामाताधिकाभवेत् ॥ ४७ ॥
तावदंशोभवत्पुत्रः पितुर्जातिर्नसंशयः ॥ पितरौजातितोभ्रष्टौ द्विपंचाशाधिकौसुतात् ॥ ४८ ॥ जात्यंतरात्पुत्रपित्रो र्भागकल्पन--
मत्रतु ॥ एकस्यनानाभार्यत्वे समोनाभृतमोखिलाः ॥ ४९ ॥ यथायोगमथोनात्र प्रातिलोम्यस्यसंभवः ॥ एकमात्रेनुलोमस्य
नानामात्रानुलोमतः ॥ ५० ॥ नीचोच्चत्वंयथायोग मिवमेर्ब्विविलोमके ॥ त्रिवारंमैथुनंसांतं गर्भोत्पत्तिमिदुच्यते ॥ ५१ ॥ पादोनं--
स्यात्सकृत्संगे द्वावानेसार्धतांव्रजेत् ॥ गर्भोत्पत्तौभवेद्याव त्यानुलोम्येतुनीचता ॥ ५२ ॥ तावत्येवात्रविज्ञेया मात्राधिक्येतथै--
वहि ॥ सकृत्संगेनयत्रस्या द्गर्भोगर्भःसएवतु ॥ ५३ ॥ प्रायश्चित्ताद्यथाशास्त्रं दंपत्योःशुद्धिरिष्यते ॥ तद्राहित्येजातिहैन्यं जायं--
तेनात्रसंशयः ॥ ५४ ॥ मातृतःपितृतोवापि त्वेकजातेस्तुसंक्रमः ॥ यत्रजातोभवेत्तत्र नोपनायाधिकारिता ॥ ५५ ॥ अन्येनुलो-
मिनःसर्वे वैदिकाधिकृतामताः ॥ तएवहिद्विजास्त्वन्ये एकजातयईरिताः ॥ ५६ ॥ प्रतिलोमेषुसर्वेषु वैदिकानाधिकारिता ॥ वै- ६३
श्याधिकास्तुतुल्यावा संस्कार्याःपितृतंत्रतः ॥ ५७ ॥ मंत्रैरवैदिकैःसम्य गुपनीत्यविवाहितः ॥ उपादिशेद्गुरुस्तेषां गायत्रींवैष्णवीं
त्रिशः ॥ ५८ ॥ आर्षगोत्रंतुविप्राणां तदन्येषांगुरोरिव ॥ शाखाभेदाद्गुरोर्भेदा द्रूपादीनांतुसर्वशः ॥ ५९ ॥ सापिंड्यंसप्तपुरुषं

63

सोदकाआचतुर्दश ॥ सगोत्राएकविंशस्यु स्ततऊर्ध्वंतुगोत्रजाः ॥ ६० ॥ द्वात्रिंशेक्षत्रियाणांतु गुरुभेदःप्रशस्यते ॥ विशांपंचदशे-
प्रोक्तः शूद्रवर्णस्यचाष्टमे ॥ ६१ ॥ विप्रस्यगुरुभेदेपि शाखागोत्रभिधानहि ॥ अनुलोमविलोमेषु पितुर्गुरुगुरुर्भवेत् ॥ ६२ ॥ व-
ध्वावरस्यवातातः कूटस्थाद्यदिसप्तमः ॥ पंचमीचेत्तयोर्माता तत्सापिंड्यंनिवर्तते ॥ ६३ ॥ भिन्नगोत्रेपिसापिंड्यं विप्राणामेवमी
रितं ॥ जातीनामितरासांतु सापिंड्यंस्यात्त्रिपौरुषं ॥ ६४ ॥ असगोत्रामसपिंडा मुद्वहेदिच्छयास्त्रियं ॥ ब्राह्मोदैवस्तथैवार्ष प्रा-
जापत्यस्तथासुरः ॥ ६५ ॥ गांधर्वोराक्षसश्चैव पैशाचाश्चाष्टमोधमः ॥ ब्राह्मोविवाहआहूय दीयतेशक्त्यलंकृता ॥ ६६ ॥ दैवोवि-
वाहःकंन्यायां ऋत्विजेदानमुच्यते ॥ आर्षोगोमिथुनेदत्ते कंन्यादानंयदातदा ॥ ६७ ॥ प्राजापत्यःसहधर्मं चरेतामितिदानतः ॥
आसुरोद्रविणादाना द्गांधर्वःसमयान्मिथः ॥ ६८ ॥ राक्षसोयुद्धहरणा त्पैशाचःकन्यकाछलात् ॥ धर्माश्चत्वारआद्यास्यु र्ब्राह्मण-
स्यतएवहि ॥ ६९ ॥ राक्षसोपिक्षत्रियस्य त्रयोन्येन्यासुजातिषु ॥ स्वयंवरस्तुगांधर्वं हटाद्राक्षसउच्यते ॥ ७० ॥ क्रीताकन्या-
समादास्या विप्राणामतिनिंदिता ॥ अवैदिकीवैदिकीच गायत्रीद्विविधामता ॥ ७१ ॥ वैदिकीतत्रसावित्री वैष्णव्याद्याद्द्विधैव-
हि ॥ सोंकारावैदिकीप्रोक्ता सश्रीकास्यादवैदिकी ॥ ७२ ॥ वैश्यतुल्यविलोमानां सैवोक्तापूर्वमेवतु ॥ अन्यैकजातयोनाम मंत्रै- नाममंत्रैः
रेवहिसंस्कृताः ॥ ७३ ॥ भजेयुर्विष्णुमव्यग्रा दयादानादि्धर्मकर्मभिः ॥ ग्रहणंतप्तमुद्राणां तथामंत्रविवेचनं ॥ ७४ ॥ ह्यग्रीवब्रह्म-

विद्या प्रसंगेपूर्वमीरितं ॥ उपनीत्यधिकारीयो नोपनीतोयदाभवेत् ॥ ७५ ॥ सावित्रीपतितोव्रात्य स्तज्जन्माभृज्जकंटकः ॥ व्र-
तीस्त्रोसंगतोव्रात्यः आरूढपतितोयतिः ॥ ७६ ॥ यतिस्तस्मान्महापापः पाखंडोवेदनिंदकः ॥ जाताश्चतुर्भ्यएतेभ्य स्तेप्युक्ताभृ-
ज्जकंटकाः ॥ ७७ ॥ जीवत्पतिस्तुयाभार्या जनयेदन्यतःसुतं ॥ अनुरागात्धटाद्वापि प्रच्छन्नंस्पष्टमेववा ॥ ७८ ॥ सप्रोक्तोजार-
जःकुंडः क्षेत्रजोभर्तुराज्ञया ॥ मृतेभर्तरियानर्भरीवरयेत्स्वेच्छयापतिं ॥ तज्जन्मागोलकःप्रोक्तो हटाद्वापिसएवहि ॥ ८० ॥ भर्तृ-
संबंधिनामाज्ञा यदितत्रभवेत्सुते ॥ सोपिक्षेत्रजएवस्या द्विपादोनौतुतौपितुः ॥ ८१ ॥ भृज्जकंटश्चतुर्थांशः सोपिचेत्पितृजाति-
तः ॥ संस्कृतस्त्र्यंशहीनस्या त्तत्सुतोद्व्यंशउच्यते ॥ ८२ ॥ तन्नप्तालभतेजातिं मूलपुंसःक्रमादिति ॥ विधिरेषसवर्णासु भार्या-
स्ववयदाजनिः ॥ ८३ ॥ एवंहिक्षेत्रजोजाति लभतांक्रमशः पितुः ॥ प्रायश्चित्ताद्विशुत्धिस्स्या त्क्षेत्रजेव्यावहारके ॥ ८४ ॥ तदभा
वेविगीतःस्या त्किंचिज्जातेस्तथोनता ॥ भृज्जकंटस्यापितरौ सुतात्पादद्वयाधिकौ ॥ ८५ ॥ कुंडगोलौपितुर्जातेः पंचमांशाधमौम-
तौ ॥ पितरौभृज्जकंटेन तुल्यरूपौप्रकीर्तितौ ॥ ८६ ॥ प्रायश्चित्ताज्जातिलाभः पित्रोरेवनपुत्रयोः ॥ अनुलोमादानुलोम्य मेवमे
वप्रकीर्तितं ॥ ८७ ॥ वैलोम्येजातिभेदस्तु नैतेषांविद्यतेक्वचित् ॥ किंचिद्विगीततैवस्या न्मातापित्रोःसुतस्यच ॥ ८८ ॥ शूद्राधि-
कास्तुतुल्यावा विलोमाअनुलोमिनः ॥ यावंतएकजात्यास्यु स्तेशूद्राइतिकीर्तिताः ॥ ८९ ॥ शूद्रवैदेहमध्यस्छा मध्यजातयईरि

नारी

ताः ॥ अंत्यजास्तत्पराःप्रोक्ताः यावज्जातिर्विविच्यते ॥ ९० ॥ यत्रजातिविवेकोन यथेष्टमिथुनाशनाः ॥ यवनास्तेविमिश्रत्वा न्म्लेंछाःइतिचकीर्तिताः ॥ ९१ ॥ अनुलोमेमातृवृत्तिः पितृवृत्तिर्विलोमके ॥ सान्निध्यवशतस्त्वेवं तत्धर्मान्शृणुताधुना ॥९२॥ दयिदानमहिंसादि विष्णुनामानुकोर्तनं ॥ सर्वासामेवजातीना मेषसाधारणोविधिः ॥ ९३ ॥ वेदाधोतिश्चयजनं द्विजानामधिकं स्मृतं ॥ अध्यापनंयाजनंच प्रतिग्रहइतित्रयं ॥ ९४ विप्राणामधिकोधर्मो जीविकापरिकीर्तिता ॥ क्षत्रियोयुत्धजीवीस्या च्छस्त्रवृ त्याचसेवकः ॥ ९५ ॥ कृषिगोरक्षवाणिज्य वृत्तिर्वैश्यउदात्हृतः ॥ सेवाकर्मतुशूद्रस्य वृत्तिरित्यभिधीयते ॥ ९६ ॥ सजातीयास्तु- भोज्यान्ना श्चतुर्न्यूनास्तुमध्यमाः ॥ अधमाद्वादशन्यूना विंशन्यूनाधमाधमाः ॥ ९७ ॥ तन्यूनानैवभोज्यान्ना इतिशास्त्रविनिर्णयः ॥ विनोदकेनयत्पक्कं यत्पक्कंतैलसर्पिषा ॥ ९८ ॥ तदन्नंफलवद्ग्राह्यं नात्रकार्याविचारणा ॥ अधमान्मध्यमंचेदं मध्यादुत्तममुच्य- ते ॥ ९९ ॥ भोज्यान्नेयोधमःप्रोक्तो जलपानेसउत्तमः ॥ विंशन्यूनातुमध्यस्स्यात् षष्ट्यूनेधममीरितं ॥ १०० ॥ विंशोत्तरशतांशा त्स्या दधमाद्धधमंत्विति ॥ यतःस्तस्माच्चपरतो जलपानंनयुज्यत ॥ विप्रधर्माभवेत्सोपि मूर्धावसिक्ततोधिकः ॥ १०१ ॥ प्रतिग्र- हादौतस्मात्स्या दधिकारीसइत्यपि ॥ ब्रह्मक्षत्रविशांपुत्राः अनुलोमाःषडेवतु ॥ १०२ ॥ शूद्रविट्क्षत्रजाःपुत्राः प्रतिलोमाषडैव- तु ॥ मंत्रीसभासत्सचिवः सेनानीःक्षेशरक्षकः ॥ १०३ ॥ योत्धाविप्रादिभोज्यान्नो खिलविद्याविशारदः ॥ उपदेष्टोपवेदानां प्रो-

कोमूर्धावसिक्तकः ॥ १०४ ॥ चिकित्सका.पत्रलेखा रत्नसौवर्णवाससां ॥ विक्रेतानाणकादीनां धान्यादीनासुवस्तुनां ॥ १०५ ॥
उपवेदोपदेष्टाच तुल्यनीचाधिकारिणी ॥ पुराणाख्याननिपुणः पुस्तकादिविलेखकः ॥ १०६ ॥ नृपाणांसचिवःप्रोक्तो वष्टइत्यादि-
कर्मकः ॥ सुवर्णाद्यष्टलोहाना मुपलोहस्यचापितु ॥ १०७ ॥ अलंकाराद्यखिलकृत् कवचादिविधायकः ॥ रत्नमाणिक्यमुक्तानां
वेधभेदादिकर्मकृत् ॥ १०८ ॥ परिचर्याकरोप्युच्च जातेःपारशवाभिधः ॥ क्रमादुत्तमजातीयाः क्षत्रवर्णादिमेत्रयः ॥ १०९ ॥ वै-
श्यतःक्षत्रियाद्वापि येधिकाएकजातयः ॥ तेषामवैदिकत्वंतु वचनादेवनान्यथा ॥ ११० ॥ नतावताधमत्वंस्या द्विजस्त्रीणामिवात्र
हि ॥ विप्रक्षत्रियमध्यस्था ब्रह्मसूदाःप्रकीर्तिताः ॥ १११ ॥ वैश्यक्षत्रियमध्यस्थाः क्षत्रसूदाइतीरिताः ॥ वैश्यशूद्रांतरायेतु वै-
श्यसूदाःप्रकीर्तिताः ॥ ११२ ॥ शूद्रसूदास्तुवैदेह पर्यंताःक्रमशोवरा ॥ सूदांश्चपरिवाहाश्च यथाजात्याखिलाअपि ॥ ११३ ॥ भो-
ज्यान्नःपेयपानीयाः नजातिनियमोत्रतु ॥ परचित्तानुवृत्तिर्या सासेवेत्यभिधीयते ॥ ११४ ॥ परिचर्याचसाचिव्यं दूत्यमित्येवसा
त्रिधा ॥ पुरोवस्थितिरूपादि त्रयहीनत्वमीक्ष्यते ॥ ११५ ॥ परिचर्यातुसंप्रोक्ता नीचानांसानशस्यते ॥ सभासत्वंचमंत्रित्वं मान्य
कर्मनियोज्यता ॥ ११६ ॥ साचिव्यमितिदूत्यंतु प्रेष्यत्वंमानपूर्वकं ॥ परिचर्यानीचजातेः श्ववृत्तिरितिभण्यते ॥ ११७ ॥ स्वा-
मिनःसेवकस्यापि श्ववृत्तेःपापकृद्यतः ॥ निवारयेत्ततोराजा ज्ञात्वाजातिविवेचनं ॥ ११८ ॥ सर्वेषांवृत्तिकृद्राजा सतथाज्ञान्नियोज

६५

65

येत् ॥ नानाकर्मसुविश्रादीं स्ततोत्रामुत्रशंलभेत् ॥ ११९ ॥ जीवाःषोडशजातीया संतियेमानुषोत्तमाः ॥ तेषांजातिक्रमेणैव मु
क्त्वानंदइष्यते ॥ १२० ॥ जातिर्नियम्यतेतस्मा दुच्चनीचसमत्वतः ॥ कर्णस्पृष्टेदशन्यूने विंशन्यूनेजलंस्पृशेत् ॥ १२१ ॥ विं-
शोत्तरशतन्यूने तावदंगविशोधनं ॥ स्पृष्टेतुमध्यजातीनां सचैलंस्नानमाचरेत् ॥ १२२ ॥ स्पर्शनादंत्यजातीनां पंचगव्यंविशोधनं
॥ नीचनीचतरेष्वत्र क्रमादुपवसेदपि ॥ १२३ ॥ स्पृष्टस्पृष्टेतदर्वाक्तु क्रमादेवविशोधनं ॥ भवेदाचारवानेवं ज्ञात्वाजातिविवेचकः
॥ १२४ ॥ माहिष्योगणकोज्योतिः शास्त्राणामुपदेशकः ॥ भांडाररक्षःसैरंध्र्यो रत्नविक्रीयलेखकः ॥ १२५ ॥ सेनानीर्वस्त्रहेमा-
दि वणिग्व्यवहृतौपटुः ॥ नृपप्रियोधिकारीच न्यायान्यायविवेचकः ॥ १२६ ॥ उग्रोश्वसादिःपादातः शूरःशास्तादुरात्मनां ॥
धर्मपालःप्रजापालः शस्त्रेणैवसजीवति ॥ १२७ ॥ हस्त्यश्वरथपादांतं सेनांगंस्याच्चतुष्टयं ॥ चतुरंगस्यसैन्यस्य कार्याकार्यविवेचकः
॥ १२८ ॥ सारथ्यकृत्सखाराज्ञः सूतोहस्त्यश्ववाहनः ॥ करणोलिपिलेखस्या च्चित्रलेखोवणिग्वरः ॥ १२९ ॥ कृषिकृद्ग्रामणीरा
वी छागव्यवहृतौपटुः ॥ नानाशिल्पकरस्वोच्च परिचर्याकरोपिसः ॥ १३० ॥ मागधोनृपतिस्तोता हयादिपशुविक्रयी ॥ नाना-
वाद्यपटुर्गाता कर्षकश्चित्रलेखकः ॥ १३१ ॥ शिल्पवेत्ताचसंगीत नटनाट्यकवित्पटुः ॥ राज्ञांविनोदकःशूरो यंतागजहयादिनां ॥
॥ १३२ ॥ वैदेहःकाष्ठपाषाण क्रयविक्रयशिल्पकृत् ॥ ताम्रकांस्यायसादीनां नानाकर्मविधायकः ॥ १३३ ॥ कौशेयकःस्तंतुवायः

कुलालश्चर्मकर्मकृत् ॥ हयोष्ट्राश्वनरादीनां पल्याणकरणेपटुः ॥ १३४ ॥ कर्षकोवाणिगित्यादि कर्माचपरिचारकः ॥ अयोगवस्तु
रजको धावकश्चर्मकर्मकृत् ॥ १३५ ॥ नापितस्तंतुवायश्च कर्मारःस्वनकोपिच ॥ कुड्यकोवाद्यकोव्याध स्तलिकश्चूर्णकृत्तथा ॥
॥ १३६ ॥ वृक्षच्छेदकरोदंड्य दंडकृद्बाणकुंतकृत् ॥ मल्लःशिल्पिनिचरो मृगपक्षिश्वकर्मकृत् ॥ १३७ ॥ धान्यवाहोबलीवर्ध वाह--
नादौमहापटुः ॥ क्षत्ताराज्ञांप्रतीहारः सुरामद्यादिकर्मकृत् ॥ १३८ ॥ चोरादिदंड्यपापानां शिरःपाण्यादिवर्धकः ॥ मल्लश्चूर्णकरो-
वाजि गजगोमृगपक्षिणां ॥ १३९ ॥ परिचर्याकरोराज्ञां शुत्थांतस्यचरक्षकः ॥ प्रेष्यःपुरःसरःशूरो मल्लःशास्त्रेषुनैपुणः ॥ १४० ॥
तंतुकृत्तंतुवायश्च जालकृन्मत्स्यजीवनः ॥ कर्मारश्चर्मरजकः क्रूरकर्माचयामिकः ॥ १४१ ॥ ग्रामरक्षोदुर्गरक्षो नाविकोमांसविक्रयी
॥ शैलूषोगारुडोगाता नटोरज्वादिकर्मकृत् ॥ १४२ ॥ वेणुकोगूढचारश्चे त्यादिकर्माचभांडकः ॥ चांडालोमृतजीवोस्या श्चर्मणांर-
जकोपिहि ॥ १४३ ॥ स्नायुनिष्कासनःशूरः प्रेष्योराज्ञांपुरःसरः ॥ मृतवस्त्रपरीधानो ग्रामरक्षोबहिश्चरः ॥ १४४ ॥ परिचर्याकर--
श्चारो व्याधश्चमृगपाचकः ॥ ग्राम्यकुक्कुटवाराह क्रयविक्रयजीवनः ॥ १४५ ॥ रज्जुकृत्तंतुवायश्च तंतुकृत्काष्ठजीवनः ॥ तृणपुष्प-
फलाहर्ता तथैवोद्यानसेवकः ॥ १४६ ॥ इत्यादिकर्मसंप्रोक्ता इत्थंप्राग्धर्मिणोखिलाः ॥ विधवाएकपत्न्यश्चो ङ्भिक्षुक्यःसूत्रकारि--
काः ॥ १४७ ॥ सूत्रचित्रकरावासः कौशेयादिष्वनेकधा ॥ सूपकार्यश्चसैरंध्र्यो गृहक्षेत्रादिरक्षिकाः ॥ १४८ ॥ नानास्वयोग्यवाणि-

ज्य वृत्तयोजीवितावधि ॥ सुशीलयस्वैरिणीदूतयो नर्तक्योभगजीवनाः ॥ १४९ ॥ इत्याद्यनेककर्मिण्य एवंसृष्टिरिहेशितुः ॥ आद्ये-
भ्योथद्वितीयास्तु चत्वारिंशत्तथाष्टच ॥ १५० ॥ तावंतएवचाद्यासु द्वितीयेभ्यश्चजज्ञिरे ॥ द्वितीयेभ्योद्वितीयासु द्वात्रिंशदधिकंस्मृ-
तं ॥१५१॥ एवंतृतीयाआद्यास्तु द्वितीयेरपिसंयुताः ॥ मिलितास्तुचतुश्चत्वा रिंशदग्ग्यंशतद्वयं ॥ १५२ ॥ केचिन्मात्रकुलाचारः के-
चिज्जनकवृत्तयः ॥ संकीर्णवृत्तयश्चान्ये तथासन्निधिवृत्तयः ॥ १५३ ॥ तृतीयेभ्यश्चतुर्थाश्च तेभ्यःपंचमषष्टकाः ॥ एवंनानाविधा-
लोके मिथोजीवनवृत्तयः ॥ १५४ ॥ तेषांनामानिसर्वाणि नकश्चिद्वेदितुंक्षमः ॥ यत्रग्रामेयत्रदेशे जातयोयाःकथंचन ॥ १५५ ॥
वेत्तुंशक्तयास्तथाताभि र्व्यवहार्यक्रमादिति ॥ इतिजातिविवेकोयो यथावन्मेनिरूपितः ॥ व्यवाहरद्यथाविष्णुः सृष्टौविविधकर्म-
भिः ॥ १५७ ॥ इति श्रीविष्णुरहस्ये जातिविवेकोनाम पंचत्रिंशोध्यायः ॥ ३५ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीवेदव्यासायनमः ॥ सूतउवाच ॥ स्वभावादेवयेजीवा जात्याषोडशजाहितान् ॥ सृष्ट्यादौसविनिर्माय तत्तज्जात्यैवमानुषा
न् ॥ १ ॥ स्वशक्त्याविश्यतेष्वेव सर्वविद्याइहातनोत् ॥ प्रवृत्तिःसर्वविद्यानांशिल्पानामपिसर्वशः ॥ २ ॥ तदारभ्यैवलोकेस्मिन्
व्यवहारादिचाभवत् ॥ सृष्टिपालनसंहारा नियत्याद्यादिनेदिने ॥ ३ ॥ भवंतिस्महरेरेव साक्षादंतरतोपिहि ॥ राजाहिपरमोलो

के धर्माधर्मनियामकः ॥ ४ ॥ तस्मिन्स्वतेजआविश्य शास्तिलोकान्स्वयंहरिः ॥ तेनेयंहियथालोके नाविष्णुःपृथिवीपतिः ॥ ५ ॥
यावत्तेजोभवेद्यत्र हरेस्तावत्प्रभुर्भवेत् ॥ तदधीनोभस्मवल्लोके स्वैरेवह्यवमन्यते ॥ ६ ॥ दीपानुसारिणीदीप्ति र्यथातद्वन्नरेष्वपि ॥
तत्तद्योग्यतयाविष्णुः सामर्थ्यंसंप्रयच्छति ॥ ७ ॥ अतएवहिलोकेस्मि न्नानायंतृत्वमीक्षते ॥ कश्चिदेकश्चयंतास्ति द्वियंताचत्रियंतृ-
कः ॥ ८ ॥ दशानांचशतानांच सहस्रायुतयंतृकः ॥ सामंतश्चनृपोराजा महाराजोखिलाधिपः ॥ ९ ॥ चक्रवर्तीसार्वभौम इत्येवं
व्यपदिश्यते ॥ राजैवप्रथमंधर्मे निजेस्यात्परिनिष्ठितः ॥ १० ॥ लोकास्तथैवकुर्वीर न्ननायासेनचान्यथा ॥ राज्ञिधर्मिणिधर्मिष्ठाः
पापेपापाःसमेसमाः ॥ ११ ॥ लोकास्तथानुवर्तंते यथाराजातथाप्रजाः ॥ धर्माधर्मौसदाचारै र्नृपोन्विष्येत्स्वमंडले ॥ १२ ॥ ध-
र्मंविवर्धयेन्नित्य मधर्मंह्रापयेदपि ॥ नृपःषष्ठांशभाग्यस्मा ल्लोकानांपुण्यपापयोः ॥ १३ ॥ सदापंडितसेवीस्या दुष्टभोगविवर्जितः ॥
शास्त्रतत्वपरिज्ञानं स्वयंतैःसाधयेदपि ॥ १४ ॥ यथापराधंदंड्येत न्यायेनधनमार्जयेत् ॥ मंत्रिणांसचिवानांच वृत्तंचारैःसदैक्षयेत्
॥ १५ ॥ जायंतेदुःखिनोलोकाः राजवल्लभपीडया ॥ तस्मात्तानपिसन्मार्गे स्थापयेदन्यथाजयेत् ॥ १६ ॥ वृत्यायुंजीतधर्मि- ६७
ष्ठा नधर्मिष्ठांश्चशिक्षयेत् ॥ दंडयित्वाचसम्यक्तान् कुर्यात्सन्मार्गगान्नृपः ॥ १७ ॥ शरीरदंडोविप्राणां नार्हस्तस्मात्ततोन्य
था ॥ दंडयेद्विप्रजातिंतु मानहान्यादिनानृपः ॥ १८ ॥ वपनंद्रविणादानं स्थानान्निर्यापणंतथा ॥ एषहिब्रह्मबंधूनां

67 वधोनान्योस्तिदैहिकः ॥ १९ ॥ कारागृहेषुनिक्षेपो ज्ञातीनामाततायिनां ॥ नशस्तस्तद्वधोलोके कालेनपरितापकः ॥ २० ॥
अग्निदोगरदश्चैव शस्त्रपाणिर्धनापहः ॥ क्षेत्रदारहरश्चैव षडेतेत्याततायिनः ॥ २१ ॥ आततायिनमायांत मपिवेदांतपारगं ॥ जि-
घांसंतंजिघांसेत नतेनब्रह्महाभवेत् ॥ २२ ॥ आततायप्यपियोविप्रः सदंड्योवपनादिना ॥ वधानर्हेनतत्कुर्या त्कुर्वाणोब्रह्महाभवेत्
॥ २३ ॥ यथापराधंदंडेन नपापीपुण्यवान्नृपः ॥ धनंचलभतेदंडा दंड्यःपापाद्विमुच्यते ॥ २४ ॥ प्रजानांरक्षणंदंडा दन्यथोछृंखलो
जनः ॥ धनदारादिहरणं मृत्युंचप्राप्नुयान्मिथः ॥ २५ ॥ राज्ञोपिजीवनंनस्या त्सुखलाभस्तुदूरकः ॥ अथोहिप्रथमंविष्णुः सृष्ट्या-
दौदंडमातनोत् ॥ २६ ॥ प्रथमेदंडनीतिंच येनसृष्ट्यादिकंभवेत् ॥ चंडरुद्दंडनीत्याच राजनीत्याप्रवर्तकः ॥ २७ ॥ इहामुत्रसुखंरा-
जा लभतेसुखमन्यथा ॥ रुधिरेणसमासिक्ता शिरोभिश्चपरिस्तृता ॥ २८ ॥ रिपूणांकदनंकृत्वा राज्ञासंप्राप्यतेमही ॥ महान्मत्यै
वजायेत मत्यैवधनवान्भवेत् ॥ २९ ॥ महीपितामहीमाता महीस्त्रीचमहीसुतः ॥ महीसैन्यंमहीभोगा विनामह्यानकिंचन ॥ ३० ॥
अतएवशिरोभिस्वै महीमार्जितिसर्वशः ॥ दानाद्यस्यामहापुण्यं हरणात्पातकंमहत् ॥ ३१ ॥ महीपालोलभेत्पुण्यं सुखमत्रपरत्र-
च ॥ महीपीडीलभेत्पापं दुःखमत्रपरत्रच ॥ ३२ ॥ महीयस्यसुसंपन्ना कोशःसैन्यंचतस्यहि ॥ अन्यथानैवकोशस्यात् सैन्यंतस्य
कुतोभवेत् ॥ ३३ ॥ ईदृशांयोमहींप्राप्य निःष्फलांकुरुतेनृपः ॥ नतत्समोस्तिमूर्खोत्र मूर्खोपिस्वार्थमीक्षते ॥ ३४ ॥ पादमात्राम-

पिमहीं तस्मान्नव्यर्थतांनयेत् ॥ यद्यत्रारोहतेबीजं ततस्तद्वापयेज्जनैः ॥ ३५ ॥ शिलाभूमौप्रकुर्वीत खेटखर्पटवाटिकाः ॥ नदी-
मानकृतांदेशां नयेतयदिशक्यते ॥ ३६ ॥ एवंराज्यंप्रकुर्वाणः सदाविष्णुपरोभवेत् ॥ अंतस्वस्यापिवैराजा चिंतयेद्विष्णुयंतृता
॥ ३७॥ कुर्वेहंतदधिष्ठाना त्तद्भिन्नोहंतुभस्मवत् ॥ पूर्वेपूर्वतरामत्तः कतिआसन्नृपाभुवि ॥ ३८ ॥ मेमेयदंतःसर्वेपि कालेनेशेच्छ-
याहताः ॥ तत्यजुःस्वयमिमांभूमिं प्रियव्रतमुखान्नृपाः ॥ ३९ ॥ तदन्येत्वनयात्यक्ताः कथंमेभवितास्महो ॥ पुत्रस्त्रीभृत्यपश्वादि
सर्वमीश्वरयंत्रितं ॥ ४० ॥ मदिच्छयानचोत्पन्ना नजीवंतिमदिच्छया ॥ मदिच्छयानम्रियंते वर्धंतेनमदिच्छया ॥ ४१ ॥ मदिच्छ-
यानवर्तंते मनोवाक्कायकर्मभिः ॥ मदधीनाअतोनैते ममतातेषुमेवृथा ॥ ४२ ॥ किंचदेहोप्ययन्नोमे मदिच्छाव्यभिचारतः ॥ म-
मयोनोभवेदेह स्तत्राहंताकथंमम ॥ ४३ ॥ देहेसावयवेतिष्ठ त्यपियस्मिन्गतेमृतः ॥ इतिव्यवस्थातिर्लोके सजीवोदेहतःपरः ॥ ४४ ॥
सोपिनस्वेच्छयादेहे स्थातुंशक्तोतएवहि ॥ परतंत्रःपरोयस्तु सएवेश्वरउच्यते ॥ ४५ ॥ सुखंनानाविधंजीवे दुःखंचापितथाविधं ॥
जीवाअपिपृथक्कृतेते तस्मात्त्कारणंपृथक् ॥ ४६ ॥ तदेवकर्मविज्ञेयं यथाकर्मफलप्रदः ॥ जगदीशस्ततोनात्र वैषम्यादिकथंचन
॥ ४७ ॥ संसारेभ्रमतस्त्वेवं नानायोनीरनेकशः ॥ कर्मभारपरिश्रांतो शरणंयामितंहरिं ॥ ४८ ॥ संसाराब्धौनिमग्नस्य नौरेकाश्री-
हरिर्मम ॥ इत्याद्यनेकधाराजा विविच्यत्द्धृदयेसदा ॥ ४९ ॥ कुर्वाणोपिवहीराज्यं स्मरेत्सत्द्धृदयेहरिं ॥ तत्कथाश्रवणंकुर्या त्काले

68

कालेदिनेदिने ॥ ५० ॥ ममाराधनसंपन्नो राज्यंन्यस्यसुतादिषु ॥ मुक्तसंगोभवेद्राज्यात् क्रमाद्देहादिकेष्वपि ॥ ५१ ॥ वनंगच्छेत्त-
पःसिध्यै गृहेवानिर्ममोवसेत् ॥ सत्संगीधर्मनिष्ठःस्या द्विशेषेणततःपरं ॥ ५२ ॥ आयुःशेषंनयन्नंते तद्विष्णोर्लभतेपदं ॥ निजक
र्मानुसारेण यत्रजातोभवेन्नरः ॥ ५३ ॥ यदवस्थोयदाचार स्तादृशोपिसदाहरिं ॥ पूर्वोक्तविधिनासम्यक् विविच्यभजतेसहि ॥
कर्मबंधविनिर्मुक्तो लब्धरूपस्तमाप्नुयात् ॥ ५४ ॥ इति श्रीविष्णुरहस्ये राजनीतिमोक्षोपदेशोनाम षट्त्रिंशोध्यायः ॥ ३६ ॥

॥ श्रीवेदव्यासायनमः ॥ सूतउवाच ॥ अनादिकर्मणाबद्धा जीवाईश्वरयंत्रिताः ॥ भ्रमंतिसंसृतौसर्वे यावन्मुक्तिरवाप्यते ॥ १ ॥
कर्मतद्विविधंप्रोक्तं धर्माधर्मविभेदतः ॥ सुखैककारणंधर्मोऽधर्मोदुःखैककारणं ॥ २ ॥ नित्योनैमित्तिकःकाम्य इतिधर्मस्त्रिधामतः ॥
दिनमासर्तुपक्षादौ नियमादुपदिश्यते ॥ ३ ॥ अकृतौप्रत्यवायश्च तन्नित्यमितिकीर्तितं ॥ नियमाभावतःकाल विशेषेविहितंचयत्
॥ ४ ॥ प्रत्यवायोऽकृतौयस्य तन्नैमित्तिकमुच्यते ॥ नियतेऽनियतेवापि कालेधर्मविधीयते ॥ ५ ॥ कृतेपुण्यंनपापंस्या दकृतौकाम्य
मेवतत् ॥ पुण्यंप्रजायतेनॄणां त्रिविधादपिकर्मणः ॥ ६ ॥ प्रायश्चित्तंतुकाम्यंस्या त्पापनाशोहितत्फलं ॥ पापांतरंभवेन्नैव प्राय-
श्चित्ताऽकृतौयतः ॥ ७ ॥ तदेतत्त्रिविधंकर्म प्रत्येकंद्विविधंमतं ॥ सबीजंचापिनिर्बीजं सबीजंद्विविधंस्मृतं ॥ ८ ॥ पुण्यबीजंपाप-

बीजं पुण्यबीजमिदंश्रुणु ॥ सम्यगास्तिक्यभावेन ज्ञानपूर्वंतुयत्कृतं ॥ ९ ॥ शाठ्यहीनंतुयत्कर्म पुण्यबीजंतदुच्यते ॥ शारीरदा-
क्ष्यसाध्यानि धनसाध्यानिकानिचित् ॥ १० ॥ देशकालस्वास्थ्यसाध्या न्येवंकर्माणिसर्वशः ॥ यथासंपत्तियत्कर्म शाठ्यहीनंतुत-
त्स्मृतं ॥ ११ ॥ शक्तिवंचनतोयत्स्या च्छाठ्यंतच्चप्रकीर्तितं ॥ असूययावाशाठ्येन दंभलोभादिनाकृतं ॥ १२ ॥ पश्चात्तप्तंचयत्पुण्यं
पापबीजंतदुच्यते ॥ शारीरदाक्ष्यवान्लोके धनसामर्थ्यवानपि ॥ १३ ॥ जायतेपुण्ययोगेन पुण्यबीजंचतद्यदि ॥ तपोदानादिकं-
कुर्व न्पुण्यमेवाभिवर्धयेत् ॥ १४ ॥ पापबीजंतुतस्यस्या त्तदादुर्भोगभोगतः ॥ परपीडादिकुर्वाणः पापमेवाभिवर्धयेत् ॥ १५ ॥ ज्ञा-
ताज्ञातफलत्वेन निर्बीजंद्विविधंमतं ॥ नास्तिक्येनप्रसंगाद्वा परंदृष्ट्वाभियाकृतं ॥ १६ ॥ औदासीन्येनयज्ज्ञानं तज्ज्ञातफलकं-
स्मृतं ॥ अनिषिद्धंतुसद्भोगं दत्वानश्यतिकर्मतत् ॥ १७ ॥ अज्ञानावस्थयास्वेन भार्यापुत्रादिनाकृतं ॥ पश्चादपियदज्ञातं तदज्ञा-
तफलंस्मृतं ॥ १८ ॥ सुवर्णवस्त्ररत्नादि तत्फलंजायतेहियत् ॥ बाल्येपशुत्वेनिद्रादौ जायमानंनबुध्यते ॥ १९ ॥ पश्चात्ज्ञातंतुत-
च्चेत्स्या त्पूर्ववाप्यनुमोदितं ॥ तत्तद्भाववशात्तस्य पूर्वरीत्याफलंभवेत् ॥ २० ॥ सत्कर्मविष्णुमुद्दिश्य कृतंतस्मिन्समर्पितं ॥ फला-
धिक्यंभवेत्तस्य मोक्षबीजंचजायते ॥ २१ ॥ अन्यस्मिन्नर्पितंयत्तु तत्तद्दैववशंतुतत् ॥ फलेन्यूनंभवेत्तच्च मोक्षबीजंनजायते ॥ २२ ॥
सर्वेष्वपिस्थितोविष्णुः सर्वकर्ताखिलाशयः ॥ साक्षात्परंपरायोगा त्फलेवैचित्र्यकृद्भवेत् ॥ २३ ॥ आभिचारिककर्माणि दुर्जना-

६९

नानिबर्हणे ॥ चेत्सतामुपकाराणि पुण्यबीजानितानिहि ॥ २४ ॥ स्वार्थमेवसतांपीडा मुद्दिश्याभिचरेद्यदि ॥ पापबीजंतुतत्कर्म
तत्सहायोपिपापकृत ॥ २५ ॥ भार्यापुत्रधनादीनि शरीरेंद्रियदक्षता ॥ अवश्यंसुखभोगाय सर्वेषांभाव्यमित्यतः ॥ २६ ॥ फल-
भूतानिकेषांचि त्कर्मणांप्रायशास्त्विति ॥ उत्सर्गतोहिलोकानां जायंतेतानिकर्मभिः ॥ २७ ॥ पापातिशययोगेन भार्यादिकमपो-
ह्यते ॥ कर्मवैगुण्यवशतः फलेवैगुण्यमीक्ष्यते ॥ २८ ॥ सुरूपायौवनस्थाच पूर्णायुःपुत्रिणीसुवाक् ॥ पत्यौभक्तिमतीनित्यं कुटुं-
बस्यमनोहराः ॥ २९ ॥ एवंगुणवतीभार्या सांगकर्मफलंस्मृतं ॥ आयुष्मान्सीलसंपंनो विद्यावान्दक्षगात्रकः ॥ ३० ॥ वंशक-
र्ताचभोग्यश्च धनीपुत्रोहिसत्फलं ॥ नातिकष्टार्जितंयत्स्या च्चोरादिभयवर्जितं ॥ ३१ ॥ यावज्जीवंदानभोग नियोज्यंतत्धनंहि-
सत ॥ गृहारामादिकंचैव मनोयत्रप्रसीदति ॥ ३२ ॥ इंद्रियाणिशरीरंच स्वस्वकार्यक्षमाणितु ॥ सांगकर्मफलान्याहु र्वैगुण्यवशा-
तोन्यथा ॥ ३३ ॥ सर्वेषांभोगदानाय संपदश्चंचलाःकृताः ॥ संसारेभगवांस्तस्मा त्संपत्सुमदमोहकृत् ॥ ३४ ॥ बहुकालेनभो-
ग्यानां संपदांक्षयहेतवे ॥ संपद्दातिमदंधत्ते पश्यंनैवनपश्यति ॥ ३५ ॥ अवज्ञानेचविप्राणां गुरूणांचसतामपि ॥ शीघ्रंपुण्यक्षये-
जाते संपदन्येनभुज्यते ॥ ३६ ॥ अनुग्रहीहरिर्यस्मि न्हरेन्मोहंमदंततः ॥ पूजकोगुरुविप्राणां पुण्यवृद्धिंलभेतसः ॥ ३७ ॥ मो-
क्षेनाधिकृतायेतु तेषांमोहादिवर्धयेत् ॥ कल्पांतरेमोक्ष्यमाणा नपिमोहेनयोजयेत् ॥ ३८ ॥ विघट्टनायमोक्षस्य सामग्र्यायोजय-

मोक्षेनाधि

श्री

न्मदं ॥ मोहादिकंचकुर्वीत विलंबस्तेनजायते ॥ ३९ ॥ मोक्तुकामस्तुयान्जीवा न्ससामग्रीःसुसाधयेत् ॥ सर्वसाक्षीसर्वनाथः
सर्वकर्ताहरिस्त्विति ॥ ४० ॥ सुखदुःखप्रदोजीवै र्जडैश्चापिसदीर्यति ॥ विहिताकरणात्पापं निषिद्धंस्यकृतेरपि ॥ ४१ ॥ प्रत्ये-
कंद्विविधंतच्च निर्बीजंचसबीजकं ॥ ज्ञाताज्ञातफलत्वेन निर्बीजंद्विविधंमतं ॥ ४२ ॥ प्रसंगेनप्रमादाद्वा यदौदासीन्यतःकृतं ॥ प-
रानुरोधात्ज्ञातंचे तत्ज्ञातफलकंस्मृतं ॥ ४३ ॥ तादृशंकर्मदुर्भोगं दत्वानश्यतिनान्यथा ॥ ततोभार्यादिनावापि संपन्नंपातकंहित
त् ॥ ४४ ॥ सर्वथास्वयमज्ञातं तदत्ज्ञातफलंस्मृतं ॥ विण्मूत्रमांसरक्तादि दुर्वस्त्रादिचतत्फलं ॥ ४५ ॥ बाल्येपशुत्वेनिद्रादौ जा-
यमानंनबुध्यते ॥ पश्चात्ज्ञातंतुतच्चेत्स्या त्पूर्ववाप्यनुमोदितं ॥ ४६ ॥ तत्तद्भाववशात्तस्य फलंभवतिनान्यथा ॥ इष्टानिष्टपदार्थे-
भ्यः दुःखेदुःखंचवेदनं ॥ ४७ ॥ तयोरन्यतरंज्ञानं भोगइत्यभिधीयते ॥ सुखभोगस्तुसद्भोगो दुर्भोगोदुःखवेदनं ॥ ४८ ॥ यद्यथा-
कर्मसंपन्नं तत्तथाप्यनुमोदितं ॥ तत्तद्भाववशात्तस्य फलंभवतिनान्यथा ॥ ४९ ॥ इष्टानिष्टपदार्थेभ्यः तत्तथाफलदंभवेत् ॥ पुण्य
बीजंपापबीजं सबीजंद्विविधंस्मृतं ॥ ५० ॥ यत्सतामुपकारार्थं पश्चात्तत्संतुयद्भवेत् ॥ संकटेपिकृतंयत्र पुण्यबीजंतुपातकं ॥ ५१ ॥
स्नानोपवासयात्रादौ हिमक्षुत्तृट्श्रमादिना ॥ दुःखंपुण्यफलंदत्वा पुण्यमेवाभिवर्धयेत् ॥ ५२ ॥ नास्तिक्यादथवाद्वेषा द्बुद्धिपूर्व-
तुयत्कृतं ॥ तत्पापंपापबीजंस्या दुत्तरोत्तरवृत्धये ॥ ५३ ॥ दारिद्र्यंनिरपत्यत्वं भार्यागेहादिवर्जनं ॥ फलबुत्ध्यास्तेयहिंसा मृग-

यादिकमाचरेत् ॥ ५४ ॥ तत्रनानाविधायासैः श्रांत्यादुःखमवाप्नुयात् ॥ अस्तुमास्तुफलंतस्य पापवृद्धिस्तुजायते ॥ ५५ ॥ औष-
धेवाविषेवापि द्रव्यांतरविभावनात् ॥ गुणाधिक्यंतथातद्व द्विष्णुभक्तिःसुकर्मणि ॥ ५६ ॥ फलाधिक्यप्रदाप्रोक्ता तद्वेषात्पापकर्म-
णि ॥ सर्वेषांकर्मणामाहु रवस्थात्रितयंबुधाः ॥ ५७ ॥ क्रियमाणादिभेदेन ततस्तच्छृणुचादरात् ॥ मनसाकर्मणावाचा सदाकर्मक-
रोत्ययं ॥ ५८ ॥ सदथासदुदासीन मित्येवंत्रिविधंहितत् ॥ सफलंसत्तथासत्स्या दुदासीनंतुनिष्फलं ॥ ५९ ॥ पुण्यंसदितिसंप्रोक्त
मसत्पातकमुच्यते ॥ यद्वेदाद्यागमैःसिद्धं तत्पुण्यमितिकीर्तितं ॥ ६० ॥ तैर्निषिद्धंतुपापंस्या दुदासीनमुदासितं ॥ क्रियतेहरहर्य-
त्त त्क्रियमाणंसमच्चयत् ॥ ६१ ॥ अतिक्रांतंसंचितंत त्प्रारब्धंतुफलोन्मुखं ॥ भोगादेवक्षयंयाया त्प्रारब्धंनान्यथाक्वचित् ॥ ६२ ॥
संचितानितुनस्यंति कर्माणिद्विविधान्यपि ॥ आगमाध्ययनंजाप्यं वेदशास्त्रार्थचिंतनं ॥ ६३ ॥ विष्णोःसंकीर्तनंभक्त्या तपोब्रा-
ह्मणतोषणं ॥ तीर्थसेवातीर्थयात्राऽहिंसादानंप्रपादिकं ॥ ६४ ॥ मातापितृगुरूणांच प्रीणनंपापहृद्भवेत् ॥ अधिकारादिसंपत्ता वा-
गमानामुपेक्षणं ॥ ६५ ॥ चिंतादुर्विषयाणांच विष्णुवैष्णवनिंदनं ॥ विप्रावज्ञासतांद्वेषो दयादानादिवर्जनं ॥ ६६ ॥ मातापितृगु-
रूणांच प्रीतितद्धत्पुण्यहृद्भवेत् ॥ मातापित्रोश्चयेमान्या मानदानादिभिर्जनैः ॥ ६७ ॥ स्वयंतेगुरुवन्मान्या स्तदवज्ञाहिदोषकृत् ॥
पितृव्योमातुलोभ्राता ज्येष्ठास्वश्रुस्वसाग्रजाः ॥ ६८ ॥ पित्रोःस्वसारौश्वशुरो यश्चविद्योपदेशकः ॥ उपाध्यायःपुरोधाश्च श्रोत्रियो-

वि० र० ७१

गुरुवत्स्मृताः ॥ ६९ ॥ सदामान्यानावमान्या इमेसर्वेपिसर्वदा ॥ विप्राणांवंदनंविष्णो रग्नेरप्यधिकंमतं ॥ ७० ॥ नतावद्दहतेव-
न्हि र्विप्रावज्ञायथादहेत् ॥ स्वोदरेशस्त्रघातोवा विषाशनमहिस्पृशिः ॥ ७१ ॥ देहमात्रविनाशाय ब्रह्मावज्ञाखिलंदहेत् ॥ अद-
त्यंवन्हिनायत्स्या दहार्यंनृपदस्युभिः ॥ ७२ ॥ तद्धरेत्तद्दहेत्क्षिप्रं विप्रावज्ञानसंशयः ॥ यदवज्ञानतःशक्रो दौर्भाग्यंपरमंगतः ॥७३॥
इंद्रद्युम्नोगजोजातो मृतोहंसश्चडिंभिकः ॥ समुद्रःशोषमापन्नः चंद्रमाराजयक्ष्मवान् ॥ ७४ ॥ नहुषश्चच्युतोराज्या द्यादवाश्चक्षयं-
गताः ॥ आसुरींयोनिमापन्नौ जयश्चविजयस्तथा ॥ ७५ ॥ नलकूबरमणिग्रीवौ वृक्षतांगमितोयतः ॥ अनपत्योभवत्पांडु स्तथा-
कल्माषपान्मुखाः ॥ ७६ ॥ परीक्षिन्मरणंप्राप्तो बलीराज्यच्युतोभवत् ॥ एवंनानानृपाःप्रायो विप्रावज्ञानपातिताः ॥ ७७ ॥
अन्येपिबहवोलोका एषांनामापिदुःसहा ॥ तन्मूढानैवजानंति मंदभाग्यामदंगताः ॥ ७८ ॥ अवज्ञायाःफलंदृष्ट्वा स्वयंभुत्कापि
मोहिताः ॥ श्वपुच्छवत्सदामत्ता विप्रावज्ञांप्रकुर्वते ॥ ७९ ॥ जानातिविप्रमाहात्म्यं स्वयमेवहरिःप्रभुः ॥ कृतंपादमपिस्वस्य त्द-
दियेषांबभारयः ॥ ८० ॥ ज्ञातवानंबरीषश्च छलतोपिचकोपन ॥ ददौपंचाशतंकंन्या राजासौभरयेभयात् ॥ ८१ ॥ समांधाता-
स्मजानाति विप्रमाहात्म्यमद्भुतं ॥ रुग्मिणीसहितःकृष्णो रथंस्वयमुवाहयः ॥ ८२ ॥ सकृष्णोवेदमाहात्म्यं किंविदुर्मूढचेतसः ॥
और्वस्यानुग्रहाद्राजा सगरोराज्यमाप्तवान् ॥ ८३ ॥ द्रुपदोद्रोणहंतारं वन्हेःपुत्रमवाप्तवान् ॥ मंत्रेबृहस्पतेस्तिष्ठ न्निंद्रोमुक्तस्तुसं-

अ० ३७
अहार्यं
७१

७।
कटात् ॥ ८४ ॥ मंत्रोपदेशतःकुंती गांधारीचसुतान्विता ॥ पुत्रारामादयोजाता राज्ञोदशरथस्यहि ॥ ८५ ॥ मार्कंडेयोतिदीर्घा--
युः श्रीमंतश्चगयादयः ॥ हरिश्चंद्रादयोन्येपि राजानोधनिकाअपि ॥ ८६ ॥ जाताःसर्वेपिसंपन्ना मूढाजानंतिकिंनुतान् ॥ किंय-
ब्रूयांकतिब्रूयां कथंब्रूयामहंहिवः ॥ ८७ ॥ महिमानंतुविप्राणां हरिणामानिताहिये ॥ उपकारायकेषांचि दपकारायकस्यचित् ॥
॥ ८८ ॥ मुखंहिब्राह्मणाविष्णो नृपस्येवात्रदूतकाः ॥ नानासंपत्करातुष्टाः रुष्टानानाविपत्कराः ॥ ८९ ॥ अतःसंमानयद्ज्ञात्वा
बुभूषुस्तान्सदैवहि ॥ श्रेष्ठस्ययस्यकस्यापि दूतंसंमानयेद्ध्रिया ॥ ९० ॥ सर्वश्रेष्ठस्यविष्णोर्ये मुखंतानवजानते ॥ कथंभीर्जायते-
नैषां दुष्टानांनिर्ह्रियामपि ॥ ९१ ॥ विष्णोर्मुखमितिज्ञात्वा प्यवमानंप्रकुर्वते ॥ अहोमायाबलंविष्णोः पश्यंनपिनपश्यति ॥९२॥
सर्वधीप्रेरकोदेव स्तंध्यायेमसदैवहि ॥ इत्यर्थंप्राहगायत्री सदेवोविष्णुरेवहि ॥ ९३ ॥ अधनान्सधनान्कर्तुं सधनानपिनिर्धना--
न् ॥ ब्राह्मणान्निर्धनांश्चक्रे संतोषरहितानपि ॥ ९४ ॥ संतुष्टायदिविप्रास्युः केतर्हिगृहिणांगृहं ॥ गत्वाधनंप्रगृण्हीयु र्येनदाताध-
नीभवेत् ॥ ९५ ॥ अथवाकस्यतेवज्ञां धनिनःकुर्युरुत्धताः ॥ कथंस्युर्निधनाःस्तेतु कथंस्युःसधनाःपरे ॥ ९६ ॥ यथारत्थ्यानि--
चक्राणि परिवृत्तिंप्रयांतिहि ॥ तथैवसंपदःसर्वाः परिवर्ततिसर्वदा ॥ ९७ ॥ धनव्ययंप्रतिदिनं विचारयतिमूढधीः ॥ यममार्ग--
स्यपाथेयं मनस्यपिनचिंतति ॥ ९८ ॥ व्ययाग्निर्गृहिणांगेहे दहत्यहरहर्धनं ॥ विप्रैराकृष्यतेयत्तु तदेवास्यावशिष्यते ॥ ९९ ॥

वि० र०
७२

पुत्रस्त्रीपशुभृत्येभ्यः कियद्वित्तंप्रयच्छति ॥ तत्पादांशमपिस्वस्य कुर्यात्पाथेयमन्वहं ॥ १०० ॥ पश्चात्तापोनजायेत मरणानंतरं
तथा ॥ विद्वांस्तथायतेतादौ यावत्धस्तेधनंभवेत् ॥ १०१ ॥ विप्राणामवमानेन यथापुण्यंनहीयते ॥ तथासंप्रीणयेद्विप्रां स्तेभ्यः
पुण्यंदुहेदपि ॥ १०२ ॥ प्रतिगृहेणविप्राणां पुण्यहानिःप्रजायते ॥ जपाध्ययनहोमाद्यै पुनःपूरणमाचरेत् ॥ १०३ ॥ कीर्तनाद--
पिनश्यंति नृणांपुण्यानिकानिचित् ॥ तस्मान्नकीर्तयेत्पुण्यं मयेदंकृतमित्यपि ॥ १०४ ॥ मनस्यपिनकुर्वीत पश्यपुण्यधिकान्स्व--
तः ॥ पुण्येपुंण्याधिकान्पश्ये दुःखेदुःखाधिकानपि ॥ १०५ ॥ धनीधनाधिकान्पश्ये त्पापेपापाधिकान्नतु ॥ विनीतःसर्वदातिष्टे
दनित्यंवीक्ष्यसर्वशः ॥ १०६ ॥ नाभिमानंप्रकुर्वीत तस्मैतुष्येज्जनार्दनः ॥ पापानामपिपुंण्यानां संचितानांहिकर्मणां ॥ १०७ ॥
नाशोभवतिवृध्धिश्च प्रत्यहंजायतेपुनः ॥ पुनःप्रारब्धतांयाति भोग्यानिचपुनःपुनः ॥ १०८ ॥ एकेषुभुज्यमानेषु जायंतेकर्मको--
टयः ॥ मोक्षस्यभवितुंनार्हो मज्जतःकर्मवारिधौ ॥ १०९ ॥ अतोहिमोक्षुकामेन कार्यंश्रवणमीशितुः ॥ मननध्यानयोगेन तुष्टः-
साक्षाद्भवेत्धरिः ॥ ११० ॥ ततःसंचितनाशःस्या त्क्रियमाणंनलिप्यते ॥ प्रारब्धनाशोभोगेन कर्ममुक्तोभवेन्नरः ॥ १११ ॥ लिंग-
मुक्तःशुध्धरूपः स्वरूपंनिजमश्नुते ॥ ब्रह्मणासहभुंजान स्ततोनावर्ततेपुनः ॥ ११२ ॥ अनंतासनवैकुंठ नारायणपुरेषुसः ॥ रम-
माणस्वैरचेष्ट इच्छयान्यत्रमोदते ॥ ११३ ॥ कामभक्षःकामपानः कामस्त्रीभोगवान्हिसः ॥ इच्छाविहन्यतेनास्य नेच्छानर्हेप्रजा-

१५
अ० ३७
विद्वान् तथा

कृ०
७२

72

यते ॥ ११४ ॥ स्वरूपानंदपूर्णोसौ सारूप्यंवासलोकतां ॥ सामीप्यंवापिसायुज्यं प्राप्तोनंतेसमोदते ॥ ११५ ॥ इतिवःकथितं-
विप्रा यथाज्ञानंमयापुरः ॥ आख्यास्यामितथान्यच्च मत्तोन्यच्छ्रोतुमिच्छथ ॥ ११६ ॥ इति श्रीविष्णुरहस्ये कर्मविवेक वर्णनंनाम-
सप्तत्रिंशोध्यायः ॥ ३७ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीवेदव्यासायनमः ॥ सत्यव्रतउवाच ॥ अवज्ञानेनविप्राणां तथासंप्रीणनेनच ॥ क्षयःपुण्यस्यपापस्य वृद्धिश्चापिविपर्ययात्
॥ १ ॥ कुतएवंकथंतेषा मवज्ञानंचतर्पणं ॥ तन्नआख्याहिसूतत्वं श्रोतुमिच्छामहेवयं ॥ २ ॥ सूतउवाच ॥ अनादिकर्मणाबद्धा
जीवाःसर्वेसुखेप्सवः ॥ सुखदानेततस्तेषां किंचिद्भाव्यंनियामकं ॥ ३ ॥ कियत्कस्मैकथंदेयं सुखंदुःखंचवाममम ॥ नैर्घृण्यंविषमत्वं-
च ममनस्यात्कथंत्विति ॥ ४ ॥ विचिंत्यकारणंचक्रे तपोदानात्मकंसुखे ॥ कारणस्यविचित्रत्वा त्कार्येवैचित्र्यमीक्ष्यते ॥५॥ विप-
र्ययंहिदुःखस्य कारणंनिर्ममेहरिः ॥ मनसाकर्मणावाचा पुण्यंकर्मतपःस्मृतं ॥ ६ ॥ स्वधनेपरसत्तायाः कृतिर्दानंप्रकीर्तितं ॥ उप-
देष्टायदानस्या त्तदास्यात्तुकथंतपः ॥ ७ ॥ प्रतिग्राहीयदानस्या त्तदादानंकथंभवेत् ॥ इतिद्वयस्यसिध्यर्थं हरिर्विप्रान्विनिर्ममे॥८॥
उपादिशेत्कथंसाक्षा त्प्रतिगृण्हीतवास्वयं ॥ अतोलोकोपकारार्थं चकारप्रतिमाश्चलाः ॥ ९ ॥ असंतुष्टाश्चताःप्राय स्तथाप्रायेणनि-

धनाः ॥ नतृप्तःप्रतिगृण्हीत निराशोनवदेदपि ॥ १० ॥ अतआवश्यकत्वेन कर्तव्यंहरिणाकृतं ॥ तपस्तुपूर्वमेवोक्तं दानपात्रत्वमु-
च्यते ॥ ११ ॥ तपःस्वाध्यायविद्याभि र्विप्रःपात्रत्वमश्नुते ॥ दुर्लभंत्रयमेकत्र कुत्रचित्सुलभंद्वयं ॥ १२ ॥ एकैकस्मादपिप्रोक्तं पा-
त्रत्वंनान्यथाहितत् ॥ अन्नस्यक्षुधितंपात्रं पानीयस्यपिपासितं ॥ १३ ॥ नहिजातिविवेकोत्र विशेषाद्ब्राह्मणःस्मृतः ॥ पशुवस्त्रधना-
दीनां पात्रंस्यात्तपआदिमत् ॥ १४ ॥ विशेषस्तत्रविज्ञेयः क्रमेणतपआदिषु ॥ मोक्षोपयोगियत्ज्ञानं साहिविद्येतिभण्यते ॥ १५ ॥
विद्यावानधिकस्तस्मा च्छ्रौतंपात्रंततोहिसः ॥ विप्राणामपिपात्राणि विप्राएवमिथःस्मृताः ॥ १६ ॥ तारतम्यंतुतत्रापि तपआदेर्वि-
शेषतः ॥ विचारोत्रबहुःप्रोक्तो धरिण्यैहरिणास्वयं ॥ १७ ॥ ब्रह्मणानारदादिभ्यः स्वामिनेशंभुनातथा ॥ तस्मात्सर्वप्रयत्नेन पा-
त्रेदानंसमाचरेत् ॥ १८ ॥ दृष्टिंदद्यान्मनोदद्या द्वाचंदद्याच्चसूनृतां ॥ उत्थायचासनंदेया दित्यादौविप्रतोषणं ॥ १९ ॥ शक्त्या--
दानंप्रकुर्वीत यथापात्रंयथाधनं ॥ यथाश्रितत्वसंबंधं यथाप्रीतियथाश्रमं ॥ २० ॥ इत्थंदानान्नतोषस्या द्यदिविप्रस्यकर्हिचित् ॥
तदासाक्षीहरिस्तस्मा त्तुष्टोदातरिजायते ॥ २१ ॥ यत्रकालेयत्रदेशे लभ्यंतेब्राह्मणायथा ॥ तथैववंदनीयास्ते यत्तस्ताहरिमूर्तयः
॥ २२ ॥ हरिभावनयातस्मा त्पूज्यास्तेभक्तिपूर्वकं ॥ यःकोपिदेवंतुष्येत विप्राणामेवतोषणात् ॥ २३ ॥ पितरोपिहितुष्यंति भू-
ताःप्रेताश्चसर्वशः ॥ होमंविनाग्नौतुष्यंति ब्राह्मणैरखिलैःसुराः ॥ २४ ॥ नतथाहोममात्रेण तस्माद्ग्नेर्वरोद्विजाः ॥ अतस्तान्नाव-

यतस्ते

73

मन्येत तोषयेदपिशक्तितः ॥ २५ ॥ तेनतुष्यंतिसर्वेपि देवाविष्णुपुरःसराः ॥ एकंदशधनोदद्या त्सहस्रधनवान्शतं ॥ २६ ॥ द-
शदद्याच्छतधनः सर्वेतुल्यफलाःस्मृताः ॥ पंचदद्याच्छतधनः सहस्रधनवान्दश ॥ २७ ॥ पुण्याधिक्यंशतधने भवेत्तत्रनचान्यथा
॥ शारीरदाक्ष्यतस्त्वेवं पुण्यंतपसिनिर्दिशेत् ॥ २८ ॥ भक्त्याधिक्यात्फलाधिक्यं तदूनत्वात्फलोनता ॥ दग्धानियैःशरीराणि
तपोभिर्नियमान्वितैः ॥ २९ ॥ ब्राह्मणास्तोषितायैश्च तएवस्युर्महाधनाः ॥ यथायथातपश्चीर्णं यथादानंचयैःकृतं ॥ ३० ॥ पूर्वज-
न्मसुधर्मिष्ठै र्लभंतेतेतथातथा ॥ कृतंतपश्चयैर्दानं सांतरंवानिरंतरं ॥ ३१ ॥ तैःस्तथालभ्यतेसौख्यं सांतरंचनिरंतरं ॥ नयैःकृतंत-
पोदानं पापंचाप्यधिकंकृतं ॥ ३२ ॥ निर्धनाअनपत्याश्च नानादुःखान्विताहिते ॥ हसंतःकुर्वतेपापं रुदंतोभुंजतेफलं ॥ ३३ ॥ क्लि-
श्यंतःपुण्यमार्जंति हसंतोभुंजतेफलं ॥ तपोदानविहीनानां भुंजानानांनिजंफलं ॥ ३४ ॥ तस्योपरिभवेद्दोषो वृथातापकरोहिसः
॥ सुक्षेत्रेकोद्रवानुप्त्वा व्रीहीन्वांछतिमूढधीः ॥ ३५ ॥ नजानात्यविवेकेन वृथासंतापमश्नुते ॥ इच्छत्यन्यत्करोत्यन्य द्वृत्तलाभे-
चखिद्यति ॥ ३६ ॥ अहोमोहस्यमाहात्म्यं पामरादपिपामरः ॥ अनायासेनकेषांचि ज्जायंतेभूरिसंपदः ॥ ३७ ॥ नलभंतेक्लिश्य-
मानाः केचित्स्वल्पमपीहितं ॥ पश्येत्तत्रविवेकेन पुण्यंपापंचकारणं ॥ ३८ ॥ अतःपुण्यंप्रकुर्वीत यावच्छक्नोतिबुद्धिमान् ॥ दरि-
द्रःपुण्यकृच्चेत्स्या त्परेजन्मनिभाग्यभाक् ॥ ३९ ॥ भाग्यभाक्चदारिद्रस्या दुन्मादात्पापकर्मकृत् ॥ एवंहिजीवराशीनां भोगस्या-

त्सुखदुःखयोः ॥ ४० ॥ संपदोविपदश्चैव भ्रमंतिरथचक्रवत् ॥ अतोयावद्यस्यशक्ति र्दानेतपसिभूमिप ॥ ४१ ॥ तावत्येवप्रकुर्वी-
त पुण्यमित्याहहिश्रुतिः ॥ धूम्रपानादयःक्लेशाः(शीतवातातपादिजाः ॥ ४२ ॥ नयत्रतद्वरंपुण्यं) नराणांविप्रतोषणं ॥ सुखादिपु-
ष्टिदंपुण्यं यशःकीर्तिकरंपरं ॥ ४३ ॥ रोगपापहरंलोके विप्रशेषान्नभोजनं ॥ तदन्नंतत्धनंनृणां यद्विप्रेषुव्ययीकृतं ॥ ४४ ॥ नत-
त्धनंव्ययोनासौ योविप्राणांनतोषकृत् ॥ सानुकूलेहरौदेयं यतःपूरयिताहरिः ॥ ४५ ॥ प्रतिकूलेहरौदेयं यतःसर्वंहरिष्यति ॥ दा-
रिद्र्यंयद्यवश्यंस्या त्तदाचोरनृपादिभिः ॥ ४६ ॥ धनहानिर्भवेदेव दानात्पुण्याधिकोभवेत् ॥ संपदोयदिजायेरन् तदादानात्कियान्क्ष
यः ॥ ४७ ॥ दाताहस्तसहस्रैस्या त्धरिःप्रीतोनृणांयदि ॥ व्ययोहस्तद्वयेनास्य धनस्यभविताकियान् ॥ ४८ ॥ हर्ताहस्तसहस्रै-
श्चे त्धनस्यभविताहरिः ॥ तदाहस्तद्वयेनासौ कियद्रक्षणमाचरेत् ॥ ४९ ॥ तस्माद्दानंप्रकुर्वीत सर्ववांछाप्रपूरकं ॥ विनाशरीरसंक्ले-
शै र्महापुण्यंयतोभवेत् ॥ ५० ॥ सर्वेपियदिदातारः स्युस्तदाग्निनृपादयः ॥ किंदहेयुर्हरेयुःकिं तस्मात्तेविरलाभुवि ॥ ५१ ॥ नवि-
प्रंकोपयेद्विद्वान् रुष्टंचपरिसांत्वयेत् ॥ प्रतिकोपंनकुर्वीत यदिच्छेच्छ्रेयमात्मनः ॥ ५२ ॥ सांत्व्यमानोपिसांत्वेन शक्त्याचेद्ब्रह्ममेधिना
॥ नशांतिंलभतेतर्हि नगृहीदोषभाग्भवेत् ॥ ५३ ॥ शौचंस्नानंजपोहोमः स्वाध्यायपितृतर्पणं ॥ कालेकालेप्रकुर्वीत तत्तपःपरिकी-
र्तितं ॥ ५४ ॥ श्रवणंमननंविष्णो स्तपसामुत्तमंतपः ॥ अवश्यंतत्तपःकुर्या त्ध्यानंचापिविशेषतः ॥ ५५ ॥ महापुण्यंमोक्षबीजं सं-

सारेपिसुखप्रदं ॥ धनवान्निर्धनोवापि तदवश्यंसदाचरेत् ॥ ५६ ॥ संगेनविष्णुभक्तानां विष्णौभक्तिर्विवर्धते ॥ संगर्दुर्विदुषांचैव
प्रायेणक्षयमश्नुते ॥ ५७ ॥ अतःसंगंप्रकुर्वीत सद्भिरेवसदानरः ॥ श्रोतव्यंश्रुणुयात्तेभ्यः कथाःकुर्याश्चतैःसह ॥ ५८ ॥ सदासंतोभि-
गंतव्या यद्यप्युपदिशंतुनः ॥ याश्चस्वैरकथास्तेषा मुपदेशाभवंतिते ॥ ५९ ॥ शक्तिवंचनतोदानं शाठ्यदानंप्रकीर्तितं ॥ हरिस्तेन-
नतुष्येत फलमल्पंभवेत्ततः ॥ ६० ॥ अवमानेनशाठ्येन पापमप्यधिकंभवेत् ॥ तृणानिभूमिरुदकं वाक्चतुर्थीचसूनृता ॥ ६१ ॥
एतान्यपिसतांगेहे नोच्छिद्यंतेकदाचन ॥ गृहिणःशक्त्यभावेतु पात्रावज्ञानदोषकृत् ॥ ६२ ॥ अंधोयादिनपश्येत भ्रांतोदद्यान्मनो
नचेत् ॥ रोगीवापंगुलोवापि नोत्तिष्ठेतंनदोषकृत् ॥ ६३ ॥ मूकश्चेन्नवदेद्विप्रां स्तृणभूमिर्नवाप्यते ॥ दोषाभावस्तदैवस्या दन्य-
थादोषभाग्भवेत् ॥ ६४ ॥ एवंमहादरिद्रश्चे न्नदद्याद्दोषभाङ्नहि ॥ अवज्ञांघटयत्येव संपदोनाशहेतवे ॥ ६५ ॥ वृत्ध्येघटयत्ये-
व विप्राणांतोषणंहरिः ॥ अपाहरत्यल्लंकां रावणाद्रामरूपधृक् ॥ ६६ ॥ विभीषणायतद्दातु मार्जितांपूर्वकर्मभिः ॥ बलेर्यत्प्रति-
जग्राह त्रैलोक्यंवामनोहरिः ॥ ६७ ॥ दातुमिंद्रायतद्राज्यं सर्वत्रैवंनिरीक्षयेत् ॥ अथापिदययाक्लिन्न चेताःसर्वेश्वरोहरिः ॥ ६८ ॥
यथापराधंलोकानां नैवदंडंकरोत्यसिः ॥ संपदश्चंचलालोके गत्वर्योवश्यमेवहि ॥ ६९ ॥ यावच्छक्त्याप्रकुर्वीत ब्राह्मणस्यहितोष-
णं ॥ यथादाक्ष्यंप्रकुर्वीत तपोपिस्वहितेप्सया ॥ ७० ॥ इतिवःकथितंविप्राः यत्पृष्टमखिलंचतत् ॥ यदन्यत्प्रष्टुमिच्छास्या त्तद-

प्याख्यामिशक्तितः ॥ ७१ ॥ इति श्रीविष्णुरहस्ये ब्राह्मणप्रशंसनंनाम अष्टात्रिंशोध्यायः ॥ ३८ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीवेदव्यासायनमः ॥ गालवउवाच ॥ अनंतासनवैकुंठ नारायणपुराणितु ॥ त्रीणिधामानिवैविष्णोः कुत्रसंतीतितद्वद ॥
॥ १ ॥ कथंभोगाःप्रजायंते सर्वदोषविवर्जिते ॥ स्थानत्रयेतुमुक्तानां निर्दोषाणांस्वभावतः ॥ २ ॥ क्षुधाविनाकथंभक्ष्यं कथंपानं-
तृषांविना ॥ कामोद्रेकंविनाभोगः कथंस्त्रीणांप्रजायते ॥ ३ ॥ क्षुधादयोयतोदोषाः निर्दोषास्युःकथंनुते ॥ अविनाशिनितत्स्थाने
फलपुष्पादयःकथं ॥ ४ ॥ भुज्यंतेवाथवेच्छैक्यं कथंस्याद्भोक्तृभोग्ययोः ॥ स्त्रीपुंसयोर्वाहनानां गजादीनांचसर्वशः ॥ ५ ॥ इच्छा-
भेदेकथंसौख्य मिच्छैक्यंसर्वदाकथं ॥ एतन्नोविस्तराद्ब्रूहि व्यासशिष्योसिसर्ववित् ॥ ६ ॥ सूतउवाच ॥ ब्रह्मांडस्यापिविस्तारः
पंचाशत्कोटियोजनः ॥ मध्यभागेतस्यमेरु र्लक्षयोजनमुच्छ्रितः ॥ ७ ॥ अधःषोडशसाहस्र योजनात्तस्यविस्तृतिः ॥ द्वात्रिंशद्यो-
जनायामः शिरोविस्तृतिरुच्यते ॥ ८ ॥ तन्मध्यभागमारभ्य यावद्ब्रह्मांडखर्परं ॥ विस्तारोदशकाष्ठासु पंचविंशतिकोटयः ॥ ९ ॥ ७५ द
जंबूद्वीपोभितोमेरोः पंचायुतमितस्मृतः ॥ लक्षयोजनविस्तारं एवंद्वीपोयमुच्यते ॥ १० ॥ प्लक्षादिद्वीपषट्कंतु क्रमाद्द्विगुणितंम-
तं ॥ परितोवलयाकाराः सप्तानांसप्तसिंधवः ॥ ११ ॥ लवणेक्षुसुरासर्पि र्दधिक्षीरांबुपूरिताः ॥ तत्रक्षीराब्धिमध्येतु द्वात्रिंशल्लक्ष-

75

योजने ॥ १२ ॥ श्वेतद्वीपोहरेर्लोको द्विशतायुतयोजनः ॥ शाकद्वीपंसमारभ्य परितोवलयाकृतिः ॥ १३ ॥ षड्लक्षयोजनोत्से
धः स्तद्भागप्रकीर्तितः ॥ श्रीभागःपरतस्तस्य दुर्गाभागेपितत्परः ॥ १४ ॥ सप्तमाज्जलधेःपारे तदध्यर्धासुवर्णभूः ॥ तावल्लोक-
इतिप्रोक्तो भानुरश्मिविलोकनात् ॥ १५ ॥ अलोकःपरतःसूर्य लोकाभावेनमूर्तितः ॥ अलोकलोकयोर्मध्ये लोकालोकोमहाच-
लः ॥ १६ ॥ पंचाशल्लक्षविस्तारो लक्षद्वयसमुच्छ्रयः ॥ पंचायुतमितास्तस्यो भयतोभित्यकामता ॥ १७ ॥ लोकालोकात्तुपरतो
लोकाद्विगुणितंतमः ॥ परतोद्विगुणंतस्मा द्घनोदकमितिस्मृतं ॥ १८ ॥ दध्याकारंजलंतत्तु नानाद्वीपसमाकुलं ॥ येषांमणिप्रका
शेन तमसोनास्तिसंभवः ॥ १९ ॥ तत्पारेखर्परंयाव दनंतासनमुच्यते ॥ लक्षत्रयंयोजनानां विस्तृतंवलयाकृतिः ॥ २० ॥ श्री-
भूदुर्गात्मकाभागा स्तत्रापिपरतस्थिताः ॥ एवंस्थानद्वयंविष्णो र्भूमिष्ठमिवदृश्यते ॥ २१ ॥ अधस्ताद्भूमिनाशेपि तदनश्यत्थिति-
ष्ठति ॥ भूदुर्गाभागयोस्तत्र भूमिनाशेप्रणश्यति ॥ २२ ॥ श्रीभागोनित्यएवास्ति मुक्तैरेवनिषेवितः ॥ पृथिवीलोकतोधस्तात् या-
वद्ब्रह्मांडखर्परं ॥ २३ ॥ पंचविंशतिकोट्यस्तु योजनानांप्रकीर्तितं ॥ तत्पंचाशत्त्रयंतोयं पंचाशद्वितयंदलं ॥ २४ ॥ तत्रमग्नंमेरु-
मूलं सहस्राणितुषोडश ॥ समुद्रास्तत्रसप्तापि गंभीराविस्तृतेःसमं ॥ २५ ॥ कोटियोजनगंभीरं तत्रैवचघनोदकं ॥ घनोदकादध-
स्तातु भूदलंकोटियोजनं ॥ २६ ॥ कोटौकोट्यौततोधस्ता त्ज्ञेयंपातालसप्तकं ॥ ततोप्यधस्तादसप्तापि नरकारौरवादिकाः ॥

 ॥ २७ ॥ लक्षद्वादशकंतत्र प्रत्येकंनरकांतरं ॥ अधस्तात्सर्वतोभूमे र्दलंषोडशलक्षकं ॥ २८ ॥ ततोधोप्यतिगंभीरे जलेसाक्षात्ध-
 रिःस्वयं ॥ आधारशक्तिसंयुक्तो नानारूपैःप्रदीप्यति ॥ २९ ॥ भूदलेलक्षतोधस्ता त्तिष्ठंतिजलदेवताः ॥ तत्रास्तिवारुणोलोको
नानाभोगसमन्वितः ॥ ३० ॥ सुवर्णनलिनीप्रायः पूर्णप्रायोंबुनिर्झरैः ॥ भूलोकादूर्ध्वतोमेरुः छत्राकारःसुरालयः ॥ ३१ ॥ चतुरा-
शीतिसाहस्रो नानोद्यानविराजितः ॥ गंधर्वैर्देवताभिश्च स्थानेस्थानेसदान्वितः ॥ ३२ ॥ परितस्तुचतुष्कोण मिलावृत्तमुदीरितं ॥
प्रत्येकंतच्चतुर्दिक्षु नवसाहस्रविस्तृतं ॥ ३३ ॥ माल्यवान्पश्चिमेतत्र पूर्वतोगंधमादनः ॥ केतुमालंचभद्राश्वं क्रमात्खंडेतयोःपरे
॥ ३४ ॥ एकत्रिंशत्सहस्राणि प्रत्येकंदीर्घतातयोः ॥ चतुस्त्रिंशत्सहस्राणि विस्तारोपितयोस्मृतः ॥ ३५ ॥ निषधोहेमकूटश्च हि-
मालयइतित्रयः ॥ हरिवर्षंकिंपुरुषं भारतंचेतिदक्षिणे ॥ ३६ ॥ क्रमात्खंडत्रयंप्रोक्तं यावल्लवणवारिधिः ॥ नीलश्वेतश्चशृंगीच उ-
त्तरेवधिपर्वताः ॥ ३७ ॥ रम्यंहिरण्मयंचैव कुरुवर्षमितित्रयं ॥ खंडानांयावदंभोधि र्विस्तृतानिमहर्षयः ॥ ३८ ॥ प्रत्येकंखंडषट्-
कंतु नवसहस्रयोजनं ॥ मर्यादापर्वतानांतु अष्टानामपिविस्तृतिः ॥ ३९ ॥ द्विसहस्रंयोजनानां प्रत्येकंपरिकीर्तिता ॥ द्वीपेष्वन्ये-
पुखंडानि प्रत्येकंसप्तसप्ततु ॥ ४० ॥ खंडद्वयंपुष्करस्य नवखंडमिदंस्मृतं ॥ भुवर्लोकस्तुभूलोका दूर्ध्वतोलक्षयोजनः ॥ ४१ ॥ म-
हेंद्रनगरीतस्मा त्पंचाशल्लक्षयोजना ॥ तदध्यर्धोस्वर्गलोक स्ततोध्यर्धाःपरेस्मृताः ॥ ४२ ॥ महर्जनस्तपश्चेति सप्तलोकास्तदूर्ध्वतः

76

॥ भूलोकाच्चुतपोयाव द्वैकुंठंसप्ततःपरं ॥ ४३ ॥ यावदंडकटाहंत दूर्ध्वमूर्ध्वंव्यवस्थितं ॥ मध्यभागश्रियस्तत्र सतुलोकःसनातनः
॥ ४४ ॥ मुक्ताएवरमंतेत्र पुनरावृत्तिवर्जिताः ॥ भूदुर्गाभागकौतत्र दक्षिणोत्तरतास्थितौ ॥ ४५ ॥ आराधितोस्तियैर्विष्णु र्नानापु-
ण्योच्चयैर्नरैः ॥ निवसंतितएवात्र क्षीणेपुण्येपतंत्यधः ॥ ४६ ॥ संसारेपूर्वसंस्कारा च्छ्रीविष्णुश्रवणादिना ॥ आराध्यदृष्टबिंबास्ते
मुक्तामोदंतिसर्वदा ॥ ४७ ॥ अरण्याख्यौसुधासिंधू विष्णोर्लोकत्रयेपिहि ॥ सीमाविभाजकौतौतु भूदुर्गाभागयोःक्रमात् ॥ ४८ ॥
श्रीभागःशुत्धसत्वात्मा मुक्तैरेवनिषेवितः ॥ यथायथैवमुक्तेछा फलंपुष्पादिकंतथा ॥ ४९ ॥ सत्वतोजायतेशीघ्रं मिच्छांतेतत्रलीय
ते ॥ तरंगाइवतोयेषु तदात्मानोपितल्लयाः ॥ ५० ॥ तथैवसत्वतःसर्वं दृश्यतेलीयतेपिच ॥ कामोद्रेकःक्षुदातृष्णा गुणस्याद्विषये-
सति ॥ ५१ ॥ तदभावेतुदोषस्या न्नदोषस्तत्रविद्यते ॥ सित्धंस्यादिच्छयैवेष्टं तत्रदोषःकथंभवेत् ॥ ५२ ॥ यतंतेक्षुत्तृषादीनां वृ--
त्थौसंपंनभोगकाः ॥ अतएवनतेदोषा स्तत्रसंतोपिसर्वथा ॥ ५३ ॥ स्त्रीपुंसभर्तृकादीनां मिच्छैक्यंतत्रसर्वदा ॥ स्वभावादेवमुक्ता-
नां नेच्छाभेदःकथंचन ॥ ५४ ॥ नासूयानाप्यवज्ञानं नीचानामधिकेषुहि ॥ निर्दोषत्वादतःश्रेष्टो विष्णुलोकःसनातनः ॥ ५५ ॥
विमुक्ताद्विविधाप्रोक्ता पुनरावर्तिवर्जिताः ॥ सात्विकाविष्णुलोकस्छा स्तामसास्तमसिस्छिताः ॥ ५६ ॥ लोकालोकात्परेभागे लो
कोयावद्घनोदकं ॥ तावत्तमोभवेन्नित्यं नतत्स्थानान्निवर्तनं ॥ ५७ ॥ विष्णोर्भक्त्याविष्णुलोक स्तद्द्वेषात्तमसिस्छितिः ॥ नित्यानं

दोविष्णुलोको नित्यदुःखंतमःस्मृतं ॥ ५८ ॥ अतोनित्यसुखप्राप्त्यै नित्यदुःखनिवर्तये ॥ उपास्यःसर्वदाविष्णु र्नद्वेष्यःकर्हिचि-
द्भवेत् ॥ ५९ ॥ तेनेहामुत्रकल्याणं विंदतेनान्यथानरः ॥ गतिद्वयविहीनास्तू राजसासंसृतिस्थिताः ॥ ६० ॥ परिवर्तयतेनित्य
मेवंजीवान्सकेशवः ॥ आद्योमायासमायुक्तः क्षेत्रज्ञःपुरुषोत्तमः ॥ ६१ ॥ सेव्योनित्यंवंदनीयश्चनित्यं श्राव्योनित्यंमाननीयःसए-
व ॥ ध्येयःसाक्षात्कार्यएवैषविष्णु र्नित्यानंदंप्रेप्सुभिर्विश्वमूर्तिः ॥ ६२ ॥ एवंवःकथितंविप्रा यद्यत्पृष्टंचमांप्रति ॥ यच्छ्रुत्वापुरुषा-
र्थेषु श्रोतव्यंनावशिष्यते ॥ ६३ ॥ इति श्रीविष्णुरहस्ये भूगोलगणनं विष्णुधामत्रयनिरूपणंनाम एकोनचत्वारिंशोध्यायः ॥ ३९ ॥

॥ श्रीवेदव्यासायनमः ॥ शांडिल्यउवाच ॥ संभोगाद्भक्षणात्पाना न्मलोत्पत्तिर्हिदृश्यते ॥ सच्चिदानंददेहानां विष्णुलोके
तिनिर्मले ॥ १ ॥ मलोत्पत्तिर्विरुध्येत तत्कथंभोगसंभवः ॥ पुण्यानुष्टानतःकेचि त्सफलाइहजन्मनि ॥ २ ॥ केषांचित्सफलंनैव
धनपुत्रादिकंततः ॥ एवंपापाअपिनराः दृश्यंतेसुखिनोभुवि ॥ ३ ॥ केचिच्चिद्दुःखिनःसूत तत्कथंकर्मणांगतिः ॥ एतन्नोविस्त-
राद्ब्रूहि ज्ञाततत्वोसिबुध्दिमान् ॥ ४ ॥ सूतउवाच ॥ विष्णुलीलारहस्यानि कोवेत्तुमिहशक्नुते ॥ अथापियुष्मत्पृष्टोहं रहस्यानि-
यथामति ॥ ५ ॥ वदामितच्छृणुध्वंमे यथाद्वैपायनाच्छ्रुतं ॥ एकद्वित्रिचतुर्भार्या बहुभार्यास्तथापरे ॥ ६ ॥ सामान्यनारीभोगाश्च

११

संतिजीवाश्चसर्वशः ॥ एकपत्न्यश्चसामान्या नार्योपिद्विविधाःस्मृताः ॥ ७ ॥ नियताएकपत्न्यस्युः सामान्याःस्वैरभर्तृकाः ॥ सा--
मान्याअप्सरोनान्याः काचिदास्वधिकाअपि ॥ ८ ॥ विष्णुभोगाधिकारिण्यो भोग्यादेवोत्तमैरपि ॥ विष्णोरेवाज्ञयान्येषां भोगा--
द्दोषोनहिक्काचित् ॥ ९ ॥ देवगंधर्वविद्याध्रै र्भोग्याश्चापिनृपादिभिः ॥ पृथगप्सरसःकाश्चि द्विष्णुभोगविवर्जिताः ॥ १० ॥ काश्चि--
न्मानुषभोग्यास्तु स्वायोग्येच्छात्रनोभवेत् ॥ योग्येच्छानविहन्येत नित्यानंदस्ततोत्रहि ॥ ११ ॥ कदाचित्सत्वदेहास्ते ज्ञानमात्र
शरीरिणः ॥ मोदंतेकर्हिचित्केचि त्स्त्रीभिर्यानेगृहेवने ॥ १२ ॥ यथास्वरूपव्यक्तिस्या द्धोज्यैक्येपिसुखादिना ॥ रत्यंतउभयेच्छे--
क्या द्रेतोद्रावसुखंतथा ॥ १३ ॥ उत्सर्गानैवजायंते शुक्रमूत्रविडादिनां ॥ भोगाआलौकिकास्तेषां संतिलोकविलक्षणाः ॥ १४ ॥
लोकेपिबर्हिणादीनां भोगालोकविलक्षणाः ॥ विद्धिपक्षोष्मणांक्कापि क्कचिद्दृष्ट्यास्मृतेरपि ॥ १५ ॥ दृश्यंतेत्वंडजादीनां स्तनपा
नंविनापिहि ॥ अपक्षाउत्प्लवंतेपि पादहीनाव्रजंतिच ॥ १६ ॥ स्त्रीपुंसयोर्विनायोग मुत्पद्यंतेपिदेहिनः ॥ पश्यंतिजलयेवान्ये ज-
लेंधाःकेचिदेवच ॥ १७ ॥ तमोंधाःप्राणिनःकेचि दिवांधाःसर्वदांधकाः ॥ इत्यादिचित्रतालोके सृष्टौवृत्ध्यादिकेष्वपि ॥ १८ ॥ दृ-
श्यंतेकिमुवक्तव्यं सर्वलोकविलक्षणे ॥ वैलक्षण्यंहिभोगानां रहस्यमिदमीरितं ॥ १९ ॥ एवमेवहिदुष्टानां स्त्रीणांपुंसांतमस्यपि ॥
जायतेनिछयायोगो रत्यादेर्दुःखहेतुता ॥ २० ॥ प्राणएवहिसर्वेषां मुक्तानामुभयत्रतु ॥ सुखदुःखनियंतास्ति वृतोदूतैरनेकशः ॥

॥ २१ ॥ येनप्राणेनयेमुक्ताः सहजीवाःसहस्रशः ॥ सर्वेतमनुवर्तंते शास्तातेषांसएवहि ॥ २२ ॥ अनादिकालतस्त्वेवं मुक्तामोक्ष्यं-
तिचापरे ॥ तैर्भवेन्नात्रसंबंध स्तथाविरलतापिन ॥ २३ ॥ अतोविलक्षणंप्रोक्त मुक्तधामचतुष्टयं ॥ प्रतिकूलंस्मृतंदुःखं मनुकूलंसु-
खंमतं ॥ २४ ॥ उभयोःकारणंकर्म पापंपुण्यंत्रिधाक्रमात् ॥ दाह्यदाहकभावोस्ति प्राबल्येनतयोर्मिथः ॥ २५ ॥ पुण्येपुंण्यंसहायं-
स्या त्पापेपापंतथैवच ॥ मिथस्तुल्यबलंयत्स्या द्विरोधिप्रतिबंधकं ॥ २६ ॥ देवताराधनंतीर्थ यात्रास्वस्त्ययनादिकं ॥ विप्रशि-
षोपिप्रारब्धं पुण्यानुग्राहकामता ॥ २७ ॥ प्रारब्धपापप्राबल्ये जन्मांतरफलप्रदः ॥ देवब्राह्मणविद्वेषः पापाचाराद्यनेकशः ॥ २८ ॥
एवंन्यायेनविज्ञेयः फलदानान्यथाक्वचित् ॥ क्रियमाणान्महापुण्या त्प्रारब्धंप्रबलंभवेत् ॥ २९ ॥ तथापापक्रियमाणा त्प्रारब्धंप्र-
बलंमतं ॥ संचितंक्रियमाणंच प्रारब्धेनाभिभूयते ॥ ३० ॥ बलवत्क्रियमाणेन संचितान्यपिकानिचित् ॥ नश्यंतिकानिचित्क्षीन
बलानिस्युश्चकानिचित् ॥ ३१ ॥ उपद्रवेणशून्यानि यथादावाग्निनावने ॥ नश्येतपापतःपुण्यं पुंण्येनापिचपातकं ॥ ३२ दुर्बलं-
प्रबलेनैव प्रबलंनाविनश्यति ॥ अतःपुण्यंसदाकार्य सर्वथैवोपकारणं ॥ ३३ ॥ पापंचपरिहार्यस्या त्सर्वथैवापकारकं ॥ कर्मतुल्य
बलंयत्स्या द्विरोधिप्रतिबंधयेत् ॥ ३४ ॥ हनिंहीनबलंकुर्या त्प्रबलंनाशयत्यपि ॥ अथोनव्यर्थतांयाति पुण्यंवापापकर्मवा ॥ ३५ ॥
अधिकारवशात्तत्र फलेवैचित्र्यमश्नुते ॥ स्वाभाविकोदैहिकश्च दैशिकःकालिकस्मृतः ॥ ३६ ॥ अधिकारश्चतुर्थोक्तः फलभेदःप्रवर्त-

78

कः ॥ सात्विकादिस्वरूपत्वं सतुस्वाभाविकःस्मृतः ॥ ३७ ॥ सत्वाधिक्येफलाधिक्यं पुण्यस्यात्पापकेन्यथा ॥ तमोधिक्येफलाधि-
क्यं पापेस्यात्सुकृतेन्यथा ॥ ३८ ॥ राजसेतुसमंपुण्यं पापंचपरिकीर्तितं ॥ आसन्नमोक्षावृत्धास्युः तरुणादूरमोक्षिणः ॥ ३९ ॥
ततोदूराबालकास्यु स्तद्दूराःशिशवःस्मृताः ॥ पुण्यवृत्धिस्तुवृत्धानां सात्विकानांप्रजायते ॥ ४० ॥ पापवृत्धिस्तुवृत्धानां तामसा-
नांप्रजायते ॥ तदन्येषांफलेन्हासो विघ्नश्चापिक्रमाद्भवेत् ॥ ४१ ॥ मोक्षयोग्यानिपुण्यानि तामसानांनिहंतिसः ॥ अतएवाहिबुध्या-
च च्यावंतेधर्मतोसुराः ॥ ४२ ॥ संतोदुर्मार्गगास्तद्व त्कालेकालेचविष्णुना ॥ पुण्यंघातयतेक्कापि केशवोदूरमोक्षिणां ॥ ४३ ॥ व-
र्धयत्यसतांक्कापि पुण्यकर्मापिलीलया ॥ एवंस्वभाववशतः फलेवैचित्र्यमीरितं ॥४४॥ तत्तज्जातिविभेदेन धर्माधर्मविनिर्णयात्॥
अधिकारोदैहिकःस्या त्फलभेदःप्रवर्तकः ॥ ४५ ॥ अतएवहिशूद्रादे वैदिकंकर्मपातकं ॥ सुरापानादिकंतद्व द्विप्रादेर्नेतरत्रतत्
॥ ४६ ॥ शैशवाद्यनुसारेण नियमाश्चयथाश्रमं ॥ फलभेदोपदेशेन सोधिकारोपिदैहिकः ॥ ४७ ॥ यज्ञदानादिकंतस्मा द्यतिनोध-
र्मकृन्नहि ॥ सूतकेमृतकेरोगे दुःस्पर्शैरजसीतरः ॥ ४८ ॥ अधिकारोवैदिकस्या त्पुण्यपापनियामकः ॥ तत्तत्कालविशेषेषु यज्ञदान-
जपादिकं ॥ ४९ ॥ विधीयतेसतुप्रोक्तो धिकारःकालिकोबुधैः ॥ पर्वकालेष्वतःपुण्यं भवेत्कर्मफलाधिकं ॥ ५० ॥ युगकल्पविभेदे-
न धर्माधर्मविनिर्णयात् ॥ सोपिकालिकइत्युक्तः कलिवर्जादिराक्षितः ॥ ५१ ॥ तीर्थक्षेत्रविशेषेषु कर्तव्यमधिगीयते ॥ ततोधिका-

रौ
मोविज्ञेयो देशिकोमुनिभिर्मुने ॥ ५२ ॥ अतएवहितीर्थादौ मुंडनंचोपवासनं ॥ रथ्यादौनिगमाधीतेः पापमेवप्रजायते ॥ ५३ ॥
दिङमात्रदर्शनादस्मा त्सर्वमूह्यंविपश्चिता ॥ उदाहृत्यर्थमेवैत न्मयोक्तंभवतांपुरः ॥ ५४ ॥ तृणवीरुल्लतावृक्ष गुल्मौषध्यादिकं-
यथा ॥ तथैवफलदानादौ कर्मणान्यायइष्यते ॥ ५५ ॥ पापंवन्हिसमंपुण्ये पातकेसुकृतंतथा ॥ अन्योन्यस्याविरुध्येत नैवव्यर्थंभ-
वेत्क्वचित ॥ ५६ ॥ सुश्रीकश्चसुकांतश्च भ्रातरावासुतुःपुरा ॥ सदाचारोभवेज्ज्येष्ठः पापाचारोनुजस्तथा ॥ ५७ ॥ कर्हिचित्पथिग-
च्छंतौ देवालयमपश्यतां ॥ चक्रेप्रदक्षिणंज्येष्ठ स्तत्पादेकंटकोविशत् ॥ ५८ ॥ नास्तिकेनसुकांतस्तु कृत्वावामतआव्रजन् ॥ स-
लेभेमुद्रिकांहैमीं ततोपाहसताग्रजं ॥ ५९ ॥ अग्रजोव्रीडितस्ताव द्वृद्धब्राह्मणआययौ ॥ सउवाचतदातौतु पुरतोवस्थितःक्षणं
॥ ५० ॥ सुकांतमूढपुण्यंत्वं नास्तिक्यादवमन्यसे ॥ कर्मतत्वंनजानासि विचित्राकर्मणांगतिः ॥ ६१ ॥ इत्युक्त्वाद्दष्टिमात्रेण दि-
व्यदृष्टीचकारतौ ॥ देवस्यदक्षिणेवामे दृश्यतामितिचाबदत् ॥ ६२ ॥ निधेर्मुखंचसर्पंच तौतदानीमपश्यतां ॥ दृष्टमित्येवसप्राह
तावोमितितमूचतुः ॥ ६३ ॥ विप्रप्राहततोभूयः संमुखोकृत्यचादरात् ॥ यदीदानींहिसुश्रीको निर्गच्छेद्देववामतः ॥ ६४ ॥ तर्हि-
सर्पेणदष्टव्य स्तस्यकर्मैवतादृशं ॥ तथायदित्वंदेवस्य निर्गच्छेश्चप्रदक्षिणं ॥ ६५ ॥ प्राप्तव्योयंनिधिस्तर्हि त्वयातत्कर्मतादृशं ॥ प्र-
दक्षिणादवज्ञाना दीदृशंभवतोफलं ॥ ६६ ॥ बहुयत्तदभूदल्प मनुग्राहकवर्जनात् ॥ इदानींतन्नतेलभ्यं महासर्पेणरक्षितं ॥ ६७ ॥

१९

क्रा

इत्युक्त्वांतर्दधेविप्रः सुकांतश्रद्दधेततः ॥ वंदित्वातंतथाभ्रातुः सुकृतेर्भक्तिमानभूत् ॥ ६८ ॥ एवंबहुविधंलोके जायमानंनबुध्यते ॥
प्रतिगृहीतापात्रंस्या द्दातुःपापस्यकर्मणः ॥ ६९ ॥ तत्पापस्यापिपात्रंस्यु र्येविप्रानवजानते ॥ संपन्नश्रवणादीनां जपतांनामवैह-
रेः ॥ पापानिनिंदकानास्यु र्ननिंदेत्सज्जनांस्ततः ॥ ७० ॥ संगात्संक्रमतेपुण्यं पापंवाप्यथवांततः ॥ सत्संगमेवकुर्वीत दुःसंगंदू-
रतस्त्यजेत् ॥ ७१ ॥ साक्षात्कारेपियोविष्णोः कर्मक्षयउदाहृतः ॥ तत्रापिपापभागस्या न्निंदकानांनसंशयः ॥ ७२ ॥ तन्मित्रा-
णांपुण्यभाग इत्येवहिविनिर्णयः ॥ अपरोक्षदृशःकर्म क्रियमाणंनालिप्यते ॥ ७३ ॥ इतियत्प्रोच्यतेविप्र ज्ञेयंतदपिनोवृथा ॥ त-
द्बंधकंभवेन्नैव नलेपस्ततउच्यते ॥ ७४ ॥ मुख्यतस्तुफलंतस्य मुक्तावेवभविष्यति ॥ सत्कर्मणासुखोच्छ्रायः पापेनचसुखोनता
॥ ७५ ॥ तामसानांतुजीवानां सर्वमेतद्विपर्ययात् ॥ योजनीयमनेनैव न्यायेनसुधियाखिलं ॥ ७६ ॥ संपदोविपदश्चैव पर्यायेण-
भवंतिहि ॥ यथातथैवकर्मापि द्विविधंपरिवर्तते ॥ ७७ ॥ सतांद्रोहादवज्ञाना त्तत्पापंद्रोहिषुव्रजेत् ॥ तेषांसंगेनभक्त्याच तत्पु-
ण्यंसंगिषुव्रजेत् ॥ ७८ ॥ एवमेवहिदुष्टानां द्वेषात्तत्पुण्यभाग्भवेत् ॥ भक्त्यासंगेनतत्पाप भागीस्यान्नात्रसंशयः ॥ ७९ ॥ ज्ञानस्य-
फलमेताव द्योविवेकःसतोसतः ॥ परिग्रहःसतांश्रेया नसतांचविवर्जनं ॥ ८० ॥ दुर्निवारोसतांसंगो यदिस्यात्तर्हिचेतसा ॥ उ-
द्विजेत्संगतस्तेषां मनसासंस्मरेत्सतः ॥ ८१ ॥ मुख्यंहिपरमंसत्वं भक्तिर्विष्णोस्ततःपरं ॥ तद्भक्तभक्तिस्तस्याश्च सदागमरतिःपरा

विप्रान् अव जानते

॥ ८२ ॥ असत्वंचपरंतद्व द्विष्णुद्वेषपराततः ॥ तद्वेषिभक्तिस्तस्याश्च दुरागमरतिःपरा ॥ ८३ ॥ सर्वथैवततोविप्राः सतांसंगोखि-
लाद्वरः ॥ साधनीयःप्रयत्नेन तत्थीनानैवमोक्षिणः ॥ ८४ ॥ सल्लापःस्पर्शनंमौनं भोजनंचसहासनं ॥ प्रीत्यासंचिंतनंचैव षोढाः-
संगतिरुच्यते ॥ ८५ ॥ कर्मचापिवृथानैव ततःपुण्यंसमाचरेत् ॥ पापंपरिहरेच्छक्त्या ज्ञातपापापनुत्तये ॥ ८६ ॥ जपदानादि-
भिर्यत्नं सदाविद्वान्समाचरेत् ॥ धनमिष्टंहिसर्वेषां मूलंसर्वसुखस्यच ॥ ८७ ॥ प्रायेणधनसंप्राप्तिः विनापापंनजायते ॥ दुर्नि-
वारमतःपापं तस्मात्तदपनुत्तये ॥ ८८ ॥ यत्नेत्तद्बुद्धिमान्नित्यं शक्त्यादानजपादिभिः ॥ धनव्ययाद्देहतापा न्मनसोयंतृणाद्दते
॥ ८९ ॥ पुण्यंनजायतेयस्मा त्तस्मात्तद्दुष्करंनरैः ॥ अतोयत्नेननतत्साध्यं सुखबीजंयतोहितत् ॥ ९० ॥ प्रायेणमूढालोकेस्मि
न्नविद्यग्रंथितचेतसः ॥ पुण्यस्यफलमिछंति पापंकुर्वंतियत्नतः ॥ ९१ ॥ उप्तमन्यफलंचान्यं मूढादन्यःकइछति ॥ मूढप्रायमि-
दंविश्वं पश्यंश्चापिनपश्यति ॥ ९२ ॥ विष्णुमायाबलंचैत दन्यथासंसृतिर्नहि ॥ अनादिकर्मभिर्बद्धा नेवंजीवाननंतशः ॥ ९३ ॥
निवर्तयतिसंसारे सर्वदैवप्रभुर्हरिः ॥ तमेवशरणंगच्छे त्सर्वेभ्योमुक्तमानसः ॥ ९४ ॥ सएवकृपयाबंधा न्मोचयेदन्यथानहि ॥ ना-
स्त्यन्योमोचकस्तस्मा त्ततःसेव्यःसएवहि ॥ ९५ ॥ मनसाकर्मणावाचा तुच्छमन्यत्ततोखिलं ॥ असत्संसर्गसंयुक्तो दुष्टदेशगतो-
पिसन् ॥ ९६ ॥ भक्त्यासंकीर्तयन्विष्णुं नदोषःपरिभूयते ॥ देवताऋषिनामानि नाशुचिःपरिकीर्तयेत् ॥ ९७ ॥ विष्णोर्दिव्यानि-

नामानि सर्वदापरिकीर्तयेत् ॥ पश्यन्शृण्वन्स्पृशन्जिघ्र न्नश्नन्गच्छन्स्वपन्श्वसन् ॥ ९९ ॥ प्रलपन्विसृजन्गृण्हन् नुन्मिषन्निमिषन्न-
पि ॥ संस्मरेद्विष्णुमव्यग्र स्तल्लीलाश्चापिचिंतयेत् ॥ यतोयतोमनोयाति स्वभावादेवचंचलं ॥ १०० ॥ तत्रतत्रैवविषये विष्णु-
मेवविभावयेत् ॥ क्रियद्भवेन्मनोन्म्रुणां हरिंपूर्णकथंत्यजेत् ॥ १०१ ॥ मंदभाग्यास्तुतंत्यक्त्वा विषयांश्चिंतयंतिहि ॥ कालेकालेजा-
यमानं सुखंविष्णोःसमर्पयेत् ॥ १०२ ॥ दुःखेतुयःस्मरेद्विष्णुं सदुःखैर्नाभिभूयते ॥ यावत्पापंकरोत्येष तावद्दुःखंददातिन ॥
१०३ ॥ दयालुत्वात्धरिस्तंतु मूढत्वाद्बहुमन्यते ॥ कुर्वाणःपापकर्माणि लंघयंस्तस्यभाषितं ॥ १०४ ॥ अलंनमन्यतेमूढो दुः
खेस्वल्पेप्यलंवदः ॥ एवंपुण्यंस्वल्पमपि मन्यतेबहुमूढधीः ॥ १०५ ॥ नालंबुध्दिःसुखप्राप्तौ विस्मरत्यपिकेशवं ॥ अतोविद्वा-
न्सावधानः संपदश्चंचलाइति ॥ १०६ ॥ मन्वानःसततंविष्णो रर्चेन्मूर्तीश्चलाचलाः ॥ बाह्यांतरविभेदेन संपदोद्विविधामताः
॥ १०७ ॥ धनभूगजवाज्यादि भार्यासंपदितीर्यते ॥ ज्ञानंभक्तिश्चवैराग्यं यमाश्चनियमाअपि ॥ १०८ ॥ आंतरीसंपदित्युक्ता द्वा-
भ्यामभ्यर्चयेध्दरिं ॥ शक्तिशाठ्यंप्रकुर्वाणो मंदस्यान्मंदभाग्यभाक् ॥ १०९ ॥ यथाशक्तिप्रकुर्वाणः पूर्णफलमवाप्नुयात् ॥ श-
क्तितोप्यधिकंकर्ता पूर्णात्पूर्णतरंलभेत् ॥ ११० ॥ रहस्यमेतदाख्यातं विष्णोरद्भुतकर्मणः ॥ श्रवणान्मननादस्य प्रसादंप्राप्नुया-
द्धरेः ॥ १११ ॥ इति श्रीविष्णुरहस्ये शांडिल्यप्रश्नोत्तरंनाम चत्वारिंशोध्यायः ॥ ४० ॥ ॥ छ ॥ ॥ छ ॥

कौंडिन्य

वि० र०
८१

॥ श्रीवेदव्यासायनमः ॥ कौडुण्यउवाच ॥ सत्ववर्णःशुक्लएव तमसःकृष्णएवच ॥ तथासतिकथंमुक्तौ नानावर्णानिभुंजते ॥ १ ॥ माणिक्यनीलवैडूर्य गारुडाद्यैरलंकृतीः ॥ खचितास्युःकथंसूत नानाकुट्टिमभूमयः ॥ २ ॥ रत्नसोपानकावाप्य श्चित्रवर्णाश्चशाखिनः ॥ नानापुष्पफलाश्चैव नानावर्णविलेपनं ॥ ३ ॥ नानाविधानिवासांसि कथंस्युस्तत्रतद्वद ॥ नैकवर्णानिवस्तूनि शोभायैप्रभवंतिवै ॥ ४ ॥ सर्वेषामपितोषाय नैकवर्णप्रशस्यते ॥ इतिनोवदविद्वंस्त्वं यथाद्वैपायनाच्छ्रुतं ॥ ५ ॥ सूतउवाच ॥ स्वरूपेणैवयेजीवाः शाखिनःपशवोमृगाः ॥ नानारूपाःशुक्लवर्णाः सत्वरूपायतोखिलाः ॥ ६ ॥ यथायथैववांच्छंति मुक्तावस्तूनियानितु ॥ तथातथैवजायंते नानारूपाण्यनेकशः ॥ ७ ॥ इच्छांतेप्रकृतिंयांति हरेरिच्छातथैवहि ॥ केचित्ध्यानपराःप्रायः केचिद्यज्ञान्वितन्वते ॥८॥ सत्कथाकथकाश्चान्ये परिचर्यापराःपरे ॥ विपण्यापणरथ्यासु व्यवहाररताःपरे ॥ ९ ॥ उद्यानवनवाप्यादौ क्रीडासक्ताःपरेजनाः ॥ स्वैराचाराःस्वैरभोगाः नित्यानंदाहरीच्छया ॥ १० ॥ मोदंतेसर्वदाजीवाः दोषलेशाविवर्जिताः ॥ स्वेच्छयापरिमाणानि यथाकारमनेकधा ॥ ११ ॥ तेषांदेहेषुजायंते नेच्छाभंगःकदाचन ॥ सृष्टयादिलीलाःपश्यंतो विष्णोरद्भुतकर्मणः ॥१२॥ कालेकालेजायमाना मोदंतेविस्मितामुहुः ॥ विचार्यमाणेकिंकिंन विचित्रंहरिनिर्मितं ॥ १३ ॥ मूढस्तत्वंनजानाति स्वभावइतिमन्यते ॥ एकंपत्रंफलंपुष्पं यत्किंचिद्वस्तुयादृशं ॥ १४ ॥ भगवन्निर्मितंतादृक् कःपुमान्कर्तुमर्हति ॥ कथंसृजतिवस्तूनि कथंवावर्धयत्यपि ॥ १५ ॥

४१

कथंसंहरतेचायं नियच्छतिकथंत्विति ॥ कथंज्ञापयतेलोकान् कथंवामोहयत्यपि ॥ १६ ॥ कथंबध्नातिसंसारे कथंमोचयतेपिच ॥
सदासर्वत्रचेष्टासु स्वयंकर्तापिनेक्ष्यते ॥ १७ ॥ इत्यादीनिचरित्राणि विचित्राणिसदाहरेः ॥ विचिन्वंतोनजानंति साकल्येनरमा-
दयः ॥ १८ ॥ यथामतियथाशक्ति सदासर्वैश्चसोहरिः ॥ उपास्योवेदनीयश्च ततोयातिकृतार्थतां ॥ १९ ॥ यथाखगाःस्वशक्त्यैव
नभोलंघनतोखिलाः ॥ लभंतेस्वगतिंतद्व द्विद्वांसोविष्णुमार्गणात् ॥ २० ॥ नह्यश्चताहृशःकश्चि त्पारवेत्ताखिलेशितुः ॥ कथंस्या-
त्ताहृशस्तर्हि दूरापास्तस्ततोधिकः ॥ २१ ॥ इति श्रीविष्णुरहस्ये भगवन्महिमावर्णनंनाम एकचत्वारिंशोध्यायः ॥ ४१ ॥

॥ श्रीवेदव्यासायनमः ॥ अर्ष्टिषेणउवाच ॥ सृष्टिस्थित्यंतकर्माणि ब्रह्माविष्णुमहेश्वराः ॥ कुर्वंतिसकलस्येति श्रूयतेमुखतःसतां-
॥ १ ॥ अपरेवासुदेवादि मूर्तिभ्यइतिमन्वते ॥ कथंतर्हिहरेरेवं सृष्ट्यादिकामितीर्यते ॥ २ ॥ सर्वैष्वपिप्रमाणेषु ऋगाद्याश्रुतयोव-
राः ॥ प्रायेणश्रूयतेतत्र महेंद्रोग्निश्चमारुतः ॥ ३ ॥ सवितावरुणोमन्यु विष्णूरुद्रोबृहस्पतिः ॥ ब्रह्मायमकुबेराद्या नानादेवाश्चकुत्र-
चित् ॥ ४ ॥ ॐकारसदसद्ब्रह्म प्राणोन्नंज्योतिरप्तपः ॥ प्रकृतिःपुरुषश्चेति बहुधायत्रकुत्रचित् ॥ ५ ॥ सांख्याःपाशुपताश्चान्ये
योगाचार्यास्तथापरे ॥ केचित्किंचिदितिश्रुत्वा मुग्धतांभजतेमतिः ॥ ६ ॥ वैदकंतत्रनस्तत्वं यत्स्याद्भगवतोमतं ॥ निश्चित्यतत्वं-

यच्छ्रुत्वा नरास्युर्मोक्षभागिनः ॥ ७ ॥ सूतउवाच ॥ एवमेवपुराब्रह्मा संपृष्टोनारदादिभिः ॥ वक्तुंतदुत्तरंविष्णुं सोस्मरत्सतदैवहि
॥ ८ ॥ प्रादुर्भूत्वावदत्तेभ्यः पंचरात्रंसदागमं ॥ यथामुग्धमनाःपार्थो बोधितःकृष्णरूपिणा ॥ ९ ॥ स्थानेस्थानेतथातत्वं यदवोच-
त्पर्रिःस्वयं ॥ सर्वंतदनुसंधाय व्यासःसूत्राणिनिर्ममे ॥ १० ॥ वेदांतमखिलंयत्स्या ज्जनैर्ज्ञातंबुधैःस्फुटं ॥ तदर्थनिर्णयात्प्राह य-
न्मांविश्वस्तचेतसां ॥ ११ ॥ वदामितमहंसर्वं युष्माकंपृच्छतांपुरः ॥ जगत्सर्वंचयत्किंचि दृश्यतेश्रूयतेथवा ॥ १२ ॥ बहिरंतश्च-
तत्सर्वं व्याप्यनारायणस्थितः ॥ सृष्टिस्थित्यंतानियति ज्ञानबंधास्तथावृतिः ॥ १३ ॥ मोक्षश्चेत्यखिलस्यास्य तस्मादेवहिमुख्य-
तः ॥ सएवसृष्ट्वाब्रह्मादीन् देवगंधर्वमानुषान् ॥१४॥ चेतनाचेतनान्सर्वा स्तत्प्रविष्टोवबुध्यते ॥ जडेषुचेतनाविष्टा जडाभेदंचम-
न्वते ॥ १५ ॥ सर्वदैवपराधीनाः स्वातंत्र्यंचापिमन्वते ॥ पश्यंतोपिनपश्यंति नबुध्यंतेपिबोधिताः ॥ १६ ॥ अस्वेस्वबुत्धयश्चापि
नश्वरेनित्यबुत्धयः ॥ असारंमन्वतेसारं सारंचापिविपर्ययात् ॥ १७ ॥ तादृक्स्वमाययाबत्धा न्संसारयतिसर्वशः ॥ अहोमाया-
बलंविष्णो दुर्बोधंयोगिनामपि ॥ १८ ॥ तमेवयेप्रपद्यंते मायामेतांतरंतिते ॥ सब्रह्मापूर्वजत्वेन सब्रह्मागुणपूर्तितः ॥ १९ ॥ प्र-
लयोदकशायित्वा त्सतुनारायणःस्मृतः ॥ विष्णुर्व्यापकमूर्तित्वा त्सर्वेशत्वान्महेश्वरः ॥ २० ॥ वासनाद्वसतेश्चापि वासुदेवःसए-
वहि ॥ सर्वेषांकर्षणात्सोपि संकर्षणउदाहृतः ॥ २१ ॥ प्रकृष्टद्योतनत्वेन प्रद्युम्नइतिकीर्तितः ॥ अनिरुत्धःसर्वगत्वा दिंद्रःपूर्णैश्व-

रत्वतः ॥ २२ ॥ महेंद्रःसर्वतःश्रैष्ठ्या दग्निःसर्वस्यचेष्टनात् ॥ स्तुतत्वान्मारुतोलक्ष्म्या सवितासर्वसूतितः ॥ २३ ॥ सर्वत्रगमना-
त्ज्ञाना द्वायुःसर्वस्यशोषणात् ॥ सूरिभिर्ज्ञेयमूर्तित्वा न्मन्युर्ज्ञानादिपूर्तितः ॥ २४ ॥ विशिष्टप्राणसौख्यत्वा दपिविष्णुःसएवहि॥
रुजांद्रावणतोरुद्रो दुष्टशोकप्रदोहिसः ॥ २५ ॥ बृहस्पतिःसएवोक्ता बृहतामपियःपतिः ॥ यमःसंयमनात्ज्ञानी मेयत्वाद्यनुमान-
तः ॥ २६ ॥ कुमतेरीरणात्सर्व संवृतेःसकुबेरकः ॥ दुर्ज्ञेयत्वान्निरऋतिः सवन्हिःसर्ववत्वतः ॥ २७ ॥ अकारःसर्ववागात्मा सोंका-
रःसर्ववाग्यतः सर्वोत्कृष्टेरुकारःस मकारःसर्वमाननात् ॥ २८ ॥ ॐकारःसत्रिरूपत्वात् अवर्नादोंचपूर्तितः ॥ सदासर्वत्रसत्वेन स-
द्रूपःसर्वदीपनात् ॥ २९ ॥ सर्वेषांग्रहणात्ज्ञाना त्सर्ववेदस्तुतेरपि ॥ अद्भुतानंदनात्क्षेपा दसादित्युच्यतेहरिः ॥ ३० ॥ सतांहितक-
रत्वेन निर्दोषज्ञानसौख्यतः ॥ अद्यतेतिचभूतानि तस्मादन्नंतदुच्यते ॥ ३१ ॥ सत्यंप्राणःसर्वचेष्टा तेनानंतेयतःसहि ॥ सर्वेषां-
दीपनाज्ज्योतिर् रापत्सर्वविलक्षणः ॥ ३२ ॥ सर्वदृश्यत्वतस्सर्वः द्रष्टृत्वात्तपनात्तपाः ॥ प्रकृष्टकर्ताप्रकृतिः पुरुषःपूर्णषड्गुणः॥ ३३॥
प्रधानंमुख्यकर्तृत्वा त्पातापशुपतिःसतां ॥ हिरण्यगर्भोब्रह्मांड गर्भत्वादपिसस्मृतः ॥ ३४ ॥ आकाशोदीप्यमानत्वा दापःसर्वत्र-
पूर्तितः ॥ सर्वोत्पादकरूपत्वा द्भूर्भूमिश्रेष्ठनाद्घटः ॥ ३५ ॥ आच्छादनाद्वस्त्रनामा वृश्चनाद्वृक्षइत्यपि ॥ पत्रंसर्वगतत्वेन पर्णःपा-
लनरूपणात् ॥ ३६ ॥ विकासात्पोषणात्पुष्पं शोभनेंद्रियतःसुखं ॥ सर्वस्वामित्वतोदुःखी दुःखंदुष्टविनाशनात् ॥ ३७॥ बंधक-

त्वात्सबंधेपि जीवःप्राणनतःस्मृतः ॥ प्राणादीनांस्वरूपाणां हितकृच्छून्यनामकः ॥ ३८ ॥ बुध्यौबोधस्वरूपत्वा ज्जयात्संहरणा--
ज्जिनः ॥ पाचकःपाटकोयद्व त्क्रियाभेदात्पुमान्भवेत् ॥ ३९ ॥ तथासृष्ट्यादियोगात्स एकोब्रह्मादिनामकः ॥ एवंयावंतिनामानि
त्क्रियाशब्दाश्चसर्वशः ॥ ४० ॥ मुख्यस्वार्थाहरेरेव नामानीत्यवदच्छ्रुतिः ॥ सत्सृष्ट्वातत्प्रवेशेन तन्नामासर्वलिंगवान् ॥ ४१ ॥
यएवैकोखिलश्रेष्ठः सविष्णुःसर्वनामकः ॥ अनादिकर्मणाबद्धान् जीवान्सर्वाश्चसर्वदा ॥ ४२ ॥ नियच्छतीतिसर्वेषां मागमानां--
विनिर्णयः ॥ अतोनबुद्धिभेदोस्ति सर्वेषामपिवादिनां ॥ ४३ ॥ व्यामोहात्कलहायंते विमूढास्तत्ववर्त्मनि ॥ लौकिकावैदिकाश-
ब्दाः प्रत्येकमपिसर्वशः ॥ ४४ ॥ बहुधार्थाभिधातारो मुख्यतःपरमेश्वरे ॥ केचिदर्थाश्चकेषांचि त्प्रवृत्त्यर्थप्रदर्शिताः ॥ ४५ ॥ मु-
मुक्षुर्भावयेद्विष्णुं सदासर्वत्रवस्तुषु ॥ तत्तच्छब्दार्थगुणिनं स्वतंत्रंचनियामकं ॥ ४६ ॥ पराभूयेतनक्वापि सुदुःखैर्बहुलैरपि ॥ एवं-
सध्यानयोगेन बहिरंतश्चसर्वदा ॥ ४७ ॥ मुक्तेःकरगतत्वेन मुक्तएवहिसस्मृतः ॥ महिमानंभगवतो यएनंप्रयतोनरः ॥ ४८ ॥ शृ-
णुतेपठतेनित्यं कर्मबंधात्समुच्यते ॥ मुमुक्षोरेतदेवालं किमन्यैःशास्त्रसंग्रहैः ॥ नालमेतद्भवेद्यस्य तस्यसर्वागमैश्चकिं ॥ ५० ॥ इ-
ति श्रीविष्णुरहस्ये भगवन्नामनिर्वचनंनाम द्विचत्वारिंशोध्यायः ॥ ४२ ॥ ॥ छ ॥ ॥ छ ॥

83

॥ श्रीवेदव्यासायनमः ॥ संवर्तउवाच ॥ अल्पेनैवनिमित्तेन महत्फलविपर्ययः ॥ सुश्रीकस्यसुकांतस्य श्रद्धेयंतत्कथंहिनः ॥ १ ॥
येनिर्धनाःस्वयंविप्रा स्तेषांतोषात्कथंनृणां ॥ संपदोविपदोरोषा त्संभवेत्तत्कथंवद ॥ २ ॥ सूतउवाच ॥ पक्वंफलंयथावृक्षा द्दाता--
दिसहकारिणा ॥ कुत्रचिद्विविधापेक्षा दृष्टस्येवहिकुत्रचित् ॥ ३ ॥ अदृष्टस्यैवकुत्रापि गुरुवाल्पमपेक्षणं ॥ द्विविधंसहकारित्वं पुत्रे-
ष्टयादावपेक्ष्यते ॥ ४ ॥ भोजनादौतुदृष्टस्य कारीर्यादावदृष्टतः ॥ काहानिपरमालोके नराणांमरणादृते ॥ ५ ॥ जायतेमरणंतादृक्
स्वल्पायासाद्विषाशनात् ॥ सुदेवोदेवकश्चेति पांथौमार्गेस्मगच्छतः ॥ ६ ॥ पुरतोव्रजतःपेशि गलिताकस्यचित्पथि ॥ रत्नपूर्णातु--
सापेशी दूरएवास्तितावता ॥७॥ सुदेवस्याभवद्बुद्धिरंधानुकरणेगतौ ॥ ततोनेत्रेनिमील्यैव सुदेवस्वयमेवहि ॥ ८ ॥ अंधवत्पथि-
वव्राज नापश्यद्रत्नपेशिकां ॥ पेशिमुल्लंघ्यगत्वैव नेत्रोन्मेषणमाचरत् ॥ ९ ॥ आगच्छन्देवकःपश्चा द्रत्नपेशीमवैक्षत ॥ गृहीत्वा--
मोदमापन्न स्तदद्भुतमिवाभवत् ॥ १० ॥ नेत्रयोर्मीलनादल्पा त्सुदेवोवंचितोधनात् ॥ गच्छन्मार्गेदृष्टिमात्रा द्देवकोधनभागभूत्
॥ ११ ॥ अतोल्पंगुरुवाकिंचि ददृष्टंदृष्टमेववा ॥ प्रारब्धफलभोगार्थं सहकारिण्यपेक्षते ॥ १२ ॥ सुश्रीकस्यसुकांतस्य नातःफल--
विपर्ययः ॥ आश्चर्यमितिविज्ञेयो यत्कर्मगतिरीदृशी ॥ १३ ॥ ब्राह्मणस्यहिदेहोयं क्षुद्रकामायनेष्यते ॥ कृच्छ्रायतपसेचेह प्रेत्यानं-
तसुखस्यच ॥ १४ ॥ अतएवर्षयःप्रायो नापेक्षंतेत्रसंपदः ॥ शक्ताअनुग्रहेशापे तपसाग्न्यर्कसंनिभाः ॥ १५ ॥ कालेनमंदतपसो-

येविप्रालोलुपाभुवि ॥ तेपिमान्याभवंत्येव सफलाश्चतदाशिषः ॥ १६ ॥ किंतुमंदफलत्वेन विलंबेनफलप्रदाः ॥ एवमेवहिकालेन-
तद्वेषात्फलमाप्यते ॥ १७॥ संसारेभ्रमतोजंतो र्महापातकयोगतः ॥ स्थावरेवृक्षगुल्मादौ कर्मशेषाद्भवेज्जनिः ॥ १८ ॥ शीतवा-
तातपक्लेशान् छेदभेदादिकानपि ॥ तत्रपापफलंभुत्का पश्वादिषुचसंभवेत् ॥ १९ ॥ तत्रापिविविधान्क्लेशान् भुक्त्वामानुषयोनिषु
॥ दारिद्र्याद्व्याधिपीडाभि र्मुक्तोभुविसजायते ॥ २० ॥ अश्वत्थस्तुलसीविप्रा स्त्रिविधाहरिमूर्तयः ॥ तत्राश्वत्थतुलस्यौच स्थाव
रत्वेनदुःखिते ॥ २१ ॥ तथापिभजतांन्नृणां सिद्धिदस्तत्रकेशवः ॥ एवमेवहिविप्राश्च निबद्धास्वेनकर्मणा ॥ २२ ॥ दुखिनःसु-
खिनोवापि पूज्याविष्णुधियाखिलैः ॥ कुष्टिनंपतिमाराध्य स्वर्गतिंगात्पतिव्रता ॥ २३ ॥ संपूज्यपितरौवृत्धौ व्याधोलेभेपरांगतिं॥
अतःपूज्यस्थितोविष्णु स्तत्तत्पूजानुसारतः ॥ २४ ॥ पूजकेभ्यःफलंदत्ते यथाविप्रादिषुस्थितः ॥ अतएवैकलव्योपि संपूज्यपरमा
दरात् ॥ २५ ॥ मृत्तिकानिर्मितंद्रोणं परांसिध्धिमवाप्तवान् ॥ वेत्तिशक्तिमशक्तिंवा भक्तिशाठ्यमथापिवा ॥ २६ ॥ साक्षीसर्वगतो-
विष्णु सदोक्तफलदायकः ॥ सत्यामपिचयःशक्तौ स्वदैन्यंयःप्रकाशते ॥ २७ ॥ हरेःकृतघ्नःपापिष्टो दरिद्रःसप्तजन्मसु ॥ अशक्तःश-
क्तवत्कुर्वन् शक्तस्यात्सप्तजन्मसु ॥ २८ ॥ धैर्येणतस्यतुष्यंति देवाविष्णुपुरःसराः ॥ तथास्त्वितिहिभाषंते समस्तास्तत्वदेवताः
॥ २९ ॥ प्रतिकूलंचदैन्यंच नातोब्रूयात्स्वयंसुधीः ॥ शुभंवदेच्छुभंध्याये द्विपत्तावपिधीरधीः ॥ ३० ॥ अधीरस्यशुभंनस्या दिहलो-

सिद्धिदः

पूजकेभ्यः

केपरत्रच ॥ निष्कामोवासकामोवा पुण्यंयःकृतवान्पुरा ॥ ३१ ॥ इदानींससुखंभुङ्क्ते पापमप्याचरन्नरः ॥ पापिष्ठाअपियेलोके
दृश्यंतेसुखभागिनः ॥ ३२ ॥ स्त्रीपुत्रधनवंतश्च तैःपुण्यंहिपुराकृतं ॥ एवमेवहिलोकेस्मि न्पुण्याचाराअपिस्फुटं ॥ ३३ ॥ पूर्वपाप-
फलात्केचि दृश्यंतेदुःखभागिनः ॥ वृक्षादितुल्यधर्माणि विंद्यात्कर्माणिसर्वशः ॥ ३४ ॥ अतःसद्यःफलंनैषां किंतुकालेनलभ्यते ॥
तृणशाकौषधीगुल्म वृक्षादिभ्यःफलाप्तयः ॥ ३५ ॥ चिराच्चिरतरात्काला च्चिरंचिरतमाद्यथा ॥ तथाकर्मविशेषाणां पाककालेविलं-
बता ॥ ३६ ॥ गृहदाहेसमुत्पन्ने कूपस्यखननंयथा ॥ सद्योनैवोपकुर्वीत तथाकर्मफलंस्मृतं ॥ ३७ ॥ पूर्वमुप्तंयथेदानीं भुज्यतेमा-
नवैरिह ॥ तथेदानींयदुप्तंस्या त्तदग्रेफलदंभवेत् ॥ ३८ ॥ अतोनैवोद्विजेत्पुण्या दृष्ट्वापापान्सुखान्वितान् ॥ दुःखितांश्चसदाचारा-
न् रहस्यंकर्मणांस्मरन् ॥ ३९ ॥ तथेशःकुरुतेमूर्खा न्पापिनोपिमहाधनान् ॥ यथासहस्रशःप्राज्ञा दृष्ट्वातान्स्युःसुविस्मयाः ॥४०॥
नहिपापाःसर्वथैव सर्वेपिसुखभागिनः ॥ पुण्यात्मानश्चसर्वेपि दुःखभाजोनसर्वथा ॥ ४१ ॥ नहिकश्चित्सुखंलोके सर्वैरर्थैश्चसर्वदा ॥
तथानदुःखिनोलोके सर्वैरर्थैश्चसर्वदा ॥ ४२ ॥ कश्चित्धनीपुत्रहीन स्त्रीहीनोरोगितोपिवा ॥ षंढःकुष्टीनेत्रहीनो नानोपद्रवसंयुतः
॥ ४३ ॥ अधनामंदभाग्याश्च केचित्किंचित्सुखान्विताः ॥ अतोमिश्रंफलंलोके यावन्मुक्तिरवाप्यते ॥ ४४ ॥ शरीरंपुण्यपापाभ्यां
मृज्जलाभ्यांयथाघटः ॥ पुण्यवान्पापवान्वापि भूयस्त्वाव्द्यपदिश्यते ॥ ४५ ॥ अतःसर्वाणिकर्माणि पापानिसुकृतान्यपि ॥ नव-

थेतिविदित्वैव हितंस्वस्यसदाचरेत् ॥ ४६ ॥ यत्नेनसाधयेत्पुण्यं पापंयत्नेनवर्जयेत् ॥ तथापिचेद्भवेत्पापं निवृत्तिंतस्यचिंतयेत् ॥
॥ ४७ ॥ तत्रोदासीनतांयांतु नियमार्तत्फलंभवेत् ॥ स्वधर्मनियतिन्रूणां विप्रादेर्वाग्नितोषणं ॥ ४८ ॥ पापघ्नंपुण्यदंवापि त-
स्मात्तत्सर्वदाचरेत् ॥ सूर्योग्निर्ब्राह्मणागावो वैष्णवाःखंमरुज्जलं ॥ ४९ ॥ भूरात्मासर्वभूतानि पूज्यस्थानानिवैहरेः ॥ मंत्रैराराध-
येत्सूर्ये हविराग्नौचतर्पयेत् ॥ ५० ॥ भक्त्यादरेणदानेन तोषयेद्ब्राह्मणेयुतं ॥ गोषुचेद्योग्यभक्ष्याद्यैः सत्कारैर्वैष्णवंनरं ॥ ५१॥ ध्या-
नेनत्वद्दयाकाशे मुख्यप्राणधियानिले ॥ जलमूर्तिर्जलेपूज्यो जलाद्यैरुपचारकैः ॥ ५२ ॥ स्थंडिलेप्रतिमायांच नामद्रव्यैस्तमर्चये-
त् ॥ आत्मानमर्चयेद्भोगैः सर्वदैवत्हृदिस्थितं ॥ ५३ ॥ सर्वाकारंसर्वरूपं सर्वनामानमीश्वरं ॥ अर्चेत्सर्वनियंतृत्व भावनात्सर्वव-
स्तुषु ॥ ५४ ॥ सर्वैष्वशक्तःकुर्वीत शक्त्याब्राह्मणतोषणं ॥ वृक्षादीनितृणांतानि स्थावराणितथैवहि ॥ ५५ ॥ विचित्रफलभोग्या-
नि तद्वत्कर्मविचित्रता ॥ यैर्यथाचरितंकर्म तेतथाफलभागिनः ॥ ५६ ॥ अतएवहिलोकेस्मिन् जन्मारभ्यैवदुःखिनः ॥ तथैवसु-
खिनःकेचि त्पुत्रिणोधनिनस्तथा ॥ ५७ ॥ यत्नंविनैवजायंते पूर्वकर्मवशादिह ॥ नहिस्वेनैवयत्नेन राजपुत्रोभवत्ययं ॥ ५८ ॥ य-
तःसंजातमात्रेण राज्यभागेवजायते ॥ एवंनिदर्शनान्यत्र नानादृष्ट्वासुधीःस्वयं ॥५९॥ नवंध्यंदिवसंकुर्या च्छक्तःपुण्यविवर्जनात्॥
नकुर्याद्बहुलांचिंतां चित्तनाशकरींनरः ॥ ६० ॥ प्रायःपुण्यार्जनेचिंतां कुर्वाणःसंस्मरेद्धरिं ॥ पुण्यात्पुण्यतमंलोके स्मरणंपरमा-

तमनः ॥ ६१ ॥ पापात्पापतमाप्रोक्ता ह्रुषीकेशस्यविस्मृतिः ॥ गायंतिमुनयःसर्वे गाथांलोकोपदेशिकाः ॥ याःस्मरन्सर्वदाजंतु र्न-
दुःखैःपरिभूयते ॥ ६२ ॥ प्राप्तव्यमर्थंलभतेमनुष्यो देवोपितंलंघयितुंनशक्तः ॥ तस्मान्नशोचामिनविस्मयोमे यदस्मदीयंनहित-
त्परेषां ॥ ६३ ॥ नाभुक्तंक्षीयतेकर्म कल्पकोटिशतैरपि ॥ अवश्यमेवभोक्तव्यं कृतंकर्मशुभाशुभं ॥ ६४ ॥ जन्मांतरहितंतात सर्व-
दैवविचिंतयेत् ॥ इहजन्मनियद्भावं तद्भवेत्पूर्वकर्मणा ॥ ६५ ॥ मालाकारसधर्मास्या न्नस्यादंगारकृत्समः ॥ पश्चात्तपेद्यथाना--
त्मा तथास्वहितमाचरेत् ॥ ६६ ॥ मालाकारोयथापूर्व मुप्तानांप्राप्नुयात्फलं ॥ वपत्यन्यानिबीजानि भविष्यद्भोगहेतवे ॥ ६७ ॥
तथाकर्माणिभुंजानो न्यानिपुण्यानिवर्धयेत् ॥ नावसीदतिसप्राज्ञः प्राप्नुवन्सर्वदासुखं ॥ ६८ ॥ अंगारकारकोवृक्षान् छित्वादह-
तियद्वनं ॥ तद्वनस्थःपुनःकिंतु जीवनार्थमवाप्नुयात् ॥ ६९ ॥ अन्यदीयानिकर्माणि नह्ययंप्राप्तुमर्हति ॥ अंगारकारवद्यान भवे-
र्ज्जीवनवृत्तिकृत् ॥ ७० ॥ एकस्तुम्रियतेजंतु रेकएवप्रजायते ॥ एकएवसुखंभुंङ्क्ते दुःखमप्येकएवहि ॥ ७१ ॥ ऋणानुबंधिनःसर्वे
पशुपत्नीसुतादयः ॥ ऋणापायेव्रजंत्येव नेच्छयाकोपितिष्ठति ॥ ७२ ॥ अदातारःप्रदातारोऽधर्मर्णाउत्तमर्णकाः ॥ नानिस्तीर्णमृणं-
एषां केचनोभयथाःपरे ॥ ७३ ॥ केचिद्धनर्णाःक्लेशार्णा वैरर्णाश्चतथापरे ॥ सुखार्णाःकर्मवैचित्र्या न्मिलंतिचवियुंज्यते ॥७४॥ न-
कुर्यात्कुत्राचित्सक्तिं ममतांनैवकारयेत् ॥ बहिश्चित्तोव्यवहरे दनित्यमखिलंस्मरन् ॥ ७५ ॥ एवंदुःखंनियुंजीत युंजीतापिसुखेन-

वि० र०
८६

सः ॥ अन्यथापापभागेव दुःखैश्चपरिभूयते ॥ ७६ ॥ ईश्वरस्येदमखिलं मन्वानःस्वीयमेवयः ॥ कथंदुःखोनजायेत यद्दुःखंस्वल्पमे- अ० ४३
वनत् ॥ ७७ ॥ स्वामिनःस्वंपरस्वंच मन्यमानोनिजंत्विति ॥ सधृष्टोदंडनीयःस्या दितिलोकनिदर्शनं ॥ ७८ ॥ अग्निरापःफलंमूलं
तृणौषध्यादिकंहरिः ॥ सुलभंव्यदधाल्लोके तेनजीवंतिजंतवः ॥ ७९ ॥ तथैवविप्रालोकेस्मि न्हरिणाःसुलभाःकृताः ॥ यतोदानेन-
तपसा लोकाःपुण्यमवाप्नुयुः ॥ ८० ॥ विप्रादानतपोमूलं तान्विनातन्नजायते ॥ सुलभानप्यतोधर्मा न्नावमन्येततानिह ॥ ८१ ॥
केषांचिदुपचर्यार्थं गंगामपिविनिर्ममे ॥ स्वपादाद्दययाविष्णु र्यापुनातिजगत्त्रयं ॥ ८२ ॥ भक्त्यादधारयांमूर्ध्नि हरेःपादजलंत्विति॥
महादेवोपिसाप्रोक्ता सारभूताजगद्धिते ॥ ८३ ॥ अतएवपुराव्यासः प्राहपृष्टोमहर्षिभिः ॥ सारभूतंजगत्यस्मिं स्तन्मतःश्रुणुताद-
रात् ॥ ८४ ॥ हरिर्भागीरथीविप्रा विप्राभागीरथीहरिः ॥ भागीरथीहरिर्विप्राः सारमेतज्जगत्त्रये ॥ ८५ ॥ मनसापित्रयंचैत न्नाव-
मन्येतबुद्धिमान् ॥ नहिसारद्रुहोलोके दृश्यंतेबुद्धिसंयुताः ॥ ८६ ॥ भाग्येनसुलभंचैत दभाग्याद्दुर्लभंत्रयं ॥ सुलभंयोवजानाति
दुर्लभंतस्यतद्भवेत् ॥ ८७ ॥ यद्येतद्दुर्लभंतर्हि कथंस्यात्सुलभंसुखं ॥ अतःसुखार्थिनानित्यं भजनीयमिदंत्रयं ॥ ८८ ॥ वस्तुतोदु- ८६
र्लभाविप्रा दृश्यंतेसुलभाइव ॥ भाग्यलभ्याहितेप्रायो भाग्यंदुर्लभमेवहि ॥ ८९ ॥ पृथिव्यांभारतंवर्षं अत्यल्पपरिमाणकं ॥ त-
त्रापिप्रायशोवृक्षा नदीपर्वतकंदराः ॥ ९० ॥ क्षेत्रादीन्यवशिष्टेपि प्रायेणैवाधमाजनाः ॥ उत्तमेष्वपिहिप्रायो निर्धनानास्तिकाः-

परे ॥ ९१ ॥ आस्तिकेष्वपिहिप्रायो मंदभाग्याह्युपद्रुताः ॥ लक्षायुतसहस्रेषु कश्चिद्विष्णुपदेरतः ॥ ९२ ॥ तत्रापिभाग्यतोलाभो
विष्णुभक्तस्यसंगतेः ॥ महिमाश्रवणंविष्णो र्दुर्लभाद्दुर्लभंस्मृतं ॥ ९३ ॥ नलभ्यंतेयततोपि मंदभाग्याहियेनराः ॥ श्रवणानंतरं-
विष्णो र्मननंदुर्लभंमतं ॥ ९४ ॥ ध्यानंचदुर्लभंतस्मा त्साक्षात्कारोभवेद्यतः ॥ बहूनांजन्मनामंते निदिध्यासनतत्पराः ॥ ९५ ॥
लभंतेब्रह्मनिर्वाणं मोक्षोतोदुर्लभोमतः ॥ जानताजानतावापि विष्णुभक्तिमतासता ॥ ९६ ॥ संकीर्त्योवचसाविष्णुः स्मरणीय--
श्चचेतसा ॥ कर्माणिसंस्मरेत्तस्य लभेत्सिद्धिंततःशनैः ॥ ९७ ॥ सकामानितुकर्माणि विष्णुभक्तैःकृतानिचेत् ॥ सांतान्येवफलानि-
स्यु रविलंबेननान्यथा ॥ ९८ ॥ निष्कामोहरितुष्ट्यर्थं कुर्यात्कर्माणियानिच ॥ विलंबात्तत्फलंभुंक्ते मोक्षबीजंचतद्भवेत् ॥ तद--
न्यंदेवमुद्दिश्य कर्मयत्सुकृतंनरैः ॥ १०० ॥ तत्रस्थस्तत्फलंविष्णुः प्रदद्यात्किंचिदल्पकं ॥ तन्मोक्षप्रतिबंधाय भवेत्तस्मान्नतद्वरं
॥ १०१ ॥ जीवाःकर्माणिकुर्वाणाः प्रायोनैवविजानते ॥ नस्मरंतिविजानंतो यद्यप्येवंतथापिहि ॥ १०२ ॥ तत्वदेवाःप्रपश्यंति
प्राणाद्याःसकलाअपि ॥ हरेराज्ञानुसारेण फलदाःसूक्ष्मदर्शिनः ॥ १०३ ॥ आदित्यचंद्रावनिलोनलश्च द्यौर्भूमिरापो ह्रदयंयमश्च॥
अहश्चरात्रिश्चउभेचसंध्ये धर्मोविजानातिनरस्यवृत्तिं ॥ १०४ ॥ अन्येपियेप्राणमनोहृषीक भूताधिदेवामनुरीशमुख्याः ॥ कर्मा-
धिदेवाअमुनासदैव बहिस्तथांतर्विचरंतिशश्वत् ॥ १०५ ॥ एकोहमत्रास्मिनकोपिजाना त्येवंविमूढाबतमन्यमानः ॥ करोतिक-

र्माणिनशंकमानो भोगेफलानांकृपणोहिखिद्यते ॥ १०६ ॥ अतोविशंकेतसदैवदेवा न्सहैवपश्यन्विबुधोहितेप्सुः ॥ पापेषुकर्मस्व-
थपुण्यएकः सदायतेनैवततोलभेतशं ॥ १०७ ॥ ईर्ष्यामसूयांचसदैववर्जये त्पीडायतस्यादपरस्यतञ्च ॥ नैवाचरेन्नैवगृहीतवाचा
नचिंतयेद्वामनसापिकर्हिचित् ॥ १०८ ॥ परस्यानिष्टसंप्राप्तौ यत्सम्यङ्मनुतेनरः ॥ सईर्ष्यकःस्वयंचापि तादृशंदुःखमाप्नुयात्
॥ १०९ ॥ असूयतिपरस्येष्टं दृष्ट्वाखिद्यतिमानसे ॥ इष्टहानिंचयोवांछे तादृगिष्टंलभेन्नसः ॥ ११० ॥ परपीडांतुयःकुर्या त्तादृक्-
पीडांलभेस्त्वयं ॥ योयस्यमांसमश्नाति सतद्विष्टाक्रिमिर्भवेत् १११ ॥ वृथाद्रोहेतुयोयस्य पुत्रस्त्रीसुत्दृदादिनां ॥ कुर्यात्तेनविमुक्तः
स्या त्तद्दास्तत्प्रीतिमान्भवेत् ॥ ११२ ॥ अदातातुदरिद्रस्या दातायःसधनीभवेत् ॥ पतिध्रुक्पुंश्चलीचैव सपत्नीद्रोहिणीचया ॥
११३ ॥ देवब्राह्मणपूजाद्विट् दानध्रुक्विधवाभवेत् ॥ विपर्ययात्प्रजायेत सुभगाधनपुत्रिणी ॥ ११४ ॥ देशकालानुसारेण जाति-
कर्तृविशेषतः ॥ विचित्रफलदंकर्म विस्तरादुर्वचंचतत् ॥ ११५ ॥ प्रायोजन्मांतरेष्वेव कर्मणांफलमश्नुते ॥ कालांतरेपिकेषांचि
त्सहायांतरलाभतः ॥ ११६ ॥ त्रिभिर्वर्षैस्त्रिभिर्मासै स्त्रिभिःपक्षैस्त्रिभिर्दिनैः ॥ अत्युत्कटैःपुंण्यपापै रिहैवंफलमश्नुते ॥ ११७॥
इत्येवप्रायशःशास्त्र रहस्यंभवतांपुरः ॥ प्रश्नानुसारिकथितं प्रसंगादपिकिंचन ॥ ११८ ॥ भवंतोविदुषांश्रेष्ठाः शास्त्रतत्वविवेकिनः
॥ निर्णयंत्ववसिष्टंय च्छास्त्रांतरविलोकनात् ॥ ११९ ॥ स्वयंतत्वविदोयूयं शास्त्रतत्वप्रदर्शकाः ॥ अथापिप्रश्नवाक्यानि लोकानांत-

81

त्ववित्तये ॥ १२० ॥ स्वभावोयंसतांविश्वं विदित्वापिपुनःपुनः ॥ अबुधाइवपृच्छंति शृण्वंतिपरतस्तथा ॥ १२१ ॥ ज्ञातंमुहुर्वि-
चार्यस्या छ्रोतव्यंबहुधाबहु ॥ बहुभ्योबहुवारंचे त्येवंदर्शयितुंजनान् ॥१२२॥ अनंतोमहिमाविष्णो श्चिंतनीयःसदैवसः ॥ वदेछ्रो-
तरिसंपंने श्रुणुयात्सतिवक्तरि ॥ १२३ ॥ अन्यदासंस्मरेत्तापि महिमानंपरात्मनः ॥ नवृथाकर्मकुर्वीत येनायुव्यर्थतांव्रजेत्॥१२४॥
दुर्लभाद्दुर्लभंलोके त्वल्पमायुर्नृणांयतः ॥ बाल्येनन्हीयतेकिंचि त्तथाप्रायेणनिद्रया ॥ १२५ ॥ रोगवार्धकचिंताभि र्दुःसंगात्प्राय-
शस्तथा ॥ अवशिष्टंकदाचित्तु सत्संगोलभ्यतेनरैः ॥ १२६ ॥ तदाकिंचित्स्थितंस्वस्य भवद्भाग्यान्नवाभवेत् ॥ धन्योस्मिकृतकृत्यो-
हं स्मारितोयद्भवादृशैः ॥ महिमानंमहाविष्णो र्विष्णुभक्तिपरायणैः ॥ १२७ ॥ वासुदेवकथाप्रश्नः पुरुषांस्त्रीन्पुनातिहि ॥ वक्ता-
रंपृच्छकंश्रोतृं स्तत्पादसलिलंयथा ॥ १२८ ॥ इति श्रीविष्णुरहस्ये भगवन्महिमा वर्णनंनाम त्रिचत्वारिंशोध्यायः ॥ ४३ ॥छ॥

॥ श्रीवेदव्यासायनमः ॥ शौनकउवाच ॥ अपिसूतत्वयागीत मेतत्सर्वंश्रुतंहिनः ॥ अथप्रस्तुतमाख्यादि यदमोचद्गजंहरिः ॥ १ ॥
सूतउवाच ॥ हरिणामोचितोनक्रा द्गजेंद्रःस्मृतिमात्रतः ॥ तापसस्यांतरेविप्रा स्तदाख्यानंमहाद्भुतं ॥ २ ॥ विष्णुःपंचममारभ्य
मन्वंतरमवोचत ॥ तदाख्यास्यामिभवतां पुरस्ताच्छृणुतादरात् ॥ ३ ॥ श्रीभगवानुवाच ॥ तापसस्यानुजोब्रह्म न्पंचमोरैवतोमनुः ॥

तदाभूतरयादेवा आसन्निंद्रोविभुःस्मृतः ॥ ४ ॥ धर्मपत्न्यांविकुंठायां शुभ्राख्यस्यमहामुनेः ॥ अजायतस्वयंविष्णु वैकुंठोलोकविश्रु-
तः ॥५॥ तस्यपत्न्यभवद्देवी स्वयंपद्मैवसुंदरी ॥ तत्प्रीत्यर्थंभुवोभागे वैकुंठंकृतवान्पुरं ॥ ६ ॥ यत्रदेवैःसवैकुंठे देव्याचसहमोदते ॥
तस्यकर्माण्यपाराणि नशक्यानीहवर्णितुं ॥ ७ ॥ षष्ठस्तुचक्षुषःपुत्र श्चाक्षुषोमनुरीरितः ॥ मंद्रद्युम्नस्स्वयंशक्रः ऐंद्रंपदमशासत ॥ ८ ॥
वैराजादभवद्विष्णु र्योजितोह्ममितिश्रुतः ॥ चतुर्दशापिरत्नानि लक्ष्म्यादीनिपयोंबुधेः ॥ ९ ॥ उत्धृत्यप्रददौतानि देवादिभ्योयथा-
तथं ॥ जग्राहसस्वयंलक्ष्मीं रुद्रोहालाहलंपपौ ॥ १० ॥ सुधांधन्वंतरिर्भूत्वा बहिरानीयदेवताः ॥ स्त्रीरूपीपाययामास वंचित्वादै-
त्यदानवान् ॥ ११ ॥ तदैवकूर्मरूपेण पृष्ठेदध्रेसमंदरं ॥ अन्यान्यपिचरित्राणि विचित्राणिचकारसः ॥ १२ ॥ तस्यमन्वंतरस्यांते
श्राद्धदेवोरवेःसुतः ॥ कुर्वाणःकृतमालायां जलतर्पणमादरात् ॥ १३ ॥ अंजलौदृष्टवान्मत्स्यं दययाकलशेदधौ ॥ निशायांववृधेसोथ
तत्रालंनबभूवच ॥ १४ ॥ उवाचमांनयान्यत्र दयालोविपुलेक्वचित् ॥ इतितद्वाचमाकर्ण्य श्राद्धदेवःसविस्मितः ॥ १५ ॥ कूपतटा-
गनद्यांच क्रमाच्चिक्षेपसागरे ॥ अचिराद्वर्धमानःस सागरंव्याप्यतास्थिवान् ॥ १६ ॥ तमुवाचश्राद्धदेवः कोभवानद्भुताकृतिः ॥ न-
हिविष्णुंविनात्वादृक् लोकेस्मिन्नुपपद्यते ॥ १७ ॥ ततोहरिंविनिश्चित्य तुष्टावस्नेहसंयुतः ॥ तुष्टोमत्स्यस्तुतंप्राह सत्यव्रतशृणुष्वमे
॥ १८ ॥ सप्तमेहनिसंप्राप्ते सागरोवृध्धिमेष्यति ॥ सजलेनाखिलांभूमिं जनंसंप्लावयिष्यति ॥ १९ ॥ तावत्वंमुनिसंयुक्तः समस्ता-

नौषधीगणान् ॥ बीजभूतांश्वसंगृह्य प्रतीक्षस्वमहामते ॥ २० ॥ इत्याज्ञप्तस्तथाचक्रे तावत्सप्तमवासरे ॥ ववृधेजलधिःपश्चा द्गिरि-
शृंगंसमारुहत् ॥ २१ ॥ तावत्तत्रापिपानीयं वर्धमानंनिरीक्ष्यसः ॥ मृत्युनिश्चयमापन्न स्तावन्नावंधरामयीं ॥ २२ ॥ प्लवंतींनिक-
टायातां धृत्वातामारुहत्तदा ॥ साचनौःप्लवमानापि पर्वताकारवीचिभिः ॥ २३ ॥ दोल्यमानामहावातै र्मज्जंतीमवलोक्यते ॥
ततोहाहाकृताःसर्वे मुनयस्तंबभाषिरे ॥ २४ ॥ यस्त्वयाराधितोदेव स्तमुपाधावमाचिरं ॥ ततस्तमस्तुतानंतं मत्स्याकारंमहेश्वरं
॥ २५ ॥ प्रादुर्भूतोमहाशृंगो महामत्स्यस्तदैवहि ॥ प्रोवाचसतमाश्वास्य वत्समाभैरितिब्रुवन् ॥ २६ ॥ अनेनशृंगसंस्थेन शेषसर्पे
णयोजय ॥ इमांनावंततःस्वस्थ चेताआस्वर्षिभिःसह ॥ २७ ॥ तथाकृत्वासुखंलब्ध्वा स्वस्थचेताहरिप्रियः ॥ पप्रच्छविविधान्प्रश्ना
न्हरिःपर्यहरच्चतान् ॥ २८ ॥ पप्रच्छानेनरूपेण पुराकिंकृतवानिति ॥ हरिःप्राहपुराकल्पे प्रलयेसमुपस्थिते ॥ २९ ॥ हयग्रीवोम-
हादैत्यो पाहरद्वेदमब्जजात् ॥ आरब्धेश्वेतवाराह कल्पेस्मिन्ब्रह्मणार्थितः ॥ रूपेणानेनतंहत्वा वेदानाहृतवांस्ततः ॥ ३० ॥ स-
त्यव्रतउवाच ॥ कल्पांतप्रलयेसर्वे प्रलीनाजीवराशयः ॥ महादैत्यःकथंजीव न्संस्थितस्तद्वदस्वमे ॥ ३१ ॥ मत्स्यउवाच ॥ पुरा-
देवांतकोनाम दैत्यःपरमदारुणः ॥ तपसातोषयद्देवं ब्रह्माणंसर्वतोवरं ॥ ३२ ॥ सर्वदेवविनाशाय तथाकल्पांतजीवनं ॥ वव्रेवर-
द्वयंतस्मा द्देवंचक्रेसदुर्जनः ॥ ३३ ॥ देवानांजीवनंवेदा स्तन्नाशेदेवसंक्षयः ॥ देवनाशेवृत्तिनाशा त्सर्वनाशोभवेत्तदा ॥ ३४ ॥

सएवप्रलयेजातो जीवतश्चमहासुरः ॥ हयाकारमुखत्वेन हयग्रीवःसकथ्यते ॥ ३५ ॥ श्रुत्वेत्थंवचनंपश्चा त्सोन्यंप्रश्नमपृच्छथ॥
मानवेस्मिल्लयेतीते समुद्रस्वच्छतांययौ ॥ ३६ ॥ मत्स्यस्तिरोदधेपश्चा द्भूमौसृष्टिरभूत्ततः ॥ एषएवमनुर्जातः सप्तमोहिरवेःसुतः
॥ ३७ ॥ इक्ष्वाकुमुख्यास्तस्यासुः पुत्रादशमहाबलाः ॥ इंद्रःपुरंदरस्तत्र देवारुद्रादयस्तथा ॥ ३८ ॥ कश्यपाद्याश्चऋषयो वि-
ष्णुभक्तिपरायणाः ॥ हिरण्यकशिपोःपुत्रः प्रल्हादोयोभवत्पुरा ॥ ३९ ॥ यदर्थंनारसिंहाख्यो भूत्वाहंतुंमहासुरं ॥ हतवांस्तस्यन-
प्ताभू द्बलिर्नाममहासुरः ॥ ४० ॥ सशुक्रवरसंवृध्दो जित्वाशक्रंसुरैर्वृतं ॥ ऐंद्रंपदमशाद्देवा निलिल्युस्तत्रतत्रह ॥ ४१ ॥ देवदौ-
र्भाग्यमालोक्य देवमातादितिस्तदा ॥ नानाव्रतैश्चतपसा मामतर्पयदंजसा ॥ ४२ ॥ ततोहंवामनोभूत्वा तद्गर्भेकश्यपान्मुनेः ॥
प्रल्हादप्रार्थनांस्मृत्वा याचित्वादीक्षिताद्बलेः ॥ ४३ ॥ पदत्रयमितंस्थानं तल्लब्ध्वाहंत्रिविक्रमः ॥ भूत्वाभुवंपदैकेन स्वर्गलोकंपदे-
कतः ॥ ४४ ॥ गृहीत्वैकपदार्थंतं बध्दवांस्तुबलिंपुनः ॥ ततःस्वपृष्ठंदत्वास प्रतिज्ञांतीर्णवान्निर्जा ॥ ४५ ॥ तादृशींप्रकटीकृत्य तद्भ-
क्तिंलोकविश्रुतां ॥ महद्यशःप्रथित्वाच पातालंस्थानमादिशं ॥ ४६ ॥ यत्रेंद्रपदतोभोगाः विशेषादेवसंस्थिताः ॥ तद्भक्तिबध्दस्त-
द्वारे रूपेणैकेनतस्थिवान् ॥ ४७ ॥ भूत्वोपेंद्रस्तथाशक्र सहकारीसदैवहि ॥ रूपेणान्येनचस्वर्गे देवपूज्यःसदोषितः ॥ ४८ ॥ दुष्टक्ष
त्रियभारेण खिन्नामालोक्यकाश्यपीं ॥ भूत्वाभार्गवरामोहं निःक्षत्रांकृतवान्महीं ॥ ४९ ॥ रावणाद्यैर्महादैत्यैः राक्षसींतनुमाश्रि-

89

तैः ॥ उपप्लुतांभुवंदृष्ट्वा रामोदाशरथिःपुनः ॥ ५० ॥ भूत्वानिहत्यतंलंकां महाभक्तेविभीषणे ॥ दत्वाथगतवान्धाम पुनर्वैकुंठमा-
त्मनः ॥ ५१ ॥ अज्ञानांधतमोमग्नं वीक्ष्यलोकंनिजंपुनः ॥ पराशरात्सत्यवत्यां कृष्णद्वैपायनोभवं ॥ ५२ ॥ पुनर्दुःक्षत्रियैर्व्याप्तां
विलोक्यतुवसुंधरां ॥ ब्रह्मादिदेवतावृंदैः प्रार्थितःकृष्णतांगतः ॥ ५३ ॥ पांडवान्बलरामंच प्रद्युम्नादींश्चयादवान् ॥ सचिवीकृत्य--
त्हतवान् भारभूताखिलान्जनान् ॥ ५४ ॥ तामसान्वैदिकेमार्गे प्रवृत्तान्वीक्ष्यवैपुनः ॥ बुद्धतांप्राप्यदुर्मार्गे नियोज्यैतानदांतमः
॥ ५५ ॥ अष्टाविंशेयुगेत्वेव जातेपश्चात्कुभूमिपैः ॥ दस्युभिर्यवनैःक्रांता मेकवर्णत्वमागतां ॥ ५६ ॥ वीक्ष्यकल्कित्वमापन्नः संहृ-
त्यैतान्कृतव्यथां ॥ पुनःपुनर्युगांतेतु प्राप्तेधर्मस्यविप्लवे ॥ ५७ ॥ राजराजोहमेवांशैः स्थित्वाससुनृपेष्वहं ॥ स्थापयामिपुनर्धर्मं पु-
नर्वेदान्द्विजादिकान् ॥ ५८ ॥ एवंप्रतियुगंब्रह्मन् प्रतिमन्वंतरंतथा ॥ सृष्टिस्थित्यादिकर्माणि स्वयमेवकरोम्यहं ॥ ५९ ॥ साव--
र्णिरष्टमःपश्चा न्मनुःसूर्यसुतोभवत् ॥ निर्मोकविरजस्काद्याः तत्सुतादेववर्चसः ॥ ६० ॥ देवासुतपसोनाम बलिरिंद्रस्तदाभवत् ॥
गालवाद्याश्चमुनयः सप्ततत्रप्रकीर्तिताः ॥ ६१ ॥ वारुणिर्नवमोदक्ष सावर्णिरितिवैमनुः ॥ धृष्टकेत्वादयस्तस्य सुताःपारादयस्त--
था ॥ ६२ ॥ इंद्रस्तदाद्भुतोनाम मुनयोद्युतिवन्मुखाः ॥ तदाहमृषभोभूत्वा गतोद्भुतसहायतां ॥ ६३ ॥ ब्रह्मसावर्णिनामाभू दृश-
मे.वैमनुस्तदा ॥ हविष्मत्प्रमुखाविप्रा देवेंद्रोभूत्स्वयंशिवः ॥ ६४ ॥ विष्वक्सेनोप्यहंभूत्वा तत्सख्यंकृतवानपि ॥ सुखासनाद्या-

देवास्तु तस्तदैवोपतस्थिरे ॥ ६५ ॥ मनुरेकादशोजज्ञे धर्मसावर्णिनामकः ॥ इंद्रोवैधृतनामासी न्मुनयश्चारणादयः ॥ ६६ ॥ विहंगमाद्यादेवाश्च तास्मिन्मन्वंतरेभवन् ॥ द्वादशोरुद्रसावर्णि र्देवश्रेष्ठादयःसुताः ॥ ६७ ॥ इंद्रस्तनूतनामाभू न्मुनयोनींध्रकादयः ॥ हरिताद्यास्तदादेवा स्वधामाख्योहमेवतु ॥ ६८ ॥ त्रयोदशोमनुर्जातो वेदसावर्णिनामकः ॥ तत्सुताश्चित्रसेनाद्या सुकर्माद्याश्चदेवताः ॥ ६९ ॥ दिवस्पतिस्तुदेवेंद्रो निर्मोचकमुखाद्विजाः ॥ योगेश्वरोममांशोभू त्तस्मिन्मन्वंतरेशुभे ॥ ७० ॥ इंद्रसावर्णिनामासी न्मनुरंत्यश्चतुर्दशः॥ उर्वादयःसुतास्तस्य पवित्रादेवतास्तथा ॥ ७१ ॥ शुचिरिंद्रोग्निवाहाद्या स्तदासप्तर्षयःस्मृताः ॥ बृहद्भानुरहंब्रह्मन् शुचिमिंद्रमनुव्रतः ॥ ७२ ॥ एवंहिमनवःसर्वे चतुर्दशदिनेदिने ॥ जायंतेप्रायशस्त्वेवं पुनःपुनरिहाभवत् ॥ ७३ ॥ अन्येकपिलदत्ताद्या अवताराःसहस्रशः ॥ आविर्भावंतिरोभावं यथाकालंभजंतिहि ॥ ७४ ॥ इति श्रीविष्णुरहस्ये मन्वंतरानुवर्णनंनाम चतुश्चत्वारिंशोध्यायः ॥ ४४ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीवेदव्यासायनमः ॥ भगवानुवाच ॥ एवंदिनेदिनेब्रह्मन् सृष्टिस्थित्यप्ययादिकं ॥ आसीद्यावदशीतिस्युः सार्धसप्ताधिकासमाः ॥ १ ॥ सृष्टिकालाष्टमेभागे संजिहीर्षाभवन्मम ॥ ततोवृष्टेरभावेन भूमौसर्वलयोभवत् ॥ २ ॥ संकर्षणमुखोत्थेन वन्हिना-

१०

सिंधुशोषणं ॥ भूमिपर्वतराशीनां तदेवविलयोभवत् ॥३॥ तस्मिन्महाश्मशानेतु महाभैरवरूपधृक् ॥ तांडवंकतिचित्कालं कृत-
वान्देवतावृतः ॥ ४ ॥ तिष्टतांकलिमुख्यानां दैत्यानांचैवसर्वशः ॥ तमोद्वारिमहाघोरे पुनरावृत्तिवर्जिते ॥ ५ ॥ वायुर्गदाप्रहारेण
लिंगभेदंविधायतु ॥ विनद्यसिंहनादंच स्वदूतैर्मरुतादिभिः ॥ ६ ॥ प्राक्षेपयन्महाकष्टे तानंधतमसिक्रमात् ॥ भुंजंतस्तत्रदुर्भोगा
न्स्वरूपेणव्यवस्थिताः ॥ ७ ॥ अनित्यानीतिमन्वाना मिथ्याज्ञानस्वरूपिणः ॥ तिष्टंत्यनंतकालंच द्वेषिणोममसर्वदा ॥८॥ अथ--
व्युत्क्रमतोनाशे समारब्धेसतिक्रमात् ॥ भुवरादिलयेजाते देवतानांलयेपिच ॥ ९ ॥ शनैर्नवतिमाब्दांते ब्रह्मांडस्यलयोभवेत् ॥
ततआवरणानांच दशानांक्रमशस्तथा ॥१०॥ तत्रत्यदेवदेहानां स्थूलानांविलयोभवेत् ॥ यावत्पंचोनशतक माद्यस्यब्रह्मणोभवत्
॥ ११ ॥ तावदित्थमभूल्लीनं सर्वस्थूलंक्रमेणतु ॥ ततःसूक्ष्मलयश्चासी द्युत्क्रमेणशनैःशनैः ॥ १२ ॥ विरिंचेश्वरमेकल्पे योगिनोमु-
क्तिगामिनः ॥ विविशुर्ब्रह्मणोदेहे लिंगमात्रावशेषिणः ॥ १३ ॥ कर्मशेषयुताश्चान्ये संसारेपरिवर्तिनः ॥ ब्रह्मांडस्थाखिलाजीवा
सूत्रवायुमुपाश्रिताः ॥ १४ ॥ सवायुःप्रविशद्रूपे जयायाःसोप्यलीयत ॥ संकर्षणेततःसोपि तत्रैवालीयतक्रमात् ॥ १५ ॥ सत्वा-
तु दिगुणवैषम्या द्रजोमूलोमहत्तनुः ॥ यांदेहःसविरिंचस्तु पृथग्भूत्वाव्यलीयत ॥ १६ ॥ लिंगदेहयुताःसर्वे ब्रह्माद्याजीवराशयः ॥
चरमावरणव्योम मध्यभागेनिवेश्यच ॥ १७ ॥ विरजायांत्यक्तलिंगाः शुद्धरूपाश्चसर्वशः ॥ मायाद्वारावासुदेवं प्रविश्यानंदरू-

पिणः ॥ १८ ॥ निर्मुक्ताखिलबंधास्ते मोदंतेसर्वदैवहि ॥ अनंतासनवैकुंठ नारायणपुरादिषु ॥ १९ ॥ भुंजानाविविधान्भोगान्
पुनरावृत्तिवर्जिताः ॥ पश्यंतिभ्रमतोजीवां स्तीर्णपाराइवापरान् ॥२०॥ यथोत्पत्तिमहत्तत्वं विलीनंतुगुणत्रये ॥ परांतेथरजोदेवी-
भूरजोलयमातनोत् ॥ २१ ॥ राशित्रयस्यनाशेन गुणवैषम्यनाशतः ॥ राशिद्वयेसुसंपंने गुणसाम्यंततोभवत् ॥ २२ ॥ सएवप्रल-
योनाम गुणसाम्याभिधःस्मृतः ॥ सृष्ट्यादौगुणवैषम्य मितिनाम्नाभिधीयते ॥ २३ ॥ गुणानांविषमैर्भागै र्महत्तत्वंप्रजायते ॥ अ-
हंकारादिकंसर्वं पूर्ववज्जायतेपुनः ॥ २४ ॥ मध्यमानांतुजीवानां यांतिलिंगानिसर्वशः ॥ रजोगुणात्मकत्वात्तु नित्यान्येवेतिचक्ष-
ते ॥ २५ ॥ रजोनित्यंतदेवोक्तं केचिदन्यद्वदंत्यपि ॥ सान्निध्यात्तमसोराशेः सत्वराश्येकभागकः ॥ २६ ॥ उपरक्तइवाभाति स-
भागोरजइत्यपि ॥ प्रकृतिस्त्रिगुणाह्येवं सर्वदेवातउच्यते ॥ २७ ॥ पूर्वोक्तेवैलयेजाते ब्रह्मणोथक्रमादपि ॥ वासुदेवादिरूपाणा
मभून्नारायणेलयः ॥ २८ ॥ मायादीनांचसर्वेषां रूपाणांचक्रमाच्छ्रियः ॥ अंभ्रण्यामैक्यमगम त्ततोदेव्याहमेकलः ॥ २९ ॥ प्रलय-
स्यादिमेभागे किंचित्कालमिदंह्यभूत् ॥ महाप्रलयकालेतु केवलंरमयायुतः ॥ ३० ॥ करोमिविविधाःक्रीडा स्तानयोग्याइहोदितुं ॥
एवंप्रायेणसर्वेषु ब्रह्मकल्पेषुसर्वदा ॥ ३१ ॥ उत्धृत्यजीवराशिभ्यो नानाजीवगणान्पृथक् ॥ तथाप्रकृतिभागांश्च देहयोगादिनासृ-
जे ॥ ३२ ॥ प्रायेणतामसाजीवा स्ततोल्पाःसात्विकामताः ॥ अत्यल्पाराजसाजीवा स्तेसदासंसृतौस्थिताः ॥ ३३ ॥ लभंतेसा-

९१

त्विकामोक्षं वैकुंठादिषुतेस्थिताः ॥ तामसास्तुतमस्येव स्थितादुःखानिभुंजते ॥ ३४ ॥ मद्भक्तिःसाधनंमोक्षे मद्वेषस्तमसःस्मृतः ॥
काम्यकर्मरतेःस्वर्ग निरयादिषुसंस्थितिः ॥ ३५ ॥ प्रायेणब्राह्मकल्पेषु तथादैनंदिनेष्वपि ॥ पूर्वोक्तवत्प्रजायंते सृष्टयाद्याःसर्वदैव
हि ॥ ३६ ॥ विपर्ययःक्वचित्किंचि दितिशास्त्रविनिर्णयः ॥ एवंतेसर्वमाख्यातं पृष्टापृष्टंत्वयामया ॥ ३७ ॥ रहस्यंसर्वशास्त्राणां
किंचिन्मात्रावशेषितं ॥ यद्यदन्यपुराणादौ कीर्तितंविस्तरादपि ॥ ३८ ॥ तदप्यत्रैवजानीहि नविरोधोत्रकर्हिचित् ॥ सारभूतमि-
दंयस्मा त्तस्मात्सर्वात्मनैवहि ॥ ३९ ॥ सर्वागमेभ्यःश्रेष्ठस्या दन्यदेतस्यविस्तरः ॥ पठतःशृण्वतोवापि गृणतःस्मरतोपिवा ॥ ४० ॥
ब्रह्मन्रहस्यस्यैतस्य सर्वपुण्यफलंलभेत् ॥ मद्भक्तिंपरमांप्राप्य नचिरान्मुक्तिमाप्नुयात् ॥ ४१ ॥ नातःपरतमंकिंचि न्मुक्तिसाधन-
मिष्यते ॥ अतोस्यसर्वदासद्भिः कर्तव्यंश्रवणादिच ॥ ४२ ॥ सूतउवाच ॥ श्रुत्वैवंभगवत्प्रोक्तं सर्वलोकपितामहः ॥ ससृजेपूर्वव-
त्सर्वं प्रायेणैवहितादृशं ॥ ४३ ॥ अनाद्यनंतकालंहि सृष्टिरेषासनातनी ॥ नानीदृशंकुतःक्वापि विप्राभवितुमर्हति ॥ ४४ ॥ भा-
वाभावविभेदेन पदार्थास्तुद्विधाखिलाः ॥ अचेतनस्वभावास्तु रभावाःसर्वएवहि ॥ ४५ ॥ कार्यात्प्रागेवतेकेचि त्तन्नाशात्परतःपरे
॥ त्रैकालिकास्तथाकेचि देवंतेत्रिविधाःस्मृताः ॥ ४६ ॥ भावाःसर्वेस्वाभावेन भिन्नाएवस्वरूपतः ॥ चेतनाचेतनत्वेन सर्वेतेद्विवि-
धाःस्मृताः ॥ ४७ ॥ विष्णुश्रीश्चाखिलाजीवा श्चेतनास्तुस्वभावतः ॥ अन्येसर्वेपियेभावा जडरूपाअचेतनाः ॥ ४८ ॥ जडप्रकृति

भेदास्ते नियम्यास्तेश्रियासदा ॥ यत्किंचिदन्यद्यद्विष्णोः सर्वंप्रकृतियंत्रितं ॥ ४९ ॥ प्रकृत्यासहतत्सर्वं सर्वदाविष्णुयंत्रितं ॥
प्रकृतिश्चेतनाल्लक्ष्मी जडप्रकृतिदेवता ॥ ५० ॥ परमःपुरुषोविष्णुः परमात्मेतियःस्मृतः ॥ एवंहिसर्वमेवैत द्भूतंभव्यंचविद्यते
॥ ५१ ॥ प्रकृतिःपुरुषश्चेति द्वाभ्यामेवनियंत्रितं ॥ यथैकमेवराजानं नानारूपधरंनराः ॥ ५२ ॥ नानास्थानगतंनाना वस्थाप्राप्तंपृ
थक्पृथक् ॥ नानावेषैस्तथाभावै रर्चित्वाफलभागिनः ॥ ५३ ॥ तथैकोविष्णुरेवामुं नानारूपान्वितंपृथक् ॥ नानागमानुसारेण
पूजयित्वास्वयोग्यतः ॥ प्राप्नुवंत्यैहिकंप्रायः केचिदामुष्मिकंतथा ॥ ५४ ॥ प्राप्नुवंत्युभयंकेचि त्केचिदेवपरागतिं ॥ तस्माद्वेदांत
शास्त्रेण मुख्यतोवेद्यमीश्वरं ॥ ५५ ॥ विष्णुमेवभजेन्नित्यं ततःसर्वेष्टमाप्नुयात् ॥ नदेवःपरमोविष्णो र्नशास्त्रंवेदतःपरं ॥ ५६ ॥
नज्ञानात्परमंचक्षु र्नमुक्तेःपरमागतिः ॥ नवैराग्यात्परंभाग्यं नशांतेःपरमंसुखं ॥ ५७ ॥ नधर्मसदृशंमित्रं नकामसदृशोरिपुः ॥ अ-
तोनित्यमनित्यंच हितंवाहितमेवच ॥ ५८ ॥ रिपुंमित्रंविदित्वैव मैहिकामुष्मिकात्खिलात् ॥ विरज्यसाधयेद्यत्ना द्यमांश्चनिय
मानपि ॥ ५९ ॥ बंधान्मुमुक्षुःसततं नित्यनैमित्यकर्मकृत् ॥ सत्संगनिरतोनित्यं शृण्वन्विष्णुकथाःशुभाः ॥ ६० ॥ क्रमात्संपंन- ९२
मनन ध्यानयोगेनपूरितः ॥ पश्येद्विष्णुंततःशीघ्रं मुक्तिरस्यभवेद्ध्रुवं ॥ ६१ ॥ यतोनावर्ततेभूयः संसारदुःखसागरे ॥ तत्पदंपरमं
विष्णो र्दैवैःसुकृतकर्मभिः ॥ ६२ ॥ संसारबंधनिर्मुक्तः सेव्यमानंचयत्सदा ॥ रममाणःसदास्वैरं तत्रलोकेमहीयते ॥ ६३ ॥ इ-

९२

ति श्रीविष्णुरहस्ये वासिष्ठे पंचचत्वारिंशोध्यायः ॥ ४५ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीवेदव्यासायनमः ॥ सूतउवाच ॥ एवंवःकथितंविप्रा श्चित्रंचारित्रमीशितुः ॥ पृष्टवंतोभवंतोयं यथामतितदीरितं ॥ १ ॥ श्ला
घनीयोत्रवःसंगो लब्धःप्राचीनकर्मभिः ॥पुण्यैर्विनानलभ्योहि सत्संगोयमभीष्टदः ॥ २ ॥ इष्टंहिसर्वजंतूनां परमंसुखमुच्यते ॥ त-
तोपिप्रथमंप्रोक्तो दुःखनाशोखिलप्रियः ॥ ३ ॥ एवंतुद्विविधेष्टस्य साधनंसर्ववांछितं ॥ तदपिद्विविधंज्ञेयं दृष्टादृष्टविभेदतः ॥ ४ ॥
अदृष्टेनैवदृष्टंस्या द्विनादृष्टंनतद्यतः ॥ धर्मार्थश्चतथाकाम स्त्रिवर्गःसकलेष्टदः ॥ ५ ॥ विनाधर्मेनार्थकामा वितिसश्रेष्ठउच्यते ॥ ए-
वंहिपरमानिष्टं द्विविधंपरिकीर्तितं ॥ ६ ॥ इष्टस्यद्विविधस्यापि विनाशात्प्रतिबंधतः ॥ एकंभवेद्वितीयंतु प्रसिद्धंदुःखमुच्यते ॥७॥
अनिष्टमात्रंदुःखंस्या दिष्टमात्रंसुखंतथा ॥ इत्येवतास्तुतद्भेदा ऊहनीयाहिपूर्ववत् ॥ ८ ॥ अनिष्टसाधनंद्वेधा दृष्टादृष्टविभेदतः ॥
अधर्मान्निर्धनोमर्त्यो नकामोर्थविनाभवेत् ॥ ९ ॥ अतोहिमनसावाचा कर्मणाधर्ममाचरेत् ॥ अर्थकामौश्चतेनैव तंविनादुःखसंत-
तिः ॥ १० ॥ धर्माधर्मविभेदाहि प्रायशःपूर्वमीरिताः ॥ प्रत्येकंद्विविधौप्रोक्ता वर्थकामावपिस्महि ॥ ११ ॥ अदृष्टार्थौचदृष्टार्थौ
दृष्टौदृष्टफलप्रदौ ॥ दृश्यंतेधनिनोलोके नानाभोगैःसुखान्विताः ॥ १२ ॥ जिव्होपस्थादिसुखदः कामोप्यत्रैवदृश्यते ॥ अदृष्टफल

दोद्वेधा नित्यानित्यफलत्वतः ॥ १३ ॥ केवलंविष्णुतुष्ट्यर्थौ प्रोक्तौनित्यफलप्रदौ ॥ अन्यावनित्यफलका वितिशास्त्रविनिर्णयः ॥ १४ ॥ अदृष्टफलकेकामे स्त्रीभोगादौचभोजने ॥ अवर्जत्वेनजायेत सुखंतात्कालिकंत्वपि ॥ १५ ॥ एवमेवास्तिधनिनां केवला दर्थतःसुखं ॥ अभुज्यमानमपित त्धनंलोकेसुखप्रदं ॥ १६ ॥ कीर्तिर्धर्मश्चतद्दाना दृष्टादृष्टफलंमहत् ॥ कामनापूरणात्स्त्रीणां धर्मः स्यादन्यथान्यथा ॥ १७ ॥ पुराहिब्रह्मणादत्तो वरःसुतपसार्चनात् ॥ स्वयंशक्तोहियोमर्त्यो देशतःकालतोपिवा ॥ १८ ॥ दोषाभा वेवृथस्यंतीं स्वपत्नींयोवमानयेत् ॥ विष्टाकृमिःसजायेत स्त्रीहीनोजन्मजन्मनि ॥ १९ ॥ दशभिःपंचभिःपुंभिः स्त्रियःकामोनपूर्यते ॥ अतोहिबहुनारीणां वरणंपापसाधनं ॥ २० ॥ अथापियदिकुर्वीत बहुनारीवृतिंक्वचित् ॥ तदावासरपर्याया द्भोगदानंसमाचरेत् ॥ २१ ॥ अन्यवासरपर्याये वृषस्यंतीतरांयदि ॥ शक्तोपितानचेद्भुंज्या त्तदादोषोनविद्यते ॥ २२ ॥ उभयोरपिभोगेच शक्तः स्यात्तर्हितांव्रजेत्॥प्रस्वेदैश्चापिरोमांचै स्वभावैर्वीक्षणादिभिः ॥२३॥ भावंवितर्कयेत्स्त्रीणां ततोभुंजीतताःपुमान् ॥ वृथारोषंनकुर्वीत वृथाकामंनवर्जयेत् ॥ २४ ॥ नानुरक्तांविरज्येत धर्मिष्ठांच्यावयेंनतु ॥ सांत्वपूर्वंसदाब्रूया नस्त्रीमुद्वेजयेत्क्वचित् ॥ २५॥ सापराधा मपिस्त्रीन्नोहन्या त्धन्पातितोभवेत् ॥ त्हृताधिकारामलिनां पिंडमात्रोपजीवनीं ॥ २६ ॥ परिभूतामधःशय्यां वासयेव्द्यभिचारिणीं ॥ सृष्टिकार्येभगवतो नार्योभूमिसमामताः ॥ २७ ॥ नज्ञायतेकदाकाश्चि त्साक्षाद्वाव्यवधानतः ॥ ताभ्यःकन्याश्चपुत्राश्च भवेयुर्धर्म-

९३

तत्पराः ॥ २८ ॥ अपिस्ववशमापन्ना नारीवान्योपिकोपिवा ॥ मर्त्यःपशुर्वाकीटादि र्नतत्पीडांसमाचरेत् ॥ २९ ॥नद्रुह्येतस्वमार्ग
स्था न्विमार्गस्थांश्चशिक्षयेत् ॥ भरणेपालनेतेषां सावधानःसदाभवेत् ॥३०॥ एवमेवहिभार्यापि पतिंकामुकमन्वियात् ॥ देशज्ञं-
कालज्ञंवापि नदोषंतत्रचिंतयेत् ॥ ३१ ॥ दोषात्पापंभवेत्तस्य नार्याःपापंनविद्यते ॥ यदिस्यान्मैथुनादस्य मरणाद्यपकारणं॥३१॥
रोगादिनाभिभूतस्य नदोषस्तस्यवर्जनात् ॥ वृथैवयावमन्येत पतिंकामुकमंगना ॥ ३३ ॥ विट्चरीसूकरीवास्या द्विधवापिततःप
रं ॥ सदाकुर्यात्प्रियंपत्युः सदाब्रूयात्प्रियंवचः ॥ ३४ ॥ अधर्मस्थमपिह्येनं सांत्वपूर्वंप्रबोधयेत् ॥ मानयेत्पतिमान्यानां तत्पोष्या-
णांचपोषणं ॥ ३५ ॥ सदोद्यताभवेन्नारी नप्रमाद्येतकर्हिचित् ॥ गृहिण्यैवगृहंपुंसां तदभावेगृहंवनं ॥ ३६ ॥ अतोविश्रांतिहेतुःसा
तस्याअपिपतिस्तथा ॥ मितंददातिहिपिता मितंभ्राताामितंसुतः ॥ ३७ ॥ अमितेष्टप्रदातारं पतिंनैवावमानयेत् ॥ आनुकूल्यंभ-
जेत्धर्मे नाधर्मेसादराभवेत् ॥ ३८ ॥ पोषणंपुत्रमुख्यानां विष्णोःपूजेतिचिंतयेत् ॥ विष्णुभावनयाभर्ता सेव्यःस्त्रीभिःसदैवहि ॥
तेनैवसालभेत्पुण्यं नित्यानित्यसुखप्रदं ॥४०॥ इहलोकेपिसुखिनी कीर्तिमत्यपिजायते ॥ पतिस्तदनुकूलस्या गार्हस्थ्यंमोक्षदंहि
तत् ॥ ४१ ॥ संगतौऋतुकालेतु दंपतीसंततोच्छया ॥ विष्णुप्रीतिरितिस्वांते मन्वानौमोक्षभागिनौ ॥ ४२ ॥ विप्रभुक्तान्नशेषेण
स्वादुनास्वादुनापिवा ॥ यथाकालंयथादेशं दंपतीमोक्षभागिनौ ॥ ४३ ॥ नानाविधानिचान्नानि मिलितानिस्वकर्मभिः ॥ विष्णो

ध्ये

नैवेद्यशिष्टानि यज्ञशिष्टानिवैपुनः ॥ ४४ ॥ विप्रभुक्तावशिष्टानि पोष्यभुक्तानिभागशः ॥ तान्यन्नानिगृहस्थस्य पीयूषसदृशानिवै
॥ ४५ ॥ सद्भोगाल्लभतेसौख्य मनित्यंनित्यमैहिकं ॥ तस्मात्त्रिवर्गतोमुष्मा द्भवेत्सर्वेष्टभाङ्नरः ॥ ४६ ॥ अतोनबाधयेदेता न्बुभु-
त्सुर्मिथःक्वचित् ॥ लब्धंधनंचतुर्धैव भक्त्वैकैकेनभागशः ॥ ४७ ॥ त्रिवर्गमार्जयेदेकं नियुंजीतसुहृज्जने ॥ अल्पंचेत्धनमस्यस्या
त्किंचित्धर्मंसदार्जयेत् ॥ ४८ ॥ प्रायःपोष्याणिबिभृया त्स्वल्पमन्यत्रयोर्जयेत् ॥ महाधनःप्रकुर्वीत द्वित्रिभागैरपिध्रुवं ॥ ४९ ॥
धर्ममेवाधिकोयस्मा त्सएवात्रिष्वपिस्फुटं ॥ अर्थोहिद्विविधःपुंसां धनंविद्येतिभेदतः ॥ ५० ॥ आर्जयेतद्द्वयंयस्मा दृष्टादृष्टफलप्र-
दं ॥ त्रिवर्गेणापिसर्वेण मोक्षएष्टव्यएवहि ॥ ५१ ॥ यतोनित्यंसुखंचान्य दुःखात्यंतनिवर्तनं ॥ मुख्यंतत्साधनंविष्णोः प्रसाद-
स्तस्यसाधनं ॥ ५२ ॥ तद्भक्तिरथतस्याश्च हेतुःसत्संगतिर्ध्रुवं ॥ दानतीर्थतपोधीतिःमुख्यान्यन्यानियानिच ॥ ५३ ॥ कारणानि-
सतांसंगे श्रवणादिततोभवेत् ॥ सतिशृण्वतिभाषंते शृण्वंतिसतिवक्तरि ॥ ५४ ॥ गुणानुकीर्तनंविष्णो स्तद्भक्तानामथापिवा ॥
तएवसंतोविज्ञेया स्तेचसर्वाधिकेष्टदाः ॥ ५५ ॥ एकांतानांविष्णुरेवाखिलेष्टो मोक्षस्तेभ्योथोपियेसज्जनाःस्युः ॥ यस्माद्विष्णुर्मोक्ष-
दोलभ्यएव श्रेष्ठस्तस्मात्संगमःसज्जनानां ॥ ५६ ॥ इति श्रीविष्णुरहस्ये सत्संगमहिमावर्णनंनाम षट्चत्वारिंशोध्यायः ॥४६॥

९५

॥ श्रीवेदव्यासायनमः ॥ सूतउवाच नारीवापुरुषोवापि योमुमुक्षुर्भवेदिह ॥ सदुःसंगंनकुर्वीत स्वस्यपातोभवेद्यतः ॥ १ ॥ पिता-
भ्रातासुतोवापि यतिर्योगीश्वरोपिवा ॥ दूरादेवससेव्यस्या त्सांनिध्यादुभयच्युतिः ॥ २ ॥ लोहायस्कांतवन्नारी नरसंगतिरिच्यते॥
तथैवनवनीताग्नि सदृक्तत्संगमोभवेत् ॥ ३ ॥ पंचचूडाप्सराप्राह देवर्षिर्नारदंपुरा ॥ रम्यंपुरुषमालोक्य स्त्रीयोनिःखिद्यतिभृशं
॥ ४ ॥ तथैवपुरुषोनारीं दृष्ट्वामाद्यतिनान्यथा ॥ मनसासंगमन्विछ न्विवेकाद्विनिवर्तते ॥ ५ ॥ मनःक्षोभकरःसंगो दुःसंगइति-
गीयते ॥ पुंसांचपुंश्चलीनांच संगस्त्रीणांनयुज्यते ॥ ६ ॥ विटानांचापिनारीणां संगःपुंसांनयुज्यते ॥ काष्ठपुत्तलिकांनित्यं दृष्ट्वामा
द्येत्पुमानयं ॥ ७ ॥ सकथंनैवमाद्येत नारीमुपगतामिह ॥ स्वसारंमातरंकन्या मपिस्वनिकटेपुमान् ॥ ८ ॥ वासयेदेकशय्यादौ वा-
सनस्पर्शनादिषु ॥ यथातृणकुटीवन्हि र्निदाघेशक्यतेनहि ॥ ९ ॥ तोयेनशमितुंतद्व त्कामोविवेकवारिणा ॥ तपसश्चावितोमत्स्य
संगाद्योगीससौभरिः ॥ १० ॥ श्वानत्वमुर्वशीसंगा द्विश्वामित्रोभजन्मुनिः ॥ सहस्रभगतांप्राप्तः शक्रश्चंद्रश्चसंक्षयं ॥ ११ ॥ अह-
ल्यातुशिलादेह मन्येनानामुनीश्वराः ॥ राजर्षयोदेवर्षयश्च महायोगेश्वराअपि ॥ १२ ॥ आरूढयोगाःप्रायेण स्त्रीसंगाच्च्यावितार्ध्रु-
वं ॥ सुशोलाब्राह्मणीपूर्वं तपसाराधयत्धरिं ॥ १३ ॥ बालवैधव्यमापंना पुरुषस्पर्शवर्जिता ॥ म्रियमाणातुसास्पृष्टा पुरुषेःकृपयैव
हि ॥ १४ ॥ तदवस्थापिसाज्ञासी त्पुंसंगादीदृशंसुखं ॥ नानुभूतंमयापूर्वं भूयादितितदैवहि ॥ १५ ॥ मृताविदेहनगरे वेश्याभू-

वि० र० ९५

त्पिंगलाभिधा ॥ नानासत्कर्मनिचयैः सातांलेभेपरांगतिं ॥ १६ ॥ सदसद्वापियत्कर्म नवृथाजायतेध्रुवं ॥ भवत्यभिभवःक्वापि पु- अ० ४७
नःकालेफलत्यपि ॥ १७ ॥ एवंप्रायेणलोकेस्मिन् जिव्होपस्थंचदुर्जयं ॥ रहस्थाकामुकीनारी यावाकावापिलभ्यते ॥ १८ ॥ श-
क्यालंघयितुंप्राय स्ततोवैवर्जयेद्रहः ॥ विरलाःसंतिधीरास्ते काश्चित्धीराश्चयोषितः ॥ १९ ॥ अतःसर्वत्रनोशंका कार्यापुंसिचयो-
षिति ॥ वृथाशंकांप्रकुर्वाणः तावत्पापंलभेतसः ॥ २० ॥ विद्वान्परिहरेत्संगं तथानार्यपिभूरिशः ॥ दैवादुपगतेसंगे नप्रमाद्येद्वि-
विक्तदृक् ॥ क्षणिकस्यसुखस्यार्थे महानर्थंकथंसहेत् ॥ २२ ॥ सर्वथासदसद्विद्वा निहामुत्रचदुःखदं ॥ अस्थिभिर्निर्मितंस्थूणं छा-
दितंलोमचर्मभिः ॥ २३ ॥ मांसरक्तकफस्नायु मलमूत्रैःप्रपूरितं ॥ स्रवच्चनवभिर्द्वारैः रोमद्वारैश्चकोटिभिः ॥ २४ ॥ मलमूत्रकफ-
स्वेद स्तस्मिन्नारीपुमानपि ॥ रमणायमतिंकुर्या त्कथंदुःखफलेभृशं ॥ २५ ॥ वितथःकुसुमचापस्य पौष्पैर्वैरसुसायकैः ॥ सुष्टनेत्रोमु- पौ ~~ष्पै~~ ष्पै
ग्धचेता महानर्थंनपश्यति ॥ २६ ॥ वीरःसएवलोकेस्मिन् धन्योविद्वान्सएवहि ॥ प्रहारैःकामबाणानां नैवमोहंव्रजेतयः ॥ २७ ॥
अर्थानानाविधालोके सुखदुःखादिहेतवः ॥ तत्रकंटकवेधाद्याः केवलंदुःखहेतवः ॥ २८ ॥ भारावतारणाद्याश्च दुःखस्यैवनिवर्तकाः ९५
॥ पुत्रालिंगनमुख्यास्तु केवलंसुखहेतवः ॥ २९ ॥ कटुतिक्तौषधादीनि दुःखहारीणिचांततः ॥ सुखदान्यपिजातुस्यु आदौदुःखक-
राण्यपि ॥ ३० ॥ अपथ्यस्वादुभोज्यादि दुःखदंजायतेततः ॥ आदौसुखकरंतच्च नादरोविदुषांततः ॥ ३१ ॥ परदारपरद्रव्य मु-

९५

खान्यादावपिस्फुटं ॥ प्रायोनसुखदास्यु दुःखदान्येवसर्वदा ॥ ३२ ॥ सुखंनस्वपतेरात्रौ जारश्चोरोपियोभवेत् ॥ यस्मात्कस्मा-
द्यत्रकुत्र भयंतस्यसदैवहि ॥ ३३ ॥ पीड्यमानोहन्यमानः केनचिन्मोच्यतेनसः ॥ भवंतिसादरास्तत्र केचिच्चतमुदासते ॥ ३४ ॥
केचित्सम्यगितिब्रूयुः पापीकेचनदुःखभाक् ॥ जीवन्यःक्रियतेसर्वं मृतोनरकभागपि ॥ ३५ ॥ एवमेवपरद्रोही नेहामुत्रसुखंलभेत्
॥ नलाभःपरवादेन हानिस्तात्कालिकीस्फुटं ॥ ३६ ॥ तत्कथंकुरुतेमूढ परद्रोहापवादनं ॥ कामार्तोवांछतिद्रावं स्वस्त्रीसंगात्सुखं-
लभेत् ॥ ३७ ॥ पुण्यंचलभतेयस्मा त्तस्मात्सश्रेष्ठउच्यते ॥ क्षुधार्तोविष्णुनैवेद्यं स्वादुभुक्त्वासुखंलभेत् ॥ ३८ ॥ पुण्यंचजायतेत--
स्मा त्तथातत्तीर्थपानतः ॥ स्रक्चंदनसुवर्णादि वस्त्रालंकरणानिच ॥ ३९ ॥ भुज्यतेविष्णुशेषंचे तथाविप्रावशेषितं ॥ तन्महाफल
दंलोके परत्रापिमहाफलं ॥ ४० ॥ इहामुत्रसुखंयेन तत्कालंदुःखहारियत् ॥ जैव्होपस्थ्यादिकुर्वीत तदैवप्रायशोबुधः ॥ ४१ ॥
दुःखहानिःसुखावाप्ति द्वयमेकैकमेववा ॥ भवेच्चनभवेत्पापं तादृशींचाचरेद्बुधः ॥ ४२ ॥ शीतवातातपादीनि तत्कालंदुःखदान्य-
पि ॥ पारत्रिकसुखायैव सहंतेधन्यपूरुषाः ॥ ४३ ॥ तत्कालसुखदाःकेचि त्परत्रानर्थहेतवः ॥ जैव्होपस्थ्यादयोन्याया दुर्भोगालो
कनिंदिताः ॥ ४४ ॥ दुष्प्रतिग्रहदुर्भोज्य दुर्वृत्तिपरपीडकाः ॥ वेश्यादिगमनाद्याश्च नाद्रियंतेविवेकिभिः ॥ ४५ ॥ दुःखहानिसुख
प्राप्ति र्यतःप्रायेणजायते ॥ अतइष्टद्वयोपेतः स्त्रीसंगःसर्ववांछितः ॥ ४६ ॥ ततोप्यतितरांश्रेष्ठः क्षुधार्तिशमनाभुजिः ॥ ततोप्यति

तमामाहु स्तृषार्तस्यजलाशनं ॥ ४७ ॥ सर्वेपिविषयालोके दुर्जयाश्चतथापिहि ॥ दुर्जयंत्रयमेतत्स्यात् क्रमादितिविनिर्णयः ॥
४८ ॥ सुखप्राप्तेःप्रियतमा दुःखहानिरिहस्फुटं ॥ अतएवमहानिष्टं दुःखमेवप्रकीर्तितं ॥ ४९ ॥ नहिकंटकादित्यंगो मुहुःशय्याम-
पेक्ष्यते ॥ क्षुधातृषापीडितोवा किंचिदन्यदपेक्षते ॥ ५० ॥ बाधितोमलमूत्राद्यैः किंचिद्वान्यत्समीहते ॥ स्त्रीसंगादित्रयेतस्मा न्या
यमन्याय्यमित्यपि ॥ ५१ ॥ सर्वदाचिंतयानःसं श्चरेत्यन्यतरत्यजेत् ॥ दुःखहानिसुखप्राप्ति रिदमिष्टंस्मृतंद्वयं ॥ ५२ ॥ एताद्विघा
तकंयत्स्या दथवाप्रतिबंधकं ॥ दुःखप्रदंतदप्याहुः तच्चचोरखलादिकं ॥ ५३ ॥ कंटकाद्यावृश्चिकाद्याः केवलंदुःखहेतवः ॥ एवंयो-
निष्टहेतुःस्या त्तस्यैवद्वेषमाचरेत् ॥ ५४ ॥ वृथाद्वेषंनकुर्वीत नासूयेर्ष्यादिकिंचन ॥ तत्रापिचविशेषेण सतांद्वेषंपरित्यजेत् ॥ ५५ ॥
वस्तुतोनिजकर्मैव सुखदुःखादिकारणं ॥ विविक्तमानसस्तस्मा द्दुःखदंयापिनाद्विषेत् ॥ ५६ ॥ पुरासर्पेणसंदष्टं विलोक्यापिमृतंसु
तं ॥ तन्मातातत्रविधवा गौतमीब्राह्मणीसति ॥ ५७ ॥ तंसर्पंहंतुमिछंतं व्याधंसद्योन्यवारयत् ॥ यमःकालश्चतत्रेत्य व्याधमाहुः
स्फुटंतदा ॥ ५८ नसर्पःकारणंमृत्यो नर्कालोथयमोपिवा ॥ नान्यःकश्चिदपिव्याध तत्तत्कर्मैवकारणं ॥ ५९ ॥ कर्मानुसारीफलदः
केवलंजगदीश्वरः ॥ तस्माद्द्वेष्योनचान्योस्ति स्वयमेवात्मनोरिपुः ॥ ६० ॥ अद्भुतंबतलोकेस्मिन् शठाःकुर्वंतितन्मुहुः ॥ दुःखघ्नं-
सुखहेतुंवा नेहामुत्रयदीक्षसे ॥ ६१ ॥ अहोमायाबलंविष्णो र्ययाभ्रांतमिदंजगत् ॥ स्वहितंनविजानाति पश्यन्नपिनपश्यति ॥

96

६२ ॥ दुःखस्यात्यंतिकीहानि नित्यानंदसमुद्भवः ॥ यतःसमोक्षःसश्रेष्ठः पुरुषार्थेषुसर्वशः ॥ ६३ ॥ यत्प्रसादमृतेनस्या त्ससमोक्ष स्तंहरिंसदा ॥ मनसाकर्मणावाचा भजेदन्यंनकर्हिचित् ॥ ६४ ॥ इति श्रीविष्णुरहस्ये पुरुषार्थवर्णनंनाम सप्तचत्वारिंशोध्यायः ४७

॥ श्रीवेदव्यासायनमः ॥ मेधातिथिरुवाच ॥ पुरुषार्थेषुसर्वेषु मोक्षःश्रेष्ठस्त्वयोदितः ॥ कियंतःपुरुषार्थास्ते कथंतेतत्फलंचकिं ॥ १ ॥ एतन्नःसम्यगाख्याहि वयंशुश्रूषवोखिलाः ॥ तत्वज्ञोव्यासशिष्योसि ततस्त्वंपृछयसेमुहुः ॥ २ ॥ सूतउवाच ॥ इष्टत्वात्सर्वजंतूनां प्रार्थ्यमानायतश्चतैः ॥ ततस्तेपुरुषार्थास्यु र्दृष्टादृष्टेष्टहेतवः ॥ ३ ॥ दुःखहानिःसुखप्राप्ति रितीष्टंद्विविधंमतं ॥ धर्मश्चार्थश्चकामश्च मोक्षश्चेतिचतुर्विधः ॥ ४ ॥ पुरुषार्थस्ततोधर्मः त्वनित्योदृष्टसत्फलः ॥ सतपोदानभेदेन द्विविधःपरिकीर्तितः ॥ ५ ॥ देहेंद्रियमनः साध्यं सत्कर्मतपउच्यते ॥ नित्यंनैमित्तिकंकाम्य मितितत्रिविधंमतं ॥ ६ ॥ त्यागात्धनादिनःपात्रे वन्हौहोमादिकादितः ॥ इति तुद्विविधंदानं नानासुफलसाधकं ॥ ७ ॥ पातालेभूतलेव्योम्नि स्वर्गेवादेहयोगतः ॥ नानास्थानस्थितोजीवो भुंक्तेभोगाननेकधा ॥ ८ ॥ देशतःकालतश्चापि चंचलानीहकानिचित् ॥ कालतश्चंचलत्वेपि देशतस्युर्ध्रुवाणितु ॥ ९ ॥ स्थानानिकानिचिल्लोके धर्म-- साध्यानितानितु ॥ इष्टहानिश्चदुःखाप्ति रधर्मफलमीरितं ॥ १० ॥ तदपिप्राप्यतेजीवै भूलोकेनिरयादिषु ॥ निषिदधकरणात्स--

वि०र० स्या द्विहिताकारणादपि ॥ ११ ॥ इत्यधर्मोद्विधाप्रोक्तो दुरदृष्टप्रवर्तकः ॥ अर्थोहित्रिविधःप्रोक्तो धनंविद्यायशस्तथा ॥ १२ ॥ अ०४८
९७ प्रायेणतद्दृष्टफलं कामोप्येवंप्रकीर्तितः ॥ येनार्थेनापिकामेना प्यदृष्टंजायतेफलं ॥ १३ ॥ सधर्मरूपोविज्ञेयो दृष्टंतत्रानुषंगिकं ॥
कालतोदेशतोवापि ध्रुवंस्थानंतुयद्भवेत् ॥ १४ ॥ तन्मोक्षःप्राप्यतेविप्राः सर्वानिष्टनिवृत्तिमत् ॥ इष्टसिद्धिःसदातत्र तद्विष्णोःपर
मंपदं ॥ १५ ॥ लिंगभेदःस्मृतोमोक्षः सद्विधापरिकीर्तितः ॥ नित्येष्टदस्यात्सन्मोक्षो दुर्मोक्षोऽनिष्टदःसदा ॥ १६ ॥ एतत्धामत्रयं-
विष्णोः स्तन्मोक्षस्थानमुच्यते ॥ नित्यमंधंतमोवद्रं दुर्मोक्षस्थानमीरितं ॥ १७ ॥ पुनरावर्ततेनैव जीवोमोक्षंगतःक्वचित् ॥ संसा-
रेकर्मबंधाख्ये सुखदुःखफलप्रदे ॥ १८ ॥ इति श्रीविष्णुरहस्ये पुरुषार्थवर्णनं नामाष्टचत्वारिंशोध्यायः ॥ ४८ ॥ ॥ ७ ॥

॥ श्रीवेदव्यायनमः ॥ कहोळउवाच ॥ ध्रुवाणिदेशतोयानि कालतश्चंचलानितु ॥ किंयंतितानिस्थानानि महाभागवदस्वनः ॥ १ ॥
कालतोदेशतश्चापि चंचलान्यचलानिच ॥ तानिकानीतिनोब्रूहि यतःशुश्रूषवोवयं ॥ २ ॥ सूतउवाच ॥ यावंतस्तारकाव्योम्नि ९७
दृश्यंतेदूरतोखिलाः ॥ तेतुलोकाःपुंण्यसाध्याः सर्वदैवभ्रमंतिहि ॥ ३ ॥ प्रत्येकंतेमहोन्माना दूर्ध्वमूर्ध्वव्यवस्थिताः ॥ कल्पावसा
नपर्यंतं प्रायस्तेषांस्थितिर्भवेत् ॥ ४ ॥ दूरादल्पानिदृश्यंते ऋक्षाणिसुमहांत्यपि ॥ पुण्यमात्रावलंबास्ते लोकावायुभ्रमान्विताः ॥

९७

॥ ५ ॥ यदापुंण्यक्षयेयोस्य जायतेसततदैवहि ॥ पतत्यधस्ताद्राद्रौतु शकलीभूयदृश्यते ॥ ६ ॥ शकलेशकलेजीवा अनेकेयेऽव्यव--
स्थिताः ॥ स्थानेस्थानेतुतेसर्वे पतंत्यप्सुतृणादिषु ॥ ७ ॥ फलेष्वोषधिधान्यादौ ततःपित्रादिषुक्रमात् ॥ स्वस्वकर्मवशात्स्वान्न पा-
नादिद्वारतोखिलाः ॥ ८ ॥ प्रविष्टाउदरेमातुः प्रायस्तेसद्गुणानराः ॥ जायंतेभूमिलोकेस्मिन् स्वकर्मफलभोगिनः ॥ ९ ॥ एतन्मंड-
लमर्कस्य महामानंप्रकीर्तितं ॥ अत्रसिंव्हासनेदिव्ये पद्मसंस्थोदिवाकरः ॥ १० ॥ उपास्यतेदेवगणैः पुण्यवद्भिस्तथानरैः ॥ सित्ध
गंधर्वविद्याध्रा नानाकौतुककारिणः ॥ ११ ॥ प्रासादोद्यानवापीभि र्हिरण्यमणिमूर्तिभिः ॥ अट्टाट्टालकरथ्याभिः कुट्टिमैःकृतमूर्ति
भिः ॥ १२ ॥ भ्राजमानंपुण्यवद्भि र्नरैःसम्यगधिष्ठितं ॥ केचित्क्रीडंतिगायंति भक्षंतिचहसंतिच ॥ १३ ॥ भुंजानाविविधान्भोगा
न्पुण्यकर्मभिरार्जितान् ॥ पुंण्यानुसारिफलभुक् पुण्यक्षयोगात्पतत्यधः ॥ १४ ॥ तादृशंमंडलंभास्व द्भास्करस्यमहात्मनः ॥ रथारू
ढंभ्रमत्येत दनिशंकेशवाज्ञया ॥ १५ ॥ यथानाविसमारूढा लोकक्रीडांनिजेच्छया ॥ नवेत्तिगमनंकिंचित् मंडलस्थस्तथाजनः ॥
१६ ॥ रविग्रहेकुरुक्षेत्रे येमहादानकारिणः ॥ येचस्वस्वामिकार्येषु गवार्थेविप्रकारणे ॥ १७ ॥ देहंत्यजंतियानार्यः पतिनासहयां--
तिवा ॥ अश्वदाश्चाग्निशुश्रूषा निरतायेचजंतवः ॥ १८ ॥ उपासकाश्चगायत्र्या वेदाध्यायरताश्चये ॥ संक्रांतौदानकर्तारः इत्याद्याः
पुण्यभागिनः ॥ १९ ॥ तेजोमयशरीरास्ते यथापुण्यफलंजनाः ॥ देशकालनियत्याते भोगवंतःक्रमेणच ॥ २० ॥ सूर्यलोकेवसं--

वि०र० ९८

त्येते भुक्तपुण्यापतत्यधः ॥ कर्मशेषास्ततोनाना देहगाःकर्मकारिणः ॥ २१ ॥ गतिंकर्मानुसारेण पुनरेवप्रभुंजते ॥ एवंचंद्रस्यसो
मस्य बुधभार्गवयोरपि ॥ २२ ॥ गुरोःशनैश्चरऋक्षाणां तारकारूपमंडले ॥ बहुयोजनविस्तीर्णे नानाभोगसमन्विते ॥ २३ ॥ ना-
नापुंण्यफलामर्त्या मोदंतेतत्रसंस्थिताः ॥ अन्नदानरतायेस्यु रुपकाररताश्चये ॥ २४ ॥ श्राद्धभक्ताश्चगोदाना ज्जलदाश्चापियेज
नाः ॥ शास्त्रमीमांसिकासक्ताः कवयोयुद्धकौशलाः ॥ २५ ॥ नानाधातुप्रदातार सद्वैद्यागणकाश्चये ॥ पतिशुश्रूषिकानार्यो देवगो
विप्रपूजकाः ॥ २६ ॥ कुटुंबपोषकायाश्च ताश्चैतल्लोकगास्मृताः ॥ विवेककर्मणाकेन गतयश्चाप्यनेकधा ॥ २७ शक्यंतेकिमुवक्तु-
ताः कोनामपुरुषोर्हति ॥ एकोहरिर्विजानाति तदाज्ञानियतोयमः ॥ २८ ॥ प्रायेणैवविजानाति तथानान्येविजानते ॥ देशतःसु
स्थिरालोकाः कालतश्चंचलाःपुनः ॥ २९ ॥ भूलोकात्सप्तलोकास्तु यावत्तावत्प्रकीर्तिताः ॥ पातालानिचसप्तानि भूलोकविवरत्व-
तः ॥ ३० ॥ भूलोकएवतत्रापि व्रजंतेपुंण्यकर्मणा ॥ नानाभोगाश्चतत्रापि मणिकुट्टिमभूमयः ॥ ३१ ॥ महारत्नप्रदीपाश्च सुंद--
र्यःसुंदरानराः ॥ रथाअश्वागजागावो नानोद्यानानिदीर्घिकाः ॥ ३२ ॥ स्वकर्मनिरतायेतु दातारश्चोपकारिणः ॥ पापभीताश्चयेम--
र्त्या स्तएतेषुव्रजंतिहि ॥ ३३ ॥ कीर्तनश्रवणादीनि योविष्णोःकुर्वतेनरः ॥ प्रायेणकामबद्धास्ते वैकुंठादिषुसंस्थिताः ॥ ३४ ॥
अमुक्तस्थानगानाना भोगापुण्यवशादिमे ॥ कर्मशेषात्पुनर्भूमौ जनित्वापुनरेवहि ॥ ३५ ॥ श्रवणादिमहाविष्णोः कुर्वाणाःक्षीण-

अ० ४९ ९८

९८

वासनाः ॥ जातापरोक्षाःकृष्णस्य यांतितेपरमंपदं ॥ ३६ ॥ कालतोदेशतोवापि चंचलत्वंनतस्यहि ॥ तत्रगत्वानिवृत्तिर्नो जाय-
तेसंसृतौपुनः ॥ ३७ ॥ इच्छामात्रेणतेभोगान् भुंजानाःसर्वदैवहि ॥ सुखधारान्वितजीवा स्तेमुक्ताइतिकीर्तिताः ॥ ३८ ॥ अनि-
त्यानरकायेतु पातालादधरस्थिताः ॥ तत्रपापिजनानाना दुःखभोगिनएवहि ॥ ३९ ॥ परदाररतायेच परद्रव्यापहारिणः ॥ प-
रापवादनिरताः शक्त्यादानविवर्जिताः ॥ ४० ॥ वंचकाश्चापिलुब्धाश्च स्वकर्मत्यागिनश्चये ॥ निषिद्धस्यचकर्तारो देवब्राह्मणनिंद
काः ॥ ४१ ॥ आतिथ्यद्वेषिणोयेच क्रूराहिंसापरायणाः ॥ वृथामांसभुजोयेतु वृथास्वादुभुजोपिये ॥ ४२ ॥ मातापितृगुरूणांच पू-
ज्यानांचावमानकाः ॥ स्त्रीबालत्यागिनोयेच वृथातद्द्रोहिणोपिये ॥ ४३ ॥ पर्वकालावमंतारः तीर्थानांचावमानकाः ॥ अपकारर-
तायेच कन्याविक्रयजीविनः ॥ ४४ ॥ निंद्यवृत्तिरतायेच पिशुनावेदविक्रियाः ॥ सोमविक्रयिणोयेच केवलंभोगलालसाः ॥४५॥
नास्तिकाःपतितामूढा वेदविश्वासवर्जिताः ॥ विशृंखलाश्चपाखंडा जिह्वोपस्थ्यपरायणाः ॥ ४६ ॥ अधिकारश्चशक्तिश्च सद्भा-
वेपिहियेनराः ॥ नकुर्वतेसुकर्माणि ज्ञानेयत्नंनकुर्वते ॥ ४७ ॥ पतिनिंदापरानार्यः कुटुंबस्यापिवंचकाः ॥ पुंश्चल्यःक्रूरकर्मण्यो
विप्राणामवमानकाः ॥ ४८ ॥ अतिथिद्वेषनिरता जिव्होपस्थपरायणाः ॥ एवंनानाविधानार्यः पुमांसोवापिपापकाः ॥ ४९ ॥ अ-
नित्येनिरयेविप्राः दुर्भोगानेवभुंजते ॥ कर्मशेषास्ततोभूमौ स्थावरादिक्रमेणच ॥ ५० ॥ प्राप्यजंगमतांभूयः स्वकर्मगतिभागिनः॥

श्रवणेकीर्तनादोच महाविष्णोश्चयेजनाः ॥ ५१ ॥ द्वेषिणोनिंदकावाये प्युदासावेदनिंदकाः ॥ विष्णुवैष्णवविद्वेषाः स्वधर्मनिर-
ताअपि ॥ ५२ ॥ पुण्यानामपिकर्तारो येपिस्युर्ज्ञानिमानिनः ॥ किंचित्कालंतेपिपुण्य लोकेस्थित्वापतंत्यधः ॥ ५३ ॥ भूमौतेक
र्मशेषेण भूत्वापिपुनरेवहि ॥ विष्णुवैष्णवविद्वेषा त्पूर्णस्वगतिसाधनाः ॥ ५४ ॥ यांत्येवतत्तमोघोरं नावर्ततेततःपुनः ॥ कालतो
देशतश्चापि सनित्योलोकउच्यते ॥ ५५ ॥ अतस्तथानकर्तव्यं सर्वथास्वहितेप्सुना ॥ येनस्यात्तादृशेघोरे वव्रांतंनरकेपुनः ॥५६॥
अंधेतमस्यवस्थानं पंचकष्टेसदैवहि ॥ महापापानिकुर्वाणा कुर्वाणाश्चोपपातकं ॥ ५७ ॥ नानाविधान्यनेकानि पापकर्माणिमान
वाः ॥ कुर्वाणानिरयान्प्राप्य निवृत्तिंयांतिकालतः ॥ ५८ ॥ प्रद्वेषेणमहाविष्णो स्तद्भक्तानांचसर्वथा ॥ सदागमानांविद्वेषात्तमएव
गतिस्मृता ॥ ५९ ॥ यतःकदापिकालेन नानायत्नैरपिध्रुवं ॥ कथंचिदपिनैवस्या न्निर्गतिस्तमसस्ततः ॥ सुखलेशःसुखोवायु सुखो
गंधोपियत्रन ॥ ६० ॥ क्षणमात्रमपिप्राप्यः केवलंदुःखभोजनं ॥ तादृशस्तमसोभीत्या नकुर्यात्कर्मतादृशं ॥ ६१ ॥ इदंरहस्यंप-
रमं महाविष्णोर्मयेरितं ॥ श्रवणात्कीर्तनादस्य महायज्ञफलंलभेत् ॥ ६२ ॥ इति श्रीविष्णुरहस्ये नानालोकवर्णनंनाम एकोन-
पंचाशत्तमोध्यायः ॥ ४९ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

११ ॥ श्रीवेदव्यासायनमः ॥ शाकल्यउवाच ॥ केचिद्भक्त्याहरेर्मुक्तिं यांतितद्द्विषिणस्तमः ॥ परावृत्तिस्ततोनैवे त्युक्तंवेदार्थसंमतं ॥१॥
रसौषधिसमायोगा द्यातिलोहानिहेमतां ॥ तथैवभगवत्स्मृत्या जीवाश्चैतन्यमाप्नुयुः ॥ २ ॥ अजामिलोमहापापो दुराचारोपिभू
रिशः ॥ कीर्तनादेवकृष्णस्य परंपदमवाप्तवान् ॥ ३ ॥ हरिर्हरतिपापानि दुष्टचित्तैरपिस्मृतः ॥ अनिच्छयापिसंस्पृष्टो दहत्येवहिपा-
वकः ॥ ४ ॥ द्वेषिणोपिहरेर्मुक्तिं चैद्यपौंड्रसृगालकाः ॥ कंससाल्वादयोन्येपि गताइतिहिनश्रुतं ॥ ५ ॥ द्वेषेणापिहरेरूपं ध्यायंतो- नः श्रुतं
नामकोर्तकाः ॥ प्राप्तापरोक्षंप्रापुस्ते येहताहरिणास्वयं ॥ ६ ॥ सांकेत्यंपारिहास्यंच स्तोभंहेलनमेववा ॥ वैकुंठनामग्रहण मशेषाघ
हरंविदुः ॥ ७ ॥ पतितस्खलितोभग्न संदष्टस्तप्तआहृतः ॥ हरिरित्येववयेनाह पुमान्नार्हतियातनां ॥ ८ ॥ प्रसंगादपियोब्रूया त्धारि
रित्यक्षरद्वयं ॥ नतस्ययातनालेशो महापापशतैरपि ॥ ९ ॥ जलभ्रांत्यापियत्पीतं क्षीरंतत्तर्पकंभवेत् ॥ स्वादुतापिनगच्छेत तथै
वहरिसंस्मृतिः ॥ १० ॥ नाम्नोस्तियावतीशक्तिः पापनिर्हरणेहरेः ॥ तावत्कर्तुंनशक्नोति पातकंपातकीजनः ॥ ११ ॥ परिवर्तनिसंसा
रे कदाकस्यापिदेहिनः ॥ अवश्यंतुघटेतैव कथंचिद्धरिसंस्मृतिः ॥ १२ ॥ तत्कथंस्यात्तमःप्राप्ति र्द्वेषेणापिहरेरिह ॥ एवंनुसंशय- न्नः
च्छिंधि व्यासशिष्योमहामते ॥ १३ ॥ प्रायेणैवरहस्यानि व्यासस्त्वामुक्तवान्हरिः ॥ अतःप्रश्नोत्तरंब्रूहि यदिजानासिसूतज ॥
१४ ॥ सूतउवाच ॥ सत्यमेवोदितंब्रह्मन् लोहंयातिसुवर्णतां ॥ केनाप्युपायेनाथापि खर्परंहेमनोभवेत् ॥१५॥ तथायःसत्स्वभाव-

१८७

त्रि० र० स्या त्सएवहरिकीर्तनात् ॥ उत्तमांगतिमाप्नोति नान्यइत्येवनिश्चयः ॥ १६ ॥ अग्निर्दहतिकाष्ठानि नादाह्यंदहतिक्वाचित् ॥ तथा अ० ५०
१०० स्वभावभक्तानां दोषान्मलिनचेतसां ॥ १७ ॥ हरिनामदहेत्पापं दाह्यमेवहियद्भवेत् ॥ सर्वपापक्षयेमुक्तौ नाकिंचित्प्रतिबंधकं ॥१८॥
प्रासंगिकादपिहरे र्नामसंकीर्तनाद्यदि ॥ सर्वपापंविनश्येत तर्हिस्यान्नपुनर्जनि ॥ १९ ॥ नैवेत्थंदृश्यतेलोके तस्मादेवंविनिर्णयः ॥
सर्वथाघहरंविष्णो र्नामतद्भक्तिपूर्वकं ॥ २० ॥ अभक्तोदात्हृतंनैव फलदातृभवेत्क्वाचित् ॥ यदिजागर्तिचित्तेस्या द्भक्तिस्तर्ह्येवदेहि
नः ॥ २१ ॥ संकेतपरिहासादेः कीर्तनात्पापसंक्षयः ॥ अजामिलादयोन्येपि प्रायोयेपापकार्मिणः ॥ २२ ॥ स्वभावैनैवतेभक्ताः
प्रारब्धाद्दुष्टचेतसः ॥ अंतर्भक्त्यैवतंनाम जगृहुर्नान्यथाक्वचित् ॥ २३ ॥ तर्ह्येवतेगतामुक्तिं नसाभक्त्याविनाप्यते ॥ चैद्यसाल्वाद-
योदैत्या अन्येपिबहवःपुरा ॥ २४ ॥ स्वभावभक्ताःश्रोशस्य दुष्टाविष्टाद्विषत्यमुं ॥ भूतग्रहपिशाचाद्यै राविष्टस्यतुकस्यचित् ॥२५॥
दुरुक्तादेर्नचोद्वेग स्तदीयानांप्रजायते ॥ किंतुयेनप्रविष्टःस तमेवद्विषतेजनाः ॥ २६ ॥ तस्यापसारबंधादौ क्लेशनादीयतंतिवा ॥
तथायेनसमाविष्टो हरिद्वेषंकरोत्ययं ॥ २७ ॥ तमेवपातयत्यंधे तमसिद्वेषिणंहरिः ॥ भक्तंतुतारयत्येव तद्भक्तोनप्रणश्यति ॥२८॥ १००
जन्मजन्मांतराभ्यासा त्साधितंयेनयद्यथा ॥ तत्तथैवहिसंवर्धे न्मुक्तौतमसिवाक्षिपेत् ॥ २९ ॥ द्वेषिणोपियदामुक्ति स्तर्हिभक्तिंक-
रोतिकः ॥ रमाब्रह्मादयःकिंनु मूढास्तद्भक्तिकारिणः ॥ ३० ॥ तमेवंविद्वानमृतो यमेवैषवृणुतेतितिसः ॥ मोक्षभागीतिवाक्श्रौती क

100

थंलोकानुपादिशेत् ॥ ३१ ॥ वैराग्येणतदाकिंस्या त्किंवास्याच्चसमादिभिः ॥ किंयोगैश्चापिकिंदाने यज्ञैःकृच्छ्रादिभिश्चकिं ॥ ३२ ॥
हिरंण्यकशिपुर्द्वेषा द्यदिविष्णुपदंव्रजेत् ॥ प्रल्हादःस्तत्सुतःकस्मा त्धरिभक्तिंदृढांचरेत् ॥ ३३ ॥ ज्वरितोयःपिबेत्क्षीरं भ्रांत्यावाप्र-
मयाथवा ॥ तिक्तमेवभवेत्तच्च ज्वरंचापिविवर्धयेत् ॥ ३४ ॥ तथास्वभावदुष्टेन हरिर्ध्यातंस्मृतोपिवा ॥ सर्वथापकरोत्येव तदर्थंहि-
यतस्ततः ॥ ३५ ॥ अन्यथाकस्तमोयाया द्यदनारंभणःश्रुतौ ॥ अनंतंवव्रमियुक्तं नपरावर्ततेयतः ॥ ३६ ॥ रहस्यमित्थंज्ञात्वैव प्रि इत्युक्तं
यव्रतमुखान्नृपाः ॥ तस्यभक्त्यैवपरमं याताःपदमलौकिकं ॥ ३७ ॥ त्यक्तवान्रावणंभ्राता जेष्ठंबंधुंविभीषणः ॥ सर्वस्वमर्पयद्भक्त्या
वामनायबलिःपुरा ॥ ३८ ॥ पतिपुत्रगृहादीनि त्यक्त्वागोप्योपितंययुः ॥ पूर्वराजाविदेहाख्य स्त्यक्तकामोहरिंव्रजत् ॥ ३९ ॥ राज
र्षिदेवर्षिमुख्याःसमस्ता ब्रह्मर्षयश्चापिसमाधियोगैः ॥ त्यक्ताशनास्त्यक्तशरीरभावाः सर्वात्मनातंशरणंप्रपंनाः ॥४०॥ द्वेषेणमुक्ति-
र्यदिकस्यचित्स्या त्तर्ह्यत्रलोकेपिपरस्यतापात् ॥ संतोषतोलब्धफलास्युरेव नैनंतथातद्विषतोहिमोक्षः ॥ ४१ ॥ द्रष्टव्यःसर्वथैवा--
त्मा तमेवैकंचजानथ ॥ नान्यवार्ताःकुरुध्वंच श्रोतव्यःप्रथमंहिसः ॥ ४२ ॥ मंतव्यश्चिंतनीयश्च प्रीतःसाक्षाद्भवेत्धरिः ॥ प्रसादेनै
वतस्यैव मोक्षस्यान्नैतदन्यथा ॥ ४३ ॥ श्रुतिराहेत्थमाश्वासा त्तस्माद्भक्त्यैवमोचनं ॥ विनाभक्त्याप्रसादेन मुक्तिस्यात्तंविनानंहि ॥ मोक्षस्यात् नैतदन्यथ
॥ ४४ ॥ अतोद्वेषेणमुक्तिःस्या त्किंतुस्यात्तुतमास्थितिः ॥ रहस्यंपरमंएत द्विष्णोरमिततेजसः ॥ ४५ ॥ यथाश्रुतंभगवतो व्यासादु

क्तंभवत्सुतत् ॥ श्रवणात्पठनादस्य चिंतनादपिमानवः ॥ प्राप्नोतिपरमांभक्तिं विष्णोरमिततेजसः ॥ ४६ ॥ इति श्रीविष्णुरहस्ये भक्तिद्वेषविभागोनाम पंचाशत्तमोध्यायः ॥ ५० ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीवेदव्यासायनमः ॥ विरजाउवाच ॥ कामोद्रेकःक्षुदातृष्णा नदोषाविषयेसति ॥ गुणाएवततोमोक्षे तत्स्थितिर्नविरुध्यते ॥१॥ रसायनैःसुयत्नेन धनिनोभोगलिप्सवः ॥ कामोद्रेकक्षुधादीनि वर्धयंत्यपिभूरिशः ॥ २ ॥ दुःखदत्वंकथंतेषां तन्निवृत्त्यैचयत्यते ॥ कथंनुदोषतातेषां याथातथ्येनतद्वद ॥ ३ ॥ सूतउवाच ॥ महासुखस्यवृध्यर्थं विशेषाद्बुधिवृत्तये ॥ किंचिदुःखंचसुखव द्वांछंतेसुमनीषिभिः ॥ ४ ॥ स्वेछयैवप्रजायंते मोक्षेकामक्षुधादयः ॥ अतस्तुसुखवत्तेपि स्वेष्टाएवततोगुणाः ॥ ५ ॥ सुखार्थमिष्यतेयत्तत् कथंदुःखत्वमर्हति ॥ एकमेवेंद्रियंयद्वन्ना नावस्तुसमाजतः ॥ ६ ॥ सुखदंदुःखदंतद्व द्विज्ञेयंतृट्क्षुधादिकं ॥ बुभुक्षैवक्षुधानाम पिपासैवतृषाभवेत् ॥ ७ ॥ प्रवृत्तौकारणंवांछा सुखदुःखंततःपरं ॥ इष्टलाभात्सुखोत्पत्ति रनिष्टाद्दुःखसंततिः ॥ ८ ॥ यत्किंचिल्लभ्यतेदैवा दकस्माद्प्यवांछितं ॥ तद्भोगइच्छयैवस्या दन्यथानसुखंभवेत् ॥ ९ ॥ अनिच्छतोतियोभोगः सुगंधादेर्यथाभवेत् ॥ सोप्यनिष्टविरुत्थश्चे न्नहैवसुखदायकः ॥ १० ॥ तस्मादावश्यकत्वेन तदेतत्सर्वमिष्यते ॥ अनिच्छयापिजायंते कामाद्याःसंसृतौयतः ॥

101

॥ ११ ॥ दोषास्तेविषयाभावे विषयोपनतौगुणाः ॥ स्वर्गेयद्यपिजायंते सर्वेर्थावांछयासमं ॥ १२ ॥ तथाप्यसूयादोषेण क्षयिष्णु-
त्वादतृप्तितः ॥ स्वल्पत्वादपिमोक्षेण कथंस्वर्गःसमोभवेत् ॥ १३ ॥ अतःस्वर्गस्यमुक्तेस्या दंतरंमहदंतरं ॥ विचक्षाणानवांछंति त-
स्मात्स्वर्गादिकिंचन ॥ १४ ॥ मोक्षमेवाभिवांछंति यत्रकालभयंनहि ॥ नचासूयादयोदोषा तृप्तिःस्वानंदपूरणात् ॥ १५ ॥ कलशी-
मणिकादीनि कमंडुलमुखान्यपि ॥ महन्महतराणिस्यु स्तोकस्तोकतराणिच ॥ १६ ॥ यथावकाशंनद्यादौ पूर्यंतेतद्वदेवहि ॥ स्वा-
नंदपूर्णासर्वेपि नैवासूयंतिकर्हिचित् ॥ १७ ॥ दृश्यंतेकतिचिल्लोके संतुष्टास्वामिदर्शनात् ॥ केचित्सहासनादेश्च प्रीतिवादैस्तथा-
परे ॥ १८ ॥ केचित्संनिधिमापंना स्तृप्यंतेदूरतोपरे ॥ मोक्षेप्येवंविधाजीवा स्वयोग्यादेवतोषिणः ॥ १९ ॥ संसारेसुखदुःखादे रु-
त्पत्तिःकारणंयथा ॥ अभिव्यक्तिस्तथामुक्तौ सुखादेःकारणंभवेत् ॥ २० ॥ नित्यानंदेप्यतस्तत्र फलपुष्पाद्यपेक्षते ॥ नानाभिव्यंज
कैर्योगा त्कालेकालेचसर्वदा ॥ २१ ॥ संततासुखधारैव नान्यत्स्यादंतराक्वचित् ॥ दग्धानांकाष्ठभाराणां किंचिद्भस्मान्नशिष्यते
॥ २२ ॥ अमुत्रतुमलंस्वल्पं नकिंचिदपिशिष्यते ॥ अतस्तेविमलालोका मलस्रावविवर्जिताः ॥ २३ ॥ तत्रस्थाश्चेतनाःसर्वे तेज
साइवराशयः ॥ निद्रालस्यप्रमादाद्यै र्दोषैर्नानाविधैःसदा ॥ २४ ॥ उज्झिताज्ञानसंपंना रममाणानिजेच्छया ॥ स्वैरंस्थानेषुतेवि
ष्णो र्वैकुंठादिषुसर्वदा ॥ २५ ॥ अनंतकालंमोदंते नावर्ततेकथंचन ॥ येपठंतिसदाभक्त्या विष्णुलोकेमहीयते ॥ २६ ॥ इति श्री

विष्णुरहस्ये मुक्तावस्थावर्णनंनाम एकपंचाशत्तमोध्यायः ॥ ५१ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीवेदव्यासायनमः ॥ भागुरिरुवाच ॥ तप्यमानास्त्रिधातापैः सर्वेजीवगणाःसदा ॥ परमेष्टतमंकेन मन्यंतेविष्णुमेवहि ॥ १ ॥
केचिन्नमोक्षंवांछंति कर्मबंधान्मुमुक्षवः ॥ विष्णुरेवहिमोक्षस्य मुख्यदातेतिगीयते ॥ २ ॥ अन्येतदाज्ञयाकिंचि त्तथादेवोत्तमाइति
॥ आवश्यकःप्रसादोस्य समुपास्यतमोहिसः ॥ ३ ॥ तत्कथंसउपास्यस्या त्तंनआख्याहिविस्तरात् ॥ सूतउवाच ॥ एवमेवपुराप्ट
ष्टो नारदेनमहर्षिणा ॥ ४ ॥ हिरण्यगर्भस्तद्वक्ष्ये यच्छुकाच्छुतवानहं ॥ कदाचित्सत्यलोकस्थं ब्रह्माणंनारदोब्रवीत् ॥ ५ ॥ नारद-
उवाच ॥ देवदेवकथंब्रह्मन् सर्वलोकपितामह ॥ संसारदुःखसंतप्तै मुक्तिमात्रफलेप्सुभिः ॥ ६ ॥ आराधनीयःसर्वात्मा सविष्णु-
र्मोक्षदःसतां ॥ तन्मेशृण्वतआख्याहि लोकानांचहितायवै ॥ ७ ॥ ब्रह्मोवाच ॥ मनसाकर्मणावाचा तथासर्वेंद्रियैरपि ॥ आराध-
नीयःसर्वेशो लब्धेनापिधनादिना ॥ ८ ॥ सर्वेषामिंद्रियाणांहि श्रोत्रंश्रेष्टतमंस्मृतं ॥ सर्वज्ञोजायतेयेन शृण्वानःसत्कथांसतां ॥
९ ॥ वर्णयंतिमहाविष्णो र्महिमानंभृशावृताः ॥ अथवातस्यभक्तानां तेसंतोन्येन्यथैवहि ॥ १० ॥ वागिंद्रियंमनुष्याणां श्रोत्र-
स्यपरमःसखा ॥ परस्परोपकारित्वा त्परमंसख्यमेतयोः ॥ ११ ॥ यानींद्रियाणिचान्यानि ज्ञानकर्मकराणिच ॥ उपांगानिशरीर

स्य मिथःसख्यंप्रकुर्वते ॥ १२ ॥ सर्वैषामपिचैतेषां मनःश्रेष्ठतमंमहत् ॥ तदानुकूल्यादेतानि स्वस्वकार्यकराणिहि ॥ १३ ॥ बा
ह्यांतरविभेदेन द्विधाराधनमीशितुः ॥ आंतरंमनसानिष्ठा सदासर्वैश्वरेतुया ॥ १४ ॥ विवेकोहिमनोधीन स्ततोनेनविचिंतयेत् ॥
पितरंमातरंवापि यंवाकंवागुरुंनरः ॥ १५ ॥ हुंकृत्यैवभवेत्पापी पापंकुर्वन्पतत्यधः ॥ तानेवप्राणनिर्मुक्ता न्वन्हौसम्यग्दहंनपि ॥
१६ ॥ नद्रोहीनैवपापीया न्पुण्यवानेवजायते ॥ ततःप्राणोहिसर्वैषां पितामातासुत्हृद्गुरुः ॥ १७ ॥ स्त्रीपुत्राद्याखिलंप्राणो नान्य-
दित्येवचिंतयेत् ॥ मुख्यप्राणोहिभगवान् सूत्रवायुस्तथापरः ॥ १८ ॥ पादांगुष्ठस्थितोयेषां जीवास्तिष्ठंतिसर्वदा ॥ लब्धंकर्मवशा
द्देहं यदात्याजयितुंहरिः ॥ १९ ॥ समीयतेतदायाति स्वयमेवबहिःपुरः ॥ पादांगुष्ठस्थितोज्ञानी वायुस्तात्विकदैवतैः ॥ २० ॥
जीवमादाययात्येव क्षणमात्रंनतिष्ठति ॥ देहेतिष्ठन्नपिहरिः सर्वधीप्रेरकःसदा ॥ २१ ॥ पूर्वकर्मानुसारेण फलंभोजयनेधुना ॥ भ
विष्यत्फलभोगार्थ मिदानींकारयत्यपि ॥ २२ ॥ तदिच्छावशतःक्कापि स्वेष्टंसुखमवाप्नुयात् ॥ सुखार्थंयतमानोपि कर्हिचिद्दुःख--
मिच्छति ॥ २३ ॥ कृतोमयावृथायत्न स्तदेत्थंचिंतयेदयं ॥ नहिमूढोविजानाति तादृग्यत्नस्यतत्फलं ॥ २४ ॥ व्रजन्नेवधनाद्य-
र्थं गर्तपातादिकंलभेत् तदेवगतियत्नस्य फलमीश्वरभावितं ॥ २५ ॥ नह्ययंसत्यसंकल्पो येनयत्नात्सुखंसदा ॥ भुंजीतक्कापिनो-
दुःखं तस्मादीश्वरयंत्रितः ॥ २६ ॥ सएकःसत्यसंकल्पो दुर्ज्ञेयगतिरीश्वरः ॥ अनाद्यनंतकालंहि सएकोजीवनायकः ॥ २७ ॥ मु

वि० र० १०३

ख्यसौहार्द्रमस्यैव संपाद्यंसर्वदैवतत् ॥ अनाद्यनंतकालंहि येनसाकंसदास्थितिः ॥ २८ ॥ नास्तिमृत्युभयंयस्य नास्तिसंपद्वियो- अ० ५२
जनं ॥ नप्रेमभंगोयस्मात्स्या न्निर्दयत्वादिकंतथा ॥ २९ ॥ नैवावसानवार्तास्ति निषेव्यश्चेतसैवसः ॥ पित्रादिषुप्रवेश्यैव यःसृज-
त्यखिलंजगत् ॥ ३० ॥ मात्रादौप्रविशन्नेव पालयत्यपिसर्वशः ॥ तथैवसंहरत्येत त्सैनिकादिषुसंस्थितः ॥ ३१ ॥ गुर्वादिषुप्रवि
श्यापि सएवार्थप्रकाशकः ॥ दातानियंतासर्वेषां नृपादिषुसुसंस्थितः ॥ ३२ ॥ बंधकोभवपाशेन भवपाशाच्चमोचकः ॥ कैवल्यदः
सएवैको योविष्णुरितिगीयते ॥ ३३ ॥ यस्यसख्येसुसंपंने सखायंसर्वएवहि ॥ यस्मिन्रुष्टेखिलारुष्टा भृत्यभार्यासुतादयः ॥
३४ ॥ सएवसकलश्रेष्ठ प्रेष्ठंप्रेष्ठतमादपि ॥ समेभूयात्समेभूया त्समेभूयात्सदैवहि ॥ ३५ ॥ इत्थंदृढोमनोभाव स्तदाराधनमांत
रं ॥ दुःखलाभेपिमन्येत हरिणाल्पंकृतंत्विति ॥ ३६ ॥ महत्पापफलंयन्मे दययातद्दयालुना ॥ इत्थंभावयमानस्य सखाविष्णु-
र्भवेत्सदा ॥ ३७ ॥ दद्यादिष्टानिभूरीणि यानिनक्षयमाप्नुयुः ॥ अहन्यहनिधृष्टोय मीश्वराज्ञांविलंघयन् ॥ ३८ ॥ नैवालंमनुतेमू-
ढो दुःखेस्वल्पेप्यलंवदः ॥ मृषैवपाहिपाहीति बहिश्चित्तोवदंनपि ॥ ३९ ॥ नकरोतिहितंस्वस्य शुनःपुच्छमिवानृजुः ॥ भुंजानःपाप १०३
कर्माणि दारिद्र्यादीन्यनेकशः ॥ ४० ॥ पुनःपुनःकरोत्येव पापकर्माणिभूरिशः ॥ निर्लज्जायातिधृष्टाय सदसच्चाविजानते ॥ ४१ ॥
बाधनंजलरेखाव द्व्यर्थतामेवगच्छति ॥ बाह्यमाराधनंद्वेधा शरीरेणधनादिना ॥ ४२ ॥ मनोयोगश्चतत्रापि विशेषफलदोभवेत् ॥

नित्यंनैमित्तिकंकर्म यथाजातियथाश्रमं ॥ ४३ ॥ कृत्वासमर्पयेद्विष्णौ मुख्यंशारीरमेवयत् ॥ धारणंतप्तचक्रादे र्मृदाचापितदंकनं
॥ ४४ ॥ जापनंविष्णुमंत्राणां पूजातत्प्रतिमादिषु ॥ महिमाश्रवणंविष्णो र्वाचातद्गुणवर्णनं ॥ ४५ ॥ यात्राप्रदक्षिणंपद्भ्यां
कराभ्यांपरिचारणं ॥ नेत्राभ्यांवीक्षणंतस्य साष्टांगनमनानिच ॥ ४६ ॥ तत्पादतुलसीपुष्प कस्तूरीचंदनादिनां आघ्राणंस्पर्शनं-
मूर्ते श्चलाचलविभेदतः ॥ ४७ ॥ निर्वाहार्थंशरीरस्य तन्निवेदितभोजनं ॥ उत्सर्गन्मिलमूत्रादे श्चित्तस्वास्थ्यंयतोभवेत् ॥ ४८ ॥
अतःपायरुपस्थंच तदाराधनसाधनं ॥ शारीराराधनंविष्णो र्जानीह्येतन्महामते ॥ ४९ ॥ दानंविप्रैर्नलेहोमो धनेनाराधनंद्विधा ॥
विप्रोग्निर्वदनंविष्णो स्तत्तोषात्तस्यतोषणं ॥ ५० ॥ पितरोदेवताश्चाग्नि विप्रेभ्यस्तोषमाप्नुयुः ॥ विप्रःस्याधःशरीरेतु वसंतिपित-
रोखिलाः ॥ ५१ ॥ नाभेरूर्ध्वंतुतिष्ठंति देवताःसर्वएवहि ॥ सर्वदेहमभिव्याप्य वसतिश्रीधरोहरिः ॥ ५२ ॥ कुर्वीतसततंतस्मा
द्धरिभावनयाखिलैः ॥ देवतापितृतुष्ट्यर्थं ब्राह्मणानांप्रतोषणं ॥ ५३ ॥ यद्यदिष्टतमंस्वस्य धनवस्त्रगृहादिकं ॥ रथभूमिगजाश्वा-
दि तेभ्योदेयंहितेप्सुना ॥ ५४ ॥ सदासर्वत्रसर्वस्मै दानेवृद्धिशतोत्तरा ॥ देशकालानुसारेण तथापात्रविशेषतः ॥ ५५ ॥ सह-
स्त्रायुतलक्षाणि कोट्यर्बुदपरार्धकं ॥ अनंतमपिजायेत पुण्यकर्मतथेतरत् ॥ ५६ ॥ सर्वेषांदेवतादीना मग्निर्दूतइतिश्रुतः ॥ यथा-
गौस्तृणधान्यादि भुक्त्वाक्षीरवहाभवेत् ॥ ५७ ॥ तथाग्निर्हविरादाय तत्तद्द्रव्यसमुद्भवं ॥ रसंपीयूषतांनीत्वा प्रापयत्येवनान्यथा ॥

॥ ५८ ॥ देवानांहव्यवाहोसौ पितृणांकव्यवाहनः ॥ तर्पकोथद्विरूपोसौ मुख्यतोविष्णुतोषकः ॥ ५९ ॥ अत्यंतंयोदरिद्रस्या--
त्सोपिचाहारमात्रकं ॥ लभतेवान्यथातस्य जायतेर्जीवनंकथं ॥ ६० ॥ आहारमात्रादप्येकं ग्रासंवन्हौसमर्पयेत् ॥ किंचिद्दद्याच्च--
विप्राय नशून्यंदिवसंनयेत् ॥ ६१ ॥ स्वयंवृथानभुंजीत दद्याच्चजुहुयादपि ॥ नमहाधनिकाःसर्वे नसर्वेधर्मतत्पराः ॥ ६२ ॥ अतो
बुभूषुःशक्त्यैव दानहोमादिकंचरेत् ॥ पुण्यमेवपरत्रास्य सहायोत्रापिविद्यते ॥ ६३ ॥ अतस्तदार्जनंमुख्यं वंध्यंस्यात्तद्विनादिनं ॥
एवंयमैश्चनियमै र्बाह्यैरांतरकैरपि ॥ ६४ ॥ भक्त्यापरमयायुक्तः पूजयेत्पुरुषोत्तमं ॥ सएवमुक्तिभागीस्या न्नान्योपायशतैरपि ॥
॥ ६५ ॥ इति श्रीविष्णुरहस्ये ब्रह्मनारदसंवादे द्विपंचाशत्तमोध्यायः ॥ ५२ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीवेदव्यासायनमः ॥ ब्रह्मोवाच ॥ आश्चर्यमेतल्लोकस्य ज्ञात्वापापेप्रवर्तते ॥ स्वस्यकन्यांस्नुषांभार्यां स्वसारंवापिमातरं ॥ १ ॥
सकामेनकटाक्षेण निरीक्षयेतापियोनरः ॥ तस्मैद्रुह्यतिशक्तिश्चे त्स्वंतिघातयतेथवा ॥ २ ॥ सकथंपरकन्यादि जारवृत्त्याभिकांक्ष-
ति ॥ स्वदेहस्यस्वपुत्रादे रीषत्तापादिनातपेत् ॥ ३ ॥ कथंनिरागसांमांसं सभोक्तुमपिवांछति ॥ गोजाविमृगपक्ष्यादि प्राणिजातं--
तृणादिभुक् ॥ ४ ॥ जलेचराश्चमत्स्याद्या प्रायेणजलवृत्तयः ॥ नानोपायैश्चतान्हंतुं यतंतेमांसलोभतः ॥ ५ ॥ तृणादिनाजलेना-

104

पि येजीवंतिनिरागसः ॥ तान्हत्वोत्कृत्यमांसानि खादंतोनैवबिभ्यति ॥ ६ ॥ स्वस्यापराधंयःकश्चि दल्पमप्याचरेत्ततं ॥ भृशंदं-
डयतेमूढः प्रभुत्वमतिदर्शयन् ॥ ७ ॥ अपराधसहस्राणि प्रत्यहंप्रतिनाडिकं ॥ सर्वेश्वरस्यकुर्वाणो नबिभेतितदद्भुतं ॥ ८ ॥ पशु
भ्योमानुषाणांच बुध्धिरेवावशिष्यते ॥ आहारोमैथुनंनिद्रा भयादिसकलंसमं ॥ ९ ॥ तादृग्बुध्धेर्विनाशाय मद्यंपिबतिदुर्मतिः ॥
परिधानमपिस्वस्य नीतंबुध्यतिनैवयः ॥ १० ॥ सकथंसुखमाप्नोति नारीसंगेनमोहितः ॥ संगोपिदुर्लभोयत्र ताड्यमानोनबुध्य-
ते ॥ ११ ॥ ईदृशींमदिरांपीत्वा मूढःसुखमभीप्सति ॥ अस्तुवामद्यपानेन मादनंदुष्टचेतसां ॥ १२ ॥ पानाभावेपिमाद्यंति श्री-
मदेनविमोहिताः ॥ माद्यंतिपशवोयद्व दृष्ट्वानीलतृणादिकं ॥ १३ ॥ तथाश्रीमदमत्तास्ते नपश्यंतिगुरूनपि ॥ अवजानंतिपि--
त्रादीन् ब्राह्मणांश्चावजानते ॥ १४ ॥ च्यवंतेसंपदःसद्यः सावधानास्ततःपरं ॥ असतांश्रीमदांधानां दारिद्र्यंपरमांजनं ॥ १५ ॥
सदसद्येनवीक्ष्येत नावमन्येतकानपि ॥ एवंयद्यपिलोकेस्मिन् प्रायोनरविचेष्टितं ॥ १६ ॥ तथापितारिणीतेषा मेकासत्संगति--
र्ध्रुवं ॥ तीर्थयात्रायज्ञदान तपोभिःपूर्वजन्मसु ॥ १७ ॥ तोषितोयैर्महाविष्णुः सतांसंगंलभंतिते ॥ तीर्यतेयेनतत्तीर्थं तीर्यतेसाधु-
संगतेः ॥ १८ ॥ अतस्तत्परमंतीर्थं नजलंतीर्थमुच्यते ॥ धावकारजकाःपापाः धीवराद्यास्त्वनेकशः ॥ १९ ॥ प्रायस्तीर्थेवसंतो--
पि भावशुद्धिंलभंतिन ॥ पृच्छानुभवमात्मीयं कथमात्माप्रसीदति ॥ २० ॥ सत्संगेनाथवातीर्थे किंचलाभादिकंभवेत् ॥ फलंता

त्कालिकंतीर्थे बहिर्मलविशोधनं ॥ २१ ॥ पिपासाहरणंचापि तद्वयंजायतेततः ॥ वापीकूपतटागादौ यत्रकुत्रजलाशये ॥ २२ ॥
बहिर्मलविशुद्धिःस्या न्नांतर्मलविशोधनं ॥ गंगादिपुण्यतीर्थानि कालेनैवफलंतिहि ॥ २३ ॥ अदृष्टद्वारतस्तस्मा त्तत्तीर्थसाधुसंग-
तिः ॥ गंगादितीर्थशेवाच फलंदातुंयदोन्मुखा ॥ २४ ॥ जन्मांतरेषुजायंते तदातत्संगतिर्भवेत् ॥ यदेवस्यात्सतांसंग स्तदैवात्मा-
प्रसीदति ॥ २५ ॥ यदिस्याद्गुणवानात्मा तदासत्सुफलोभवेत् ॥ अहल्यारामसंगेन प्राप्तवत्युत्तमांगतिं ॥ २६ ॥ ताटकाशूर्पण-
खयाद्याः सद्योनर्थप्रपेदिरे ॥ त्वमप्यासीःपुरावत्स विप्रदासीसमुद्भवः ॥ २७ ॥ योगिनांसंगलाभेन मदुदरेजन्मलब्धवान् ॥ जातो
भागवतःश्रेष्ठः प्रल्हादस्तवसंगतः ॥ २८ ॥ परिक्षिच्छुकसंगेन लब्धवान्परमांगतिं ॥ पूर्वस्मिन्ब्रह्मणोयोभू न्मानसान्नारदाव्हयः ॥
॥ २९ ॥ सोपिसत्संगलाभेन प्राप्तवान्वैष्णवंपदं ॥ एवंनानामुनिश्रेष्ठा तथाराजर्षिसत्तमाः ॥ ३० ॥ सत्संगेनैवसंप्राप्ता स्तत्परं-
वैष्णवंपदं ॥ देवाअपिहिरेवत्वं प्राप्ताःसत्संगलाभतः ॥ ३१ ॥ अहमप्यासवांस्तेन तस्मात्सत्संगमोवरः ॥ नेदृशंसाधनंमुक्तौने-
दृशंपरमंहितं ॥ ३२ ॥ मनसस्तोषकंनान्य दिहामुत्रचविद्यते ॥ श्रुत्वाधर्मंविजानाति श्रुत्वापूज्यश्चजायते ॥ ३३ ॥ श्रुत्वावि--
श्रांतिमाप्नोति श्रुत्वासर्वज्ञतांलभेत् ॥ श्रुत्वामननमाप्नोति मननाध्यानमाचरेत् ॥ ३४ ॥ ध्यानात्साक्षाद्भवेद्विष्णु स्ततोमोक्षः--
करःस्थितः ॥ अश्रोतापशुवन्मर्त्यः सदसन्नैववेत्तिसः ॥ ३५ ॥ वृथाजन्मभवेत्तस्य मातृयौवनहारिणः ॥ अधर्मंनविजानाति

105

ज्ञात्वापिनत्यजत्यमुं ॥ ३६ ॥ ऽशृण्वन्पुरुषस्तस्मा च्छ्रवणंसर्वदाचरेत् ॥ ईदृशंश्रवणंश्रेष्ठं सर्वेषांपरमंहितं ॥ ३७ ॥ अतःस--
द्भ्योनिशंकुर्या च्छ्रवणंतेनसद्गतिः ॥ तद्दिनंदुर्दिनंविद्धि मेघच्छंनंनदुर्दिनं ॥ ३८ ॥ यद्दिनंहरिसत्कीर्ति कथामृतविवर्जितं ॥ यथै
ववन्हिसंबंधा च्छीघ्रंतूलादिदह्यते ॥ ३९ ॥ काष्ठादिकंविलंबेन ततोप्यार्द्रेंधनादिकं ॥ ४० ॥ हेमलोहादिकंचान्य च्छुध्यत्येवनद-
ह्यते ॥ कानिचिद्बलहीनानि विदीर्यंतेचकानिचित् ॥ ४१ ॥ तथैवनानापापानि पुण्यान्यपिचकानिचित् ॥ कीर्तनाच्छ्रवणाध्याना
त्तथानामार्चनादिना ॥ ४२ ॥ विनश्यंतिचशुध्यंति दर्शनादपिवैहरेः ॥ तस्मात्तस्यसदाकार्यं कीर्तनश्रवणादिकं ॥ ४३ ॥ सर्व-
थाहितकृत्तस्या न्नान्यदीदृक्प्रकीर्तितं ॥ स्वकर्मकरणाशक्तो दारिद्रोदानवर्जितः ॥ ४४ ॥ अल्पावकाशस्वल्पायु र्यौवाकोवामुमु-
क्षुकः ॥ सकुर्यादादरंविष्णोः कीर्तनेश्रवणेपिवा ॥ ४५ ॥ देहस्यनमहायासो नापिवित्तव्ययोमहान् ॥ महानिष्टनिवृत्तिश्च महेष्ट-
मपिसिध्यति ॥ ४६ ॥ यत्रादरमकुर्वाणो मूढान्मूढतमोहिसः ॥ अज्ञानांज्ञानदोश्वस्या न्मज्जतांतारकंपरं ॥ ४७ ॥ निधानमध--
नानांच श्रेयःश्रेयस्तमादपि ॥ तापापहंप्रतप्तानां श्रवणंकीर्तनंहरेः ॥ ४८ ॥ नानेनसदृशंकिंचि त्परमंहरितोषणं ॥ अतएतद्द्वयं-
कार्यं सर्वदैवमुमुक्षुणा ॥ ४९ ॥ सएवदेशोतिपवित्रईरितो यःकीकटाख्योतिविगर्हितोपि ॥ सएवकालोतिपवित्रउच्यते यत्रैव-
सद्भिःसहसंगतिस्यात् ॥ ५० ॥ तत्रैवगंगायमुनाचतत्र गोदावरीतत्रसरस्वतीच ॥ सर्वाणितीर्थानिवसंतितत्र यत्राच्युतोदारकथा

प्रसंगः ॥ ५१ ॥ संसारचक्रेभ्रमतांनराणा मिहाप्यमुत्रापिमहाफलप्रदः ॥ सत्संगएकोस्तिनहीतरस्या द्यत्राच्युतोदारकथाप्रसं-
गः ॥ ५२ ॥ यत्कीर्तनाच्छ्रवणाद्यस्यगाना द्यत्संस्मृतेश्चापियदर्चनेन ॥ सर्वेष्टसिद्धिःसततंप्रजायते सएकएवास्तिरमापतिःप्रभुः ॥
॥ ५३ ॥ यच्छ्रूयमाणंहरतेमनांसि यत्पानतस्यादधिकापिपासा ॥ नवोनवोयत्ररसश्चलभ्यते कोनामतस्माद्विरजेद्रसज्ञः ॥ ५४ ॥
एवंविधायांहरिसत्कथामृता द्विरक्तचित्तःपशुरेवसाक्षात् ॥ अशृंगपुच्छोद्विपदोनहीतर स्यांञ्चेन्मृतोभवितानारकीसः ॥ ५५ ॥ प्रा-
येणयान्निष्फलमेवलोके स्तोकप्रदंवापिकथंचनस्यात् ॥ वदेत्स्मरेतच्छृणुयाश्र्शश्व न्महाफलंविष्णुकथामृतंत्यजेत् ॥ ५६ ॥ एता
वतालंसकलेश्वरोहं यच्छ्रीपतेःसद्गुणवीर्यसंघान् ॥ शृण्वन्प्रगायंनथकीर्तयंश्च तृप्यामिनाद्यापिनवंनवंस्वदन् ॥ ५७ ॥ श्रोतुंसमीहे-
न्यमुखादपिस्म यद्यप्यहंसर्वविदांवरिष्ठः ॥ परायुरद्यापिकथंनमन्ये मंदायुषस्तत्रनचाद्रियंते ॥ ५८ ॥ श्रुत्वाल्पमेवालमितिस्मम
न्यते सर्वज्ञइत्येवततोभिमन्यते ॥ अत्यल्पमायुर्बहुमन्यमानो त्यल्पेनमाद्यतधनादिनाल्पकः ॥ ५९ ॥ पश्येद्विवेकेनयदास्वतो-
धिकान् श्रुतेनबुध्यावयसाधनादिना ॥ शृण्वन्कथाश्चापिपुरातनानां नतुच्छमात्मानमवेतिमूढधीः ॥ ६० ॥ प्रभ्राम्यनानायुतलक्ष-
योनीः सुदुर्लभंमानुषमाप्यजन्म ॥ करोतिनैवात्महितंविमूढ स्तमारूढच्युतमाहुर्नितांतं ॥ ६१ ॥ अत्यल्पमायुस्तदुपद्रवान्वितै
राशासहस्त्रैर्ग्रथितंदिनेदिने ॥ अथापिविद्वान्प्रयतेतसर्वथा सत्संगमायैवनहीतिराध्धितं ॥ ६२ ॥ चिंताकुलोपिव्यथितोपिपूरुषः

सत्संगलब्ध्वाश्रुणुयाद्दिनेदिने ॥ निश्चिंतचित्तोनभवेदयंक्वचि ज्जीवतयावत्प्रयतेततावत् ॥ ६३ ॥ श्रुत्वाखिलंतन्मनसावधार्य
निश्चित्यकार्यंचयदप्यकार्यं ॥ हिताहितंनित्यमनित्यमुत्तमं बध्नीतानित्येस्वमनोहरेःपदे ॥ ६४ ॥ क्रमेणसंपाद्यशमंदमंच विवेक-
दृष्ट्याविरजेताखिलाच्च ॥ सुखादैहिकामुष्मिकाच्चाप्यानित्य दुष्टात्स्तोकाच्छुत्धधीर्मोक्तुमिछंन् ॥ ६५ ॥ वेदांतानांज्ञानमुत्पाद्यचित्रं
कुर्यान्नित्यंध्यानमेवेश्वरस्य ॥ ध्यानाभावेचिंतयेद्विष्णुकर्मा ण्येवंदेहंसार्थकंस्वस्यकुर्यात् ॥ ६६ ॥ ध्यानेनतुष्टोदर्शयेदात्मरूपं प-
श्चाद्धंधान्मुक्ततांयातिसद्यः ॥ लिंगोद्भेदादात्मसौख्यस्यलाभो मोक्षोत्द्येषस्तूयतेवेदगर्भैः ॥ ६७ ॥ नारदैवंमयाप्रोक्तं सर्वजीव--
हितेप्सुना ॥ रहस्यंपरमंविष्णोर्महिमासंगतेःसतां ॥ ६८ ॥ उपादिशेत्स्वशिष्येभ्य स्त्वमप्येवंहितेप्सया ॥ सज्जनानांस्वयंचित्ते
त्वमप्यतद्विचिंतय ॥ ६९ ॥ श्रीशुकउवाच ॥ एवमादिश्यभगवान् नारदायपितामहः ॥ तूष्णीमासीत्ततोनत्वा नारदस्त्रिदिवंय-
यौ ॥ ७० ॥ एवमाहपुराव्यासो जनकोदययामम ॥ तदुक्तवानहंतुभ्यं त्वमप्यात्मनिचिंतय ॥ ७१ ॥ सूतउवाच ॥ इत्यादिश्य
शुकोयोगी स्वैरचारीविनिर्गतः ॥ तद्वदुक्तंमयाविप्रा रहस्यंपरमाद्भुतं ॥ ७२ ॥ इति श्रीविष्णुरहस्ये सत्संगवर्णनंनाम त्रिपंचा--
शत्तमोध्यायः ॥ ५३ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीवेदव्यासायनमः ॥ सुमंतुरुवाच ॥ कर्मानुलारीफलदः सर्वस्यजगदीश्वरः ॥ तर्हियत्नंवृथैवास्य किमर्थंयततेनरैः ॥ १ ॥ सू-
तउवाच ॥ अदृष्टाज्जायतेयत्नो यत्नात्कर्मकरोत्ययं ॥ जायतेकर्मणादृष्टं प्रवाहोनादिरेवहि ॥ २ ॥ जायतेनृपपुत्रोय मकस्मान्नि
धिलाभवान् ॥ इत्यादिफलभाङ्मर्त्यो केवलादृष्टतोभवेत् ॥ ३ ॥ अदृष्टेपिनतंकिंचि ल्लभ्यतेयत्धनादिकं ॥ यत्नेनैवहितद्भोगो
जायतेनान्यथाक्वचित् ॥ ४ ॥ चर्वणेगिलनेपाके मलोत्सर्गादिकर्मसु ॥ यत्नस्यैवप्रधानत्वं सयत्नःकर्मणैवहि ॥ ५ ॥ अदृष्टंदृष्टसा-
हाय्यं प्रायःसर्वफलोद्भवे ॥ पुत्रस्त्रीभोगभक्ष्यादौ तथैवेच्छाहरेर्यतः ॥ ६ ॥ शरीरमिंद्रियाणाहु यत्नस्यकरणानिवै ॥ कर्मानुसार-
तोयस्य दद्यादीशःस्वयंप्रभुः ॥ ७ ॥ यावत्कारणसामग्री तावतायत्नमाचरेत् ॥ क्वचित्स्यात्फलदोयत्नः क्वचिदेववृथाभवेत् ॥८॥ व्या
विपर्ययोभवेत्क्वापि सर्वंतद्विष्णुयंत्रितं ॥ प्रायेणेदंपुराप्रोक्तं मयात्रभवतांपुरः ॥ ९ ॥ अथापिकिंचिद्वक्ष्यामि श्रुणुध्वंतत्समाहिताः
पुरासुभद्रोनामाभूत् ब्राह्मणोवेदवित्तमः ॥ १० ॥ गंगातिरेसमासीनो जलूकांतत्रदृष्टवान् ॥ करपादविहीनांता मीषन्मग्नांसरिज्ज- ती
ले ॥ ११ ॥ दृष्ट्वाविस्मयमापन्न स्तज्जीवनमाचिंतयत् ॥ करपादविहीनोयं देहीजीवत्ययंकथं ॥ १२॥ अनुद्योगःकथंभक्ष्यं लभ- १०७
तेचदिनेदिने ॥ नहिभक्ष्यंविनाकश्चि ज्जीवतीत्युपलभ्यते ॥ १३ ॥ एवंचिंतांप्रकुर्वाणो ददर्शैकंतुकीटकं ॥ जलप्रवाहतोयातं ज-
लूकावदनांतिके ॥ १४ ॥ अग्रसत्कीटकंसातु साविस्मयमवाप्तवान् ॥ अहोचित्रमहोचित्रं वृथायत्नंप्रकुर्वते ॥ १५ ॥ विमोहिता-

107

जनाःसर्वे वृत्तिदःकेवलोहरिः ॥ अथतस्थौनिरुद्योग स्ततत्रैवहिसुभद्रकः ॥ १६ ॥ ध्यायमानोहरिंचित्ते मीलिताक्षःसुखासनः ॥
दिनांतेध्याननिर्मुक्तो भक्ष्यंकिंचिन्नलब्धवान् ॥ १७ ॥ ततःसंध्यामुपास्यैवं ध्यायंस्तस्थौनिशामपि ॥ पुनःप्रातःपुनर्नक्त मेवंचक्रेदि-
नत्रयं ॥ १८ ॥ चतुर्थेदिवसेप्रातः सुस्नातःक्षुधयार्दितः ॥ चुक्रोशोच्चैरमानाथ क्वासिक्वासीतिवैमुहुः ॥ १९ ॥ वृद्धब्राह्मण-
रूपेण प्रादुर्भूतस्तदग्रतः ॥ हरिःसाक्षाद्दयाक्लिन्न चेताविश्वंभरोविभुः ॥ २० ॥ अपिवत्ससुभद्रत्वं कुतःखिन्नोसिमाखिद ॥
सिसृक्षुर्भगवानादौ मुखबाहूरुपादतः ॥ २१ ॥ विप्रक्षत्रियविट्शूद्रा न्निर्मायैवाखिलंजगत् ॥ वृत्त्यासंयोजयामास नाना-
विद्याप्रवृत्तया ॥ २२ ॥ परस्परोपकाराय मुखबाहूरुपादजाः ॥ स्वयंप्रदर्श्यतावृत्ति र्लोकेप्रचयमातनोत् ॥ २३ ॥ प-
शुपक्षिमृगादीनां क्रिमिकीटादिनामपि ॥ मुखपादादिशरीर व्यापारैर्वृत्तिमातनोत् ॥ २४ ॥ धावनैर्वाहनैर्युद्धै र्वृषोष्ट्रगजवाजि-
नां ॥ जीवनंकल्पयामास मृगादीनांपरस्परं ॥ २५ ॥ केचिन्नखायुधाःकेचि द्दंष्ट्रिणःशृंगिणःपरे ॥ परस्परेणजीवंति केचित्तृणज-
लादिभिः ॥ २६ ॥ पादव्यापारिणःकेचि त्पक्षव्यापारिणःपरे॥ एवंतेषांसाधनानि शरीरेषुनियोज्यच॥२७॥जीविकाःकल्पयामास
मानुषेष्वपिसर्वशः ॥ आनुलोम्यात्प्रातिलोम्या त्प्रजाजाताह्यनेकशः ॥ २८ ॥ नानाजातिसहस्रास्ताः वृत्त्याजीवंतिनान्यथा ॥
करपादविहीनाये मूकाअंधाश्चपंगवः ॥ २९ ॥ अशक्ताश्चाप्यनाथाश्च जंगमास्थावराअपि ॥ तान्सर्वांस्तत्रतत्रैव ग्रासंप्रापयति-

वि०र० ॥ १०८

प्रभुः ॥ ३० ॥ गर्भस्थान्जाठरान्बालान् यज्जीवयतुमिच्छति ॥ तर्हिंप्रापयतेभक्ष्यं यावज्जीवंनसंशयः ॥ ३१ ॥ क्लेशित्वाजीव-
यत्यन्या न्सुखयित्वापिजीवयेत् ॥ तत्तन्नानाकर्मवशा त्स्वतंत्रश्चहोहरिःसदा ॥ ३२ ॥ जलूकाद्याश्चयेकेचि त्प्राणिनःशक्तिवर्जि--
ताः ॥ तेषांग्रासंमुखेष्वेव प्रापयत्येषवैप्रभुः ॥ ३३ ॥ मुखप्राप्तंचतेग्रासं मुखव्यापारतोपिहि ॥ ग्रसंतिचगिलंत्येव नकश्चिद्यत्न-
इष्यते ॥ ३४ ॥ हस्तैःपादैश्चकर्णाद्यै रिंद्रियैपटवोहिये ॥ अटनेवचनेनाना कर्मकौशलकेपिच ॥ ३५ ॥ येशक्तास्तैस्वशक्त्यैव य-
त्नाज्जीवनमाप्यते ॥ सुभद्रत्वंप्रभुर्दक्षो नानाविद्याविशारदः ॥ ३६ ॥ शक्त्यायत्नंविधायेव जीविकांप्राप्स्यसिध्रुवं ॥ अदृष्टंनृपव--
त्प्रष्ठं नानायत्नास्तुदासवत् ॥ ३७ ॥ नहिदासैर्विनाराजा फलभागीविलोक्यते ॥ अत्रैवोदाहरंतीम मितिहासंपुरातनं ॥ ३८ ॥
जयंतीनगरेपूर्वं सुदामनिमहीपतौ ॥ विचित्रश्चप्रचंडश्च सखायौद्वौबभूवतुः ॥ ३९ ॥ एकदानर्मगोष्ठीषु विवादःसमभूत्तयोः ॥ अदृ
ष्टश्रेष्ठतामाह विचित्रोथप्रचंडकः ॥ ४० ॥ प्रयत्नश्रेष्ठतामाह तत्तंनानानिदर्शनैः ॥ निश्चयार्थंसुदामानं राजानंतौप्रजग्मतुः ॥४१॥
श्रुत्वाविवादंनृपतिः क्रोधादिवनिशामुखे ॥ देवालयेबहिर्ग्रामा दिमौनिक्षिप्यतामिति ॥ ४२ ॥ भृत्यानाज्ञापयामास तेतथैवप्रच-
क्रिरे ॥ अंधकारावृतेतस्मिन् शिवदेवालयेथतौ ॥ ४३ ॥ स्थापितौराजभृतकै द्वाराण्यपिपिधायच ॥ अदृष्टवादीनिश्चेष्टो विचि--
त्रःपतितोभुवि ॥ ४४ ॥ यत्नवादीप्रचंडस्तु यत्नंतत्रापिनामुचत् ॥ घनांधतमसेतत्र यतमानःप्रचंडकः ॥ ४५ ॥ लेभेनानाविधा-

108

न्नेन पूर्णपात्रंशिवांतिके ॥ निवेदितंयद्रुद्राय धनिकेनात्रकेनचित् ॥ ४६ ॥ पंचरत्नयुतान्नेन पूर्णपात्रंतदापसः ॥ भुंजानोन्नंप्रचंड-
स्त न्मुदितःक्षुधयार्दितः ॥ ४७ ॥ विचित्रंगर्हयामास मूढयत्नोमहानिति ॥ पश्येदंयत्नतोलब्धं मयान्नंसुमनोहरं ॥ ४८ ॥ य-
त्नहीनक्षुधार्तस्त्वं मृतवत्पतितक्षितौ ॥ विचित्रउवाच ॥ अपिमूढनजानासि त्वयाप्येतददृष्टतः ॥ लब्धंनैवान्यथाविद्धि यत्न-
स्तदुपपादकः ॥ ५० ॥ कश्चित्धावन्पतेद्गर्ते कश्चित्धावल्लभेन्निधिं ॥ कश्चिद्यत्नाल्लभेदुःखं कश्चिद्यत्नात्सुखंलभेत् ॥ ५१ ॥ अदृष्टमे-
वपरमं लाभालाभनियामकं ॥ वृष्टिर्भवत्यदृष्टेन जायतेम्रियतेततः ॥ ५२ ॥ धनस्त्रीपुत्रगेहादि सर्वंतेनैवलभ्यते ॥ दुःखंप्राप्नोति-
तेनैव यत्नसाध्यमिदंनहि ॥ ५३ ॥ तेनैवजायतेयत्नः सामग्रीघटकंचतत् ॥ तदपेक्ष्यैवदेवोपि सुखदुःखादियच्छति ॥ ५४ ॥
इत्याद्यदृष्टस्तवनं विचित्रेसतिकुर्वति ॥ भुंजानस्तुप्रचंडोन्नं तल्लेभेरत्नपंचकं ॥ ५५ ॥ पाषाणबुध्यातत्याज विचित्रोपरितद्रुतं ॥
विचित्रोदृष्टलब्धंत दितिमत्वावबत्धतत् ॥ ५६ ॥ प्रचंडोन्नंतुतद्भुक्त्वा पीत्वाचापिघटीजलं ॥ सुप्वापात्रसुखंरात्रौ दिवातावाव्हय
नृपः ॥ ५७ ॥ प्रचंडंमुदितंदृष्ट्वा विचित्रंम्लानमेवच ॥ पप्रच्छवृत्तंकिमिति तावथप्रोचतुश्चतं ॥ ५८ ॥ प्रचंडप्राहसर्वंत द्वृत्तंरा-
त्रौबभूवयत् ॥ विचित्रःपंचरत्नानि नृपस्याग्रेन्यवेदयत् ॥ ५९ ॥ महाधनानिरत्नानि विलोक्यनृपतिःस्वयं ॥ शांतोविवादोयु-
वयो रित्यवादीत्तयोःपुरः ॥ ६० ॥ राजोवाच ॥ यत्नेनयदसाध्यंस्या त्तददृष्टेनलभ्यते ॥ जननेमरणेदुःखे निधिलाभेपहारिणे ॥

॥ ६१ ॥ नैवयत्नोनरस्यस्या त्केवलादृष्टहेतुतत् ॥ अनुकूलंयदादृष्टं तदायत्नःफलान्वितः ॥ ६२ ॥ अन्यथेतरथैवस्या द्यत्नो-
पिस्यादृदृष्टतः ॥ अन्नमात्रंत्वयालब्धं त्वयायत्नेनमार्गता ॥ ६३ ॥ प्रचंडस्त्यक्तवान्रत्न पंचकंस्वयमेवहि ॥ अयत्नेनैवतल्लब्धं
केवलादृष्टकारणात् ॥ ६४ ॥ विचित्रेणततोदृष्टं प्रबलंयत्नतःस्मृतं ॥ अथापिचर्वणादीनि यत्नसाध्यानिनान्यथा ॥ तस्माद्यत्न-
स्यसर्वत्र स्यादृदृष्टसहायता ॥ ६५ ॥ ब्राह्मणउवाच ॥ नृपेणोक्तंतदाकर्ण्य जग्मतुःछिन्नसंशयौ ॥ प्रचंडश्चविचित्रश्च मुदितौस्वंस्वमा-
लयं ॥ ६६ ॥ अतःसुभद्रशक्त्यात्वं कुर्वन्यत्नमतंद्रितः ॥ अदृष्टवशतोलब्ध्वा धनवस्त्रादिचाखिलं ॥ ६७ ॥ सूतउवाच ॥ इ-
त्यादिश्यसुभद्रंस भगवान्विश्वरूपधृक् ॥ अंतर्दधेसुभद्रोथ शक्त्यायत्नंविधायच ॥ ६८ ॥ पूर्वकर्मानुरोधेन धनधान्यादिलब्ध-
वान् ॥ यस्मादृदृष्टंसर्वत्र जीवयत्नमपेक्ष्यते ॥६९॥ तस्मात्कुर्वीतशक्त्यैव प्रयत्नंकेशवाज्ञया ॥ अनादिकालसंकल्प एवमेवमहे-
शितुः ॥ ७० ॥ तमनुल्लंघयन्मर्त्यो नापराधीहरेर्भवेत् ॥ तमुल्लंघ्यापराधीस्या दन्यथाश्रुतिचोदितौ ॥ ७१ ॥ व्यर्थौविधिनिषेधौ-
तु भवेतांयत्नतोविना ॥ दृष्टादृष्टफलप्रेप्सुः कुर्याद्यत्नंहरिंस्मरन् ॥ ७२ ॥ तेनतुष्येज्जगन्नाथः कुप्येदितरथाप्रभुः ॥ श्रुतिस्मृ-
तीतुतस्याज्ञे चरेत्तदनुसारतः ॥ ७३ ॥ यथास्वातंत्र्यभागंस्या त्फलमस्यविनिश्चयात् ॥ अन्यथानर्थमाप्नोति पुरुषोनात्रसंशयः ॥
॥ ७४ ॥ उल्लंघयन्नृपस्याज्ञां यथैवभूतकोलभेत् ॥ आज्ञाभंगोनरेंद्राणां विप्राणांमानखंडनं ॥ पृथक्शय्याचनारीणां अशस्त्रवधउ-

कुर्वन्यत्नमतंद्रितः

109

च्यते ॥ ७५ ॥ आज्ञामुल्लंघयन्विष्णोः पुरुषोयंदिनेदिने ॥ क्षणेक्षणेपिसततं धृष्टत्वान्नबिभेतिवै ॥ ७६ ॥ अनुज्ञालंघनाद्विष्णो
र्बंधःपापंहिजायते ॥ तादृशस्यास्यदयया दत्तेल्पंदुःखमीश्वरः ॥ ७७ ॥ अतःपाहीतिपाहीति मनसाकर्मणागिरा ॥ तमेवशरणं-
याया त्वकोन्यस्त्रातास्तिसंसृतौ ॥ ७८ ॥ पापंपरिहरेच्छक्त्या तथापुण्यंचरेदपि ॥ स्मरेच्चसततंभक्त्या परयाविष्णुमेवहि ॥ ७९ ॥
तस्यैवस्मरणंश्रेष्ठं सर्वस्मादपिपुंण्यतः ॥ सर्वेषामेवपापानां श्रेष्ठातस्यैवविस्मृतिः ॥ ८० ॥ तत्स्मृतेर्जायतेपुंण्यं विशेषफलदं--
नृणां ॥ पापंहीनफलंतुस्या दतस्तंसततंस्मरेत् ॥ ८१ ॥ तेनैवसुखमाप्नोति तेनसर्वेष्टभाग्भवेत् ॥ तेनैवमोक्षमाप्नोति नान्यत्सा-
धनमीदृशं ॥ ८२ ॥ इति श्रीविष्णुरहस्ये अदृष्टप्रयत्नयोर्निरूपणंनाम चतुःपंचाशत्तमोध्यायः ॥ ५४ ॥ ॥ छ ॥ ॥ छ ॥

॥ श्रीवेदव्यासायनमः ॥ सूतउवाच ॥ नानायोनीःपर्यटन्नेषजीवो दैवाद्यायान्मानुषंदेहमेनं ॥ रेतोबिंदोःस्त्रीरजोरक्तयोगा देत--
त्तिसत्येश्रीहरेरिच्छयैव ॥ १ ॥ नानाकाराण्यस्थिवृंदानिचैष रेतोमूलान्निर्मिमीतेथरक्तात् ॥ मेदोमांसस्नायुसंघान्क्रमेण वन्हेस्ता-
पाज्जाठरस्यैवतप्येत् ॥ २ ॥ त्वङ्मांसास्थ्यादीश्चधातून्जनन्याः कुक्षौपिश्यांनालरंध्रेणसम्यक् ॥ मातुर्हृद्यात्प्रापितादन्नधातोः
कालेकालेवर्धतेतेनगर्भः ॥ ३ ॥ नीचैर्वक्त्रःक्वथ्यमानोनलेन संज्ञामेषःप्राप्नुतेपंचमासैः ॥ तत्रस्थोयंचिंतयत्येषभूरि स्त्रीपुत्राद्यैः-

क्षेत्रभृत्यादेभिश्च ॥ ४ ॥ पूर्वेदेहेबत्धचेतानितांतं नाकार्षयच्छ्रीपतेस्तोषणार्थं ॥ पुण्यंदानंविप्रदेवार्चनादि यच्चाकार्यंपापराशिंन
मेकान् ॥ ५ ॥ तस्मान्नानायातनावृंदभोगा च्छेरात्पापादत्रगर्भेशयानः ॥ विण्मूत्राद्यैःक्राथ्यमानोनितांतं पीडामेनांकंकृपालुं-
ब्रवीमि ॥ ६ ॥ येनात्राहंपातितोगर्भयंत्रे यश्चात्रापिप्रापयेन्मत्यमन्नं ॥ यत्नंदेहंसर्वदावर्धमानो नानाकार्याण्यत्रचित्राणिधत्ते ॥
॥ ७ ॥ स्त्रष्टाद्रष्टाकेवलःसंततंयो विश्वस्यास्यप्रीणकःपीडकश्च ॥ तंदेवेशंनिर्गतोयोनियंत्रा न्नानाधर्मैस्तोषयिष्यामिदानैः ॥ ८ ॥
येनेदृशंगर्भवासंनयामि स्यामानंदीनित्यमस्येवलोके ॥ येषामर्थेकारिषंपापसंघं तेस्त्रीपुत्रक्षेत्रगेहादयोमां ॥ ९ ॥ प्रेतंदृष्ट्वातत्य-
जुःशीघ्रमेव तस्छुन्नैतःसंनिधौमेकृतघ्नाः ॥ भूयोनैषांसंगमंजातुकुर्या येनाहंस्यामीदृशःकष्टभागी ॥ १० ॥ इत्थंचिंतामग्नचेतानि-
तांतं वायोर्वेगात्प्राप्नुतेयोनियंत्रं ॥ भूयोभूयःप्रेर्यमाणोनिलेन स्वल्पाकाशेयोनियंत्रेतितप्ते ॥ ११ ॥ मूर्छाप्राप्तोदीनचेताः कथंचि-
त्स्मृत्यात्यक्तो यातिकष्टाद्बहिश्च ॥ जातोत्थ्येषःस्पर्शनाद्बात्यवायो गर्भेध्यातंविस्मरत्येवसर्वं ॥ १२ ॥ मातुस्तन्यंवांछमानोतिरोद
त्युच्चैःपश्चादीदृशोजायतेच ॥ बाल्येप्येषःस्वेष्टहानेःसदैव दुःखेनार्तःक्रोशमानोनितांतं ॥ १३ ॥ मक्षीदंशाद्यैर्मुहुःखाद्यमानः श-
क्त्याहीनःक्रोशतेभूयएव ॥ वक्तुंशक्तोनैषकंड्वादिपीडां दूरीकर्तुंनैवशक्तःस्वयंच ॥ १४ ॥ नासांकंठेश्लेष्मणारुत्ध्यमानो निष्ठ्यूतो-
पित्यक्तुमेषोसमर्थः ॥ मातारोगंनैवजानातिसम्यक् नैवावस्थामेषवक्तुंसमर्थः ॥ १५ ॥ अन्योरोगश्चौषधंकिंचिदन्यत् किंचिज्ज्ञान्य-

ज्जायतेदैवयोगात् ॥ एवंनानादुःखभोगेषुबाल्ये प्राप्तःकौमारंततःक्रीडनादौ ॥ १६ ॥ सक्तःस्वांतेनैवजानातिपथ्यं मातापित्राद्यै-
110 र्मुहुर्वार्यमाणः ॥ पश्चात्प्राप्तोयौवनंज्ञानहीनो दोषावस्थाश्चिंतयानोव्यवायं ॥ १७ ॥ भार्यावित्तंभोगसंपत्तिकामो नोजानीतेबंध-
मोक्षस्यवार्ता ॥ एवंकामान्नाप्नुवंनन्यकामान् भूयोभूयश्चिंतयानोतियत्नात् ॥ १८ ॥ भूत्वोद्योगीवंध्यवांछोपिभूयो वज्रस्वांतोनैव-
यत्नाद्विरज्येत् ॥ केचिद्गर्भेयांतिनाशंविमूढाः केचिद्बाल्येयौवनेंकाचेदवं ॥ १९ ॥ भोगासक्तास्तृप्तिहीनानितांतं मेरोरावंकुर्वतेत्य-
वकालः ॥ कंठप्राणेभ्रांतनेत्रोविवाचः स्त्रीपुत्रादीन्नैवचिंतेतचित्त ॥ २० ॥ दैवात्प्राप्तोवार्धकंमूढचेता भूयोभोगान्वांछमानोपिखि
द्येत् ॥ जिह्वोपस्थद्रव्यलाभादिवांछा नैवक्षीणाजायतेजीवितेच्छा ॥ २१ ॥ एवंजीवन्नेषनक्कापिकाले मोक्षेहेतुंनैवविष्णुंस्मरेत ॥
भुक्त्वाभोगान्भूयएवाभिवांछन् कर्मैरार्ताभग्नकामोपिभूयः ॥ २२ ॥ चर्वंनेवंचर्वितंजन्मजन्म न्यत्येवामुंकालरुद्रोत्यकस्मात् ॥
नेमंदेहंस्वेच्छयाप्राप्नुतेयं तिष्ठत्यत्रस्वेच्छयानैवमूढः ॥ २३ ॥ कामान्नैषप्राप्नुतेस्वेच्छयानो मृत्युंनैवस्वेच्छयायात्यकस्मात् ॥ काले-
कालेपारतंत्र्यंविलोक्य स्वातंत्र्यंवैसर्वदामन्यतेयं ॥ २४ ॥ स्वल्पप्राप्तौमाद्यतिक्षिप्रमेष क्षीणोत्यंतंनैवकामाद्विरज्येत् ॥ श्रांतःक्लां-
तोम्लानचित्तोतिदीनः संसाराब्धौपात्यमानोमुहुश्च ॥ २५ ॥ मोक्षेच्छावान्विष्णुमेकंशरण्यं मोक्षेशंतंसर्वदैवस्मरेत ॥ श्राव्यानि
त्यंतत्कथासन्मुखेभ्यो नानाव्यापारैर्मुहुराकृष्यमाणः ॥ २६ ॥ स्वल्पकालेसाधनंभूरिवांछंन् भूयोभूयस्तद्यशःश्राव्यमेव ॥ ना-

स्मादन्यत्साधनंबंधमोक्षे चित्तारामंकर्णमात्रैकसाध्यं ॥ २७ ॥ कत्यायोगाःकुत्रतत्साधनानि कुत्रध्यानंनष्टचित्तस्यनित्यं ॥ यो-
गारूढास्तापसाज्ञानिनोपि श्रीमद्विष्णोःसत्कथासक्तचित्ताः ॥ २८ ॥ स्वीयेवर्णेचाश्रमेवापिनित्यं यत्कर्मस्यात्तस्यसंकोचतोपि ॥
श्राव्यंविष्णोःसद्यशःसर्वदैव तेनैवस्यान्मुक्तबंधोनरोयं ॥ २९ ॥ ईदृशंश्रवणंविष्णोः कीर्तनंमननादिकं ॥ महाफलप्रदंनॄणां स-
त्संगादेवलभ्यते ॥ ३० ॥ तीर्थयात्रातपोदान यज्ञाद्याःसकलाःक्रियाः ॥ साधनंस्युःसतांसंगे तस्माद्विष्णुकथाश्रुतिः ॥ ३१ ॥
ततोभक्तिर्भवेद्विष्णौ पुनश्चश्रवणंततः ॥ कीर्तनंमननंज्ञानं क्रमात्संपाद्यतेयदि ॥ ३२ ॥ तदैवसंसृतेर्मोक्षो नान्यथास्यात्कथं-
चन ॥ सतांभवादृशांसंगः तस्मादितंविष्णुवैभवं ॥ ३३ ॥ उपदिष्टंसतांमुक्त्यै मत्स्यंद्वैपायनेनयत् ॥ रहस्यंपरमंत्वेत न्महाविष्णो
रतिप्रियं ॥ ३४ ॥ श्रवणात्कीर्तनादस्य ज्ञानयज्ञफलंलभेत ॥ नानेनसदृशंकिंचि न्मुख्यतोविष्णुभक्तिकृत् ॥ ३५ ॥ अनाख्ये-
यान्यभक्तेभ्यः श्राव्याच्चैवातिभक्तितः ॥ ज्ञानानिहरहस्यानि प्रायेणात्रोदितानिवै ॥ ३६ ॥ कलौयुगेमहाघोरे पुण्यविप्लवकारि-
णि ॥ क्वचित्क्वचिदिदंलभ्यं सद्योभक्तिकरंहरेः ॥३७॥ अमृतंदुर्लभंनॄणां तस्मादेतद्वरंततः ॥ मंदभाग्यैःकथंलभ्यं कथंचात्रादरो-
भवेत् ॥ ३८ ॥ विष्णुमायामुष्टधियां शास्त्रेभागवतेपुनः ॥ द्वेषएवाधिकोयद्वा नैवतत्रादरोभवेत् ॥ ३९ ॥ तादृशामतिदुष्टानां
विष्णुवैष्णवनिंदिनां ॥ द्वेषिणांविष्णुशास्त्राणा मत्रभक्तिकथंभवेत् ॥ ४० ॥ यथायथाकलेर्वृद्धि स्तथातथाभवेध्रुवं ॥ उच्छेदोवि

वि० र०
११२
112

12
ग्रं०५५

॥ सामंतोपपदेनाभिक्कुहरिणाविष्णोरहस्यंमहत् बोधायंस्यसुसाह्यतोहिजयतीर्थैनैवसंशोधितं ॥ श्रीमद्वेणुपुरस्थनैजनिलयेमुद्रा-
॥ क्षरैर्मुद्रितं विद्वांसःसदयाऽवलोकनसुधावर्षंतुसंतोसदा ॥ १ ॥ ॥ शकाब्दाःऽष्टादशशतोपरित्रयःभाद्रशुक्लप्रातिपत्. ॥

ई पुस्तकवु बेळगांवियल्लि भिकाजी हरी सामंत इवरु तंम मुद्राक्षर शालेयाल्लि मुद्रिसि प्रसिद्ध माडिदरु.

शके १८०३. 1881 A.D.

११२

ष्णुशास्त्राणां तद्विरुत्थप्रवर्तनं ॥ ४१ ॥ अतोतिदुर्लभंलोके भविष्यतिनसंशयः ॥ एतंविष्णुरहस्याख्यं पुराणंव्यासभाषितं ॥ ४२ ॥
विष्णुभक्तायशांताय धर्मिष्ठायमुमुक्षवे ॥ आख्येयमादरेणैव नैवाख्येयमनादृते ॥ ४३ ॥ यत्फलंसर्वतीर्थैस्या त्सर्वयज्ञैश्चतत्फलं ॥
सर्वदानैःकर्मभिश्च यद्यत्कालेनलभ्यते ॥ ४४ ॥ सकृच्छ्रवणतश्चास्य कीर्तनात्स्यात्तुतत्फलं ॥ अंतेमुक्तिमवाप्नोति यतोनावर्ततेे-
पुनः ॥ ४५ ॥ नमस्तस्मैभगवते व्यासायामिततेजसे ॥ येनप्रवर्तितोदीपो विद्याज्ञानमयोमहान् ॥ ४६ ॥ ऋषयऊचुः ॥ धन्य-
क्षणोयंतवसंगमाद्यतः किंयत्तथायुर्बतगत्वरंच ॥ यत्रेदृशंयत्वन्मुखपद्मनिःसृतं पीतंमुहुर्विष्णुकथामृतंहिनः ॥ ४७ ॥ पित्र्यर्णमुत्ती-
र्णमनेनतूर्णं देवर्णमप्येषनरोवतीर्णः ॥ कृतंचकर्तव्यमनेनपूर्णं योविष्णुगाथाश्रवणादरःस्यात् ॥ ४८ ॥ किंवर्णयामोबतभाग्य--
संपदं योव्यासवक्त्रांबुजगंधवासितं ॥ पीतंपयोविष्णुरहस्यनामकं पुनःपिबेन्नोजननीपयःपुमान् ॥ ४९ ॥ त्वंसूतजीवाब्दशतानि-
भूयो व्यासप्रियोविष्णुकथाभिलाषः ॥ इष्टानिसिध्यंतुसदातवात्र तथापरत्रापिहरेःप्रसादात् ॥ ५० ॥ इत्थंतेमुनयःसर्वे शौनका-
द्यामहोजसः ॥ श्रुत्वाविष्णुरहस्यानि शंसमानाश्चसूतजं ॥ ५१ ॥ प्रापुर्मुदंपुराविष्णो र्दृढांभक्तिमवाप्नुवन् ॥ प्राप्नुवंत्यखिलेष्टा-
नि यतोब्रह्मादयोखिलाः ॥ ५२ ॥ इति विष्णुरहस्ये अवशिष्टविष्णुमाहिमावर्णनंनाम पंचपंचाशत्तमोध्यायः ॥ ५५ ॥ श्रीकृ--
ष्णार्पणमस्तु ॥ ॥ श्रीवेदव्यासार्पणमस्तु ॥ ॥ समाप्तश्चाऽयंग्रंथः ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ सामंतोपपदेनाभिक्कुहरिणाविष्णोरहस्यंमहत् बोधायंस्यसुसाह्यतोहिजयतीर्थैनैवसंशोधितं ॥ श्रीमद्वेणुपुरस्थनैजनिलयेमुद्रा-
॥ क्षरैर्मुद्रितं विद्वांसःसदयाऽवलोकनसुधावर्षंतुसंतोसदा ॥ १ ॥ ॥ शकाब्दाःऽष्टादशशतोपरित्रयःभाद्रशुक्लप्रतिपत्. ॥

ई पुस्तकवु बेळगांवियल्लि भिकाजी हरी सामंत इवरु तंम मुद्राक्षर शालेयाल्लि मुद्रिसि प्रसिद्ध माडिदरु.

शके १८०३. 1881 A.D.

॥ इति श्रीविष्णुरहस्य समाप्तः ॥